येऽग्नौ हूयन्ते ते हुता नाम वेदितव्याः । येऽनग्नौ क्रियन्ते[3] बलिहरणादयः ते प्रहुता नाम वेदितव्याः । ब्राह्मणभोजनं यत्र ते ब्रह्मणिहुता नाम वेदितव्याः पाकयज्ञाः । एवमेते त्रिविधाः पाकयज्ञा भवन्ति । अल्पविस्तराः सुमहदर्थाः । तत्राग्निग्रहणमपार्थकम् । किं कारणम् । अन्यत्र होमाभावात् । तत्र दोषः स्यात् । अनग्नावपि हूयमाने हुतत्वं प्रसज्येत । तच्चानिष्टम् । यथा—'सर्पदेवजनेभ्यः स्वाहेति हुत्वा नमस्करोति' (२. १. १०–११) इति । तस्मादयं प्रहुत एवेति । वैश्वदेवादयस्तु हुताः । 'ब्राह्मणान् भोजयेत्' (२. ४. १६) इति ब्रह्मणिहुता इति । संव्यवहाराभावात् हुतादिभिः संज्ञाभिर्न प्रयोजनम् । एवं तर्हि संविज्ञानार्थम् । अथवा नित्यानां कर्मणां नित्यैरेव[4] शब्दैरुपदेशः क्रियते । कस्मात्[5] । कृत्स्नोपदेशार्थम् । अर्थतः शब्दतश्चोपदेशः कृतो भवति । तस्मात्

---

[1] प्रशस्ता वेति—A. [2] कल्प्येत—A. [3] हूयन्ते—A, C.
[4] नित्यैरेवोपदेशः—A. [5] तस्मात्—A.

संज्ञाकरणम् । अथवा त्रैविध्योपदेशार्थम् । उपदेशे पुनः[1] क्रियमाणे किं प्रयोजनम् । 'पाकयज्ञानामेतत् तन्त्रम्' (१. १०. २८) इति वक्ष्यति । तेन यादृश एव[2] पाकयज्ञे एतदाम्नातं तादृशेष्वेव कथं स्यादित्येतदर्थम् । इतरथा हि पाकयज्ञाविशेषात् सर्वत्र तन्त्रं प्रसज्येत । तत्र को दोषः स्यात् । [3]सर्पबलावप्यवदानधर्मः प्रसज्येत । ब्राह्मणभोजनेऽपि[4] निर्वापादयो[5] धर्माः प्रसज्येरन् । तस्मात् त्रैविध्योपदेशो न्याय्यः । तस्माद् धुतेष्वेव तन्त्रं नियम्यते । एवं ते ब्रुवतो दोषः । वैश्वदेवेऽपि तन्त्रं प्रसज्येत । न प्रसज्येतेति ब्रूमः । कस्मात् । उत्तरत्र विधानात् तन्त्रस्य । यदि चाभिप्रेतमभविष्यत् वैश्वदेवात् पूर्वमभ्यधास्यत् तन्त्रम् । तेन वैश्वदेवे तन्त्रं न प्राप्नोतीति । तस्माददोषः ।। ३ ।।

अथाप्यृच उदाहरन्ति—'यः समिधा य आहुती यो वेदेन' (ऋ० सं० ८. १९. ५) **इति ।। ४ ।।**

किमर्थमिदमृचामुदाहरणं[6] क्रियते । स्मार्तानां कर्मणां श्रौतैर्मन्त्र-वाक्यैरुपदेशः क्रियते तुल्यत्वप्रज्ञापनार्थम् । कथमेतान्यपि कर्माणि नित्यानि स्युरिति[7] । एतदर्थमृचामुदाहरणं क्रियते । अथवा ब्रह्मयज्ञादीनां पाकयज्ञत्वप्रज्ञापनार्थमृचामुदाहरणं क्रियते[8] । विद्ययैवापि[9] प्रीतिरस्तीति दर्शयति । अत आरम्भो युक्तः ऋचाम्[10]—'यः समिधा य आहुती यो वेदेन' (ऋ० सं० ८. १९. ५) इति । अथाधिकपादग्रहणं[11] किमर्थम् । तृचप्राप्त्यर्थम् । तन्नोपपद्यते । उत्तमा ऋगन्यार्था भवति । एवं तर्हि द्वयोर्ग्रहणमस्तु । कस्मात् । सामर्थ्यात् । प्रकृतस्य चार्थस्य संबन्धात् ।

---

[1] पुनः omitted in A. [2] इव—A, D. [3] सर्पबल्यादौ—A. [4] अपि omitted in A. [5] निर्वपनादयः—C, D. [6] ऋचाम् omitted in A. [7] स्मरति—A. [8] अथवा . . . क्रियते omitted in A, C. [9] विद्यया चापि—A, C. [10] ऋचः—A, D. [11] क्रियते added in A, B.

लक्षणाभावात् तन्न प्राप्नोति । अधिकपादग्रहणसामर्थ्यात् तृचो भवति । तृतीया त्वर्थविरोधान्न भविष्यति । तस्माद् द्वे एव भविष्यतः । एवमपि बहुवचनमपार्थकं भवति[1] । उत्तरा ऋचोऽपेक्ष्य बहुवचनं कृतार्थं भवति। यः समिधा य आहुत्या यो वेदेनेत्येवमुदाहरन्ते[2] । सा ऋक् अनेकलक्षणां प्रीतिं दर्शयति समिधा आहुत्या विद्ययेति । तत्राचार्योऽप्येवमुक्तवान् ।। ४ ।।

समिधमेवापि श्रद्दधान आदधन्मन्येत यज इदमिति । नमस्तस्मै य आहुत्या यो वेदेनेति । विद्ययैवाप्यस्ति प्रीतिः । तदेतत् पश्यन् ऋषिरुवाच--

'अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः ।
घृतात् स्वादीयो मधुनश्च वोचत ।।'

(ऋ० सं० ८. २४. २०)

इति । वच एव म इदं घृताच्च मधुनश्च स्वादीयोऽस्ति प्रीतिः स्वादीयोऽस्त्वित्येव तदाह--

'आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि ।
ते ते भवन्तूक्षण ऋषभासो वशा उत ।।'

(ऋ० सं० ६. १६. ४७)

इति । एत एव म उक्षाणश्च ऋषभाश्च वशाश्च भवन्ति य इमं स्वाध्यायमधीयत इति । यो नमसा स्वध्वर इति । नमस्कारेण वै खल्वपि । न देवा नमस्कारमति । यज्ञो वै नम इति हि ब्राह्मणं भवति ।। ५ ।।

---

[1] कथं—B, C. [2] उदाहरति—A, C, D.

श्रद्दधानस्यायं यज्ञो भवतीति तज्ज्ञापयत्याचार्यः। एवं श्रद्धायुक्तस्याचार्योऽपि नमस्कारं करोति[1]। नमस्तस्मै य आहुत्या यो वेदेनेति विद्यया च प्रीतिं दर्शयति। तामेतामनेकलक्षणां प्रीतिं दृष्ट्वा विद्ययैवाप्यस्ति प्रीतिरिति। तमेतमर्थं पश्यन्नेतस्मिन्नर्थे ऋचमाकृष्टवान्—'अगोरुधाय गविषे' इति 'घृतात् स्वादीयो मधुनश्च वोचत' (ऋ० सं. ८. २४. २०) इति। वच एव म इदं घृताच्च मधुनश्च स्वादीयोऽस्ति प्रीतिः स्वादीयोऽस्त्वित्येव तदाह। स्वादुतरं भवतीति। तत्राचार्य इदं वचनमुक्तवान्—यदिदं मम वचनं[2] हे अग्ने घृताच्च मधुनश्च स्वादुतरं भवतीति। मांसादपि स्वादुतरं भवतीति उत्तरा ऋग् विधीयते 'आ ते अग्न' (ऋ० सं० ६. १६. ४७) इति। य इमं स्वाध्यायमधीयत इति। एत एव मन्त्रा उक्षवद् ऋषभवद् वशावत् प्रीतिं जनयन्ति। ये श्रद्धावन्तो भूत्वेमं स्वाध्यायमधीयते। 'यो नमसा स्वध्वरः' (ऋ० सं० ८. १९. ५) इति। नमस्कारमपि यः करोति श्रद्दधानः सोऽपि[3] स्वध्वरः शोभनयज्ञः इत्युक्तं भवति। कथं नमस्कारेण यज्ञ इति। नमस्कारेण वै खल्वपीति। न वै देवा नमस्कारमति। देवा नमस्कारं यस्मादति न वर्तन्ते। नमस्कारस्तु देवानातिवर्तते। तस्मान्नमस्कारं देवा नातिवर्तन्ते। कुतः। यज्ञो वै नम इति हि ब्राह्मणं भवति। यस्मान्नमस्कारः श्रुतौ श्रूयते तस्मान्नातिवर्तन्ते। नमस्कारेणापि प्रीतिर्भवतीत्येवमनेकलक्षणा प्रीतिः प्रदर्शिता। महत्त्वाच्चार्थस्यर्चा नोक्तोऽर्थ इति निगदवत्तु वर्णयितव्याः तस्मात् सिद्धम् ॥ ५ ॥

इति प्रथमे प्रथमा कण्डिका

अथ सायं प्रातः सिद्धस्य हविष्यस्य जुहुयात्। अग्निहोत्रदेवताभ्यः सोमाय वनस्पतयेऽग्नीषोमाभ्यामिन्द्राग्निभ्यां द्यावा-

---

[1] नमस्करोति—A. [2] मद्वचनं—A, C, D. [3] तस्यापि—A.

पृथिवीभ्यां धन्वन्तरय इन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे स्वाहेति ॥ १ ॥

ब्रह्मणे स्वाहेत्येतदन्तं सूत्रम् । तत्राथशब्दो विशेषप्रक्रियार्थः । अथेमानि तानि[1] पूर्वोक्तानि कर्माणि विधीयन्ते गृह्याणि यानि प्राक् प्रतिज्ञातानि । तत्र सायंशब्दो रात्र्यादौ वर्तते । प्रातःशब्दश्चाहरादौ । एवमेतौ शब्दावेकदेशवाचकौ[2] सन्ताविह तु कृत्स्नवाचकौ द्रष्टव्यौ । सायंशब्दः कृत्स्नां रात्रिं परिगृह्णाति । प्रातःशब्दश्च कृत्स्नाहः । कथमेतद् गम्यते । स्मृतिदर्शनात्[3] । 'सायं प्रातरशनान्यभिजुषेत्' इत्येवं सायंप्रातर्भोजनं विधीयते । तत्र च श्रुतौ—'पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितॄणाम्' (श० ब्रा० २. ४. २. ८) इति । एवं चेदुपपद्यते प्रातःशब्दः कृत्स्नाभिधायी । तथा सायंशब्दश्च । अस्य कर्मणोऽन्नसंस्कारत्वात्[4] सिद्धस्येत्युच्यते । अन्यथा असिद्धस्यापि प्रसज्येत । यथा दध्नः पयसो वा । तस्मात् सिद्धग्रहणं कर्तव्यम् । हविष्यस्येति । हविरर्थो हविष्यम् । हविर्ग्रहणं किमर्थम् । अहविष्यस्य मा भूदिति । कथं वाहविष्यस्य प्राप्तिरिति । अन्नसंस्कारत्वात् । [5]यद्यद् भुज्यते तेन तेन होमः प्रसज्येत । एवं तदुभयमपि नारब्धव्यम् । दर्शनाद् भविष्यति सिद्धस्य च हविष्यस्य च । यथा —'तस्यै तस्यै देवतायै निर्वपति' (१. १०. ६) इत्युक्ते हविष्यमेव प्रतीयते । सिद्धं च तद् भवति । तद्वदिहापि प्रत्येष्यते । तस्मादुभयं नारब्धव्यम् । अनारभ्यमाणे पुनर्दोषः स्यात् । अनादिष्टस्य द्रव्यमाज्यं प्रसज्येत । यथा—'आ नः प्रजां जनयतु प्रजापतिरिति चतसृभिः प्रत्यृचं हुत्वा' (१. ८. ९) इति द्रव्यानादेश आज्यं प्रसज्यते ।

[1] तानि omitted in B. [2] वाचिनौ—C, D. [3] After this उचितमिति added in A, C, D; रचितमिति in B. [4] किमर्थं added in B. [5] यद् भुज्यते तेन होमः—B.

एवमिहापि प्रसज्येत सायंप्रातर्जुहुयादित्युच्यमाने । तस्मात् तन्निवृत्त्यर्थ-मन्यतरदारब्धव्यम् । एवमपि[1] सिद्धग्रहणमेवास्तु । हविर्ग्रहणमपार्थकम् । नापार्थकम् । किं कारणम् । अन्नसंस्कारत्वात् । अपूर्वार्थत्वाच्च[2] । अन्यथा यदेव भुज्यते तद्धूयते । तन्निवृत्त्यर्थं च हविर्ग्रहणं कर्तव्यम् । कथं सिद्धस्यैव होमः स्यात्, न तन्त्रं प्रसज्येतेति । तन्नोपपद्यते । कथम् । उपरिष्टात् तन्त्रस्य विहितत्वात् । एवं ते ब्रुवतो दोषः । अन्येषामपि प्राग्विहितानां न प्राप्नुयात् । भवति च । एवमिहापि स्यात् तन्त्रम् । हविर्ग्रहणात् तु न भविष्यति ।

अथाग्निहोत्रदेवताभ्य इति । किमयं मन्त्र आहोस्विद् विधायक इति । अग्निहोत्रे या देवतास्ता इह विदधाति । यद्ययं विधायकः कल्प्यते, अन्यैरपि विधायकैर्भवितव्यम् । यथा गृहदेवताभ्यो वास्तुदेवताभ्यश्चेति । तत्रापि गृहे या देवतास्ता विधातव्याः स्युः । अनेनेदं न तुल्यम् । अग्निहोत्रदेवताः[3] शास्त्रचोदिताः । न तु गृहदेवताः । नेत्युच्यते । गृहदेवता अपि शास्त्र-चोदिता भवन्ति । क्व । वास्तुविद्यायाम् । तदपि शास्त्रम्[4] । तत आगमय्य ताभ्यो बलिहरणं कर्तव्यम् । एवमपि नोपपद्यते । कथम् । वास्तुदेवताभ्य इत्यनन्यभावित्वाद् गृहदेवतानां नोभयोर्ग्रहणं स्यात् । यतस्तूभयोरारम्भः तेन ज्ञायते मन्त्रावेतौ न विधायकाविति । अग्निहोत्रदेवताभ्य इत्ययं तु विधायको न मन्त्रः । कस्मात् । अतुल्यत्वात् । अथात्र संशयः । का अत्र देवता विधीयन्त इति । अग्निहोत्रशब्दो[5] द्रव्ये कर्मणि च वर्तते । तत्र संशयः । किं द्रव्यदेवता गृह्यन्ते, उत कर्मदेवता इति । काः पुनर्द्रव्यदेवताः[6] । 'रौद्रं गवि सत्' (ऐ. ब्रा. ५. २६) इत्येवमाद्याः । ता न भवन्ति । कस्मात् । भाक्तत्वात् । एवं चेत् कर्मदेवताभिर्भवितव्यम् । तत्राग्निर्गृहपतिरित्येवमाद्या देवताः प्राप्नुवन्ति । नेत्युच्यते । कस्मात् ।

[1] एतदेव—A, D. [2] अपूर्वत्वाच्च—A, D. [3] शास्त्रदेवताः added in A, D. [4] शास्त्रान्तरम्—B. [5] अयं added in B. [6] इति added in A, C, D.

तासामनित्यत्वात् । काः पुनर्गृह्यन्ते । अग्निः सूर्यः प्रजापतिश्चेत्युभयत्र । कथं ज्ञायते । आसां श्रुतौ विहितत्वात् । आसां श्रुतौ संपदुपदेशत्वात्[1] । 'तस्य वा एतस्याग्निहोत्रस्य सप्त च शतानि विंशतिश्च संवत्सरे सायमाहुतयः । सप्त चो एव शतानि विंशतिश्च संवत्सरे प्रातराहुतयः' (ऐ० ब्रा० ५. २८) इति द्वे आहुती परिगृह्य श्रुतिः प्रवृत्ता । तस्माद् विधायकोऽयं न मन्त्रः । तत्र सोमाय वनस्पतय इति केचिदे-कामाहुतिमिच्छन्ति । केचिद् द्वे । किं कारणम् । वनस्पतेरुभयथा दृष्ट-त्वात् । प्रधानभूतश्च गुणभूतश्च । गुणभूतस्तावत् 'सोमो वनस्पतिः' (आ० श्रौ० ४. ११. ५) इति । प्रधानभूतस्तु 'पशुदेवताभ्यो वनस्पतिमनन्तरम्' (आ० श्रौ० ३. १. १२) इति । आगमस्तु एका-हुतिरिति । ब्रह्मणे स्वाहेति स्वाहाकारोऽनर्थकः, दोषवांश्चेति । को दोषः । एकाहुतित्वं प्रसज्येत । न चैकाहुतिः । कथं ज्ञायते । चतुर्थ्या विभक्त्या प्रतिदेवतमुपदेशादन्येषां स्वाहाकाराणां निवर्तकः स्यात् । कुतः पुनः स्वाहाकारप्राप्तिः । परिभाषासामर्थ्यात् । 'स्वाहाकारान्तैर्मन्त्रैः' (आ० श्रौ० १. ११. १०) इति । सिद्धे सति किमर्थं स्वाहाकार उपदिष्टः । उत्तरार्थम् । उत्तरत्र किं प्रयोजनम् । स्वाहेत्यथ बलिहरणमिति ।। १ ।।

[स्वाहेति] अथ बलिहरणम् ।। २ ।।

एताभ्यश्चैव देवताभ्योऽद्भ्य ओषधिवनस्पतिभ्यो गृहाय गृहदेवताभ्यो वास्तुदेवताभ्यः ।। इन्द्रायेन्द्रपुरुषेभ्यो यमाय यम-पुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यः सोमाय सोमपुरुषेभ्य इति प्रतिदिशम् ।। ३ ।।

[1] संप्रत्युपदेशत्वात् B; संपत्त्युपदेशत्वात्—A, C, D.

एताभ्यश्चेति चकारः समुच्चयार्थः । याश्च पूर्वोक्ता देवता याश्च वक्ष्यन्ते 'अद्भ्य ओषधिवनस्पतिभ्यः' इत्येवमाद्याः । तत्रैता देवताः पञ्चदश । एकेषां षोडश । एकादश पूर्वजनिताः[1] । एवकारः पौनर्वचनिकः । प्रतिदिशमिति । प्रतिदैवतम् । तत्र संशयः । किमष्टौ दिश उत चतस्र इति । उभयथाप्युपपद्यते । नेत्युच्यते । यत्रैव प्रधान-देवतास्तत्पुरुषैरपि तत्रैव भवितव्यम् । तेन चतस्र एव दिशः ।। ३ ।।

ब्रह्मणे ब्रह्मपुरुषेभ्य इति मध्ये ।। ४ ।।

कस्य मध्ये । दिग्देवतानां मध्ये ।। ४ ।।

विश्वेभ्यो देवेभ्यः ।। ५ ।।

मध्य एव ।। ५ ।।

सर्वेभ्यो भूतेभ्यो दिवाचारिभ्य इति दिवा ।। ६ ।।

मध्य एव ।। ६ ।।

नक्तंचारिभ्य इति नक्तम् ।। ७ ।।

दिवाचारिभ्य इत्येतस्य स्थाने[2] । दिवाग्रहणं न कर्तव्यम् । दिवाग्रहणेऽक्रियमाणे उभयत्र[3] स्याद् दिवाचारिभ्य इति । न भविष्यति । कस्मात् । यदुक्तं[4] नक्तंचारिभ्य इति नक्तमिति । तेन दिवाग्रहणं नैव[5] कर्तव्यम् । एवं तर्हि ज्ञापकं क्रियते । वैश्वदेवं प्रातरारम्भणं कथं स्यादिति । इतरथा हि सायंप्रातरुपदेशात्[6] सायमुपक्रमः स्यात् । अग्निहोत्रवत् ।

[1] A, C, D omit this sentence. [2] This sentence is found in B only. [3] दिवा added in A. [4] येनोक्तं—A, C, D. [5] A omits एव. [6] आदेशात्—A, C.

तच्चानिष्टम् । ततो दिवाग्रहणं क्रियते प्रातरारम्भणार्थम् । होमस्तु नैवम् । कस्मात् । तथा चोदितत्वात् ॥ ७ ॥

रक्षोभ्य इत्युत्तरतः ॥ ८ ॥

कस्योत्तरतः । सर्वासाम् ॥ ८ ॥

स्वधा पितृभ्य इति प्राचीनावीती शेषं दक्षिणा निनयेत् ॥ ९ ॥

प्राचीनावीतीति यज्ञोपवीतित्वनिवृत्त्यर्थम्[1] । अवचनात्तु[2] प्राचीनावीतित्वं न भविष्यति[3] । यथा—'दक्षिणस्यां दिशि मासाः पितरः' (आ० श्रौ० १. ११. ७) इति पत्नीवाचने यज्ञोपवीत्येव करोति । एवमिहापि स्यात् । तस्मात् प्राचीनावीतित्वं[4] विधीयते । निनयेदिति न वक्तव्यम् । यथान्यासां देवतानामनुच्यमानेऽपि[5] निनयनं भवत्येव तद्वदिहापि भविष्यति । नेत्युच्यते । निनयनग्रहणं क्रियान्तरज्ञापनार्थम् । क्रियान्तरत्वे सति को धर्मलाभः । बलिहरणमिदं न भवतीति ज्ञापितं भवति । किमेवं सिध्यति । स्वाहाकारोऽत्र न भवति । का पुनरत्र क्रियाभिप्रेता । पितृयज्ञः । अथ शेषग्रहणं क्रियते । किमर्थम् । अनन्तरज्ञापनार्थम् । क्रियान्तरत्वात् कालान्तरे स्यात् । यथा प्राक् कृतो यत्नो देवयज्ञादनन्तरं भूतयज्ञः कथं स्यादिति तत्राथशब्दः[6] प्रयुक्तः, एवमिहापि शेषग्रहणं क्रियते । अनन्तरज्ञापनार्थम्[7] । एवमुक्तं वैश्वदेवम् । अथ कस्मिन्नग्नौ[8] भवतीति संशयः । उच्यते । यस्मिन्कस्मिश्चिदग्नौ भवति ।

---

[1] यज्ञोपवीतनि°—A; यज्ञोपवीतिनि° B, C, D. [2] अवचनाच्च—B. [3] भवति—B, C, D. [4] प्राचीनावीतत्वं —A, B, D. [5] अपि omitted in A. [6] अत्राथशब्दः C, D; स्यादित्यथशब्दः A. [7] प्रज्ञापनार्थम्—C. [8] कस्मिश्चिदग्नौ—A.

कथं पुनरेतत् ज्ञायते । प्राग् विधानाद् विवाहाग्नेः । यदि तत्राभिप्रेतमभविष्यत् तमेव तावद् ब्रूयात् । यस्मादनुत्पाद्यैव[1] तमग्निं ब्रूते [2]तस्मादनियतोऽग्निः । तस्मादनुपेतभार्यः [3]पृथक्स्थालीपाकश्चेत् तेन यस्मिन्कस्मिंश्चिदग्नौ भवत्येवेति सिद्धम् । पाणिना वैश्वदेवं कर्तव्यम् । न पात्रान्तरेण । कस्मात् । शक्यत्वात् ।। ६ ।।

इति प्रथमे द्वितीया कण्डिका

अथ खलु यत्र क्व च होष्यन्त्स्यादिषुमात्रावरं सर्वतः स्थण्डिलमुपलिप्योल्लिख्य षळ्लेखा उदगायतां पश्चात् प्रागायते नानान्तयोस्तिस्रो मध्ये तदभ्युक्ष्याग्निं प्रतिष्ठाप्यान्वाधाय परिसमुह्य परिस्तीर्य पुरस्ताद् दक्षिणतः पश्चादुत्तरत इत्युदक्संस्थं तूष्णीं पर्युक्षणम् ।। १ ।।

कर्तव्यमिति वाक्यशेषः । सामर्थ्यात् । अथशब्दः किमर्थः । अधिकारार्थः । कथम् । इत उत्तराणि यानि कर्माणि वक्ष्यन्ते तेषामेव कथमयं होमविधिः स्यादिति । किं प्रयोजनम् । वैश्वदेवे मा भूदिति । खलुशब्दोऽपार्थकः। कस्मात् । शक्यत्वात् । [4]'मिताक्षरेष्वनर्थकाः'[5] (बृ० दे० २. ९०) इति वचनात् । यत्रक्वचग्रहणं कस्मात् । अथ खलु होष्यन् स्यादित्येवमुच्यमानेऽहरहर्होमविधिः प्रसज्येत । तेन यत्रक्वचग्रहणम्[6] । यत्र होमो विहितस्तत्रैव कथं स्यादिति । एवमपि यत्र होष्यन् स्यादित्येवं[7] वक्तव्यम् । क्वचग्रहणं नैव कर्तव्यम्[8] । उच्यते । कर्तव्यमेव । कस्मात् ।

---

[1] अनुक्त्वाद्यैव—A, C, D. [2] एतस्मात्—A. [3] स्थालीपाकश्च एतेन—A. [4] अमिताक्षरेषु—B. [5] अनर्थकाः—A, C, D. The full line in the *Bṛhaddevatā* reads: मिताक्षरेषु ग्रन्थेषु पूरणार्थास्त्वनर्थकाः । [6] ग्रहणेन—B. [7] एवं omitted in B. [8] वक्तव्यम्—A, C.

तन्त्रप्रतिषेधेऽपि कथं होष्यद्धर्माणां[1] प्राप्तिः स्यादिति । क्व पुनर्न प्राप्नुयुः । 'तस्याग्निहोत्रेण' (१. ६. ६) इत्युपदेशे तन्त्रप्रतिषेधः स्यात् । कस्मात् । कर्मान्तरव्यपदिष्टत्वाद् धर्माणाम् । तस्मात् क्वचग्रहणं कर्तव्यम् । किं सिद्धं भवति । परिस्तरणं परिसमूहनपर्युक्षणे च । अन्यदप्यर्थप्राप्तं भवति । इषुमात्रावरमिति । इषोर्मात्रा इषुमात्रा । इषुमात्रा मात्रा यस्य सोऽयमिषुमात्रः । अन्यतरस्य मात्राशब्दस्य लोपो द्रष्टव्यः । उष्ट्रमुखवत् । इषुमात्रा अवरा यस्य स्थण्डिलस्य सोऽयमिषुमात्रावरः स्थण्डिलः । तमिषुमात्रावरं स्थण्डिलमुपलिप्य । सर्वतः सर्वासु दिक्ष्वित्यर्थः । उल्लिख्य षळ्लेखाः । एवं षण्णां लेखानामनियमोल्लेखने प्राप्ते उत्तरमारभ्यते— उदगायतां पश्चात् । कस्य पश्चात् । अग्निप्रतिष्ठापनदेशस्य पश्चात् । प्रागायते नानान्तयोः । प्रागायते द्वे[2] लेखे उल्लिखति अन्तयोरधस्तादुक्ताया लेखायाः । नानाग्रहणमसंसर्गार्थम् उत्तरार्थं च । तिस्रो मध्य इति । तिस्रो लेखा उल्लिखति मध्ये । प्रागायते इत्यनुवर्तते । अथ षड्ग्रहणं कस्मात् । संबन्धकरणार्थम् । [3]कथं षण्णामप्युपरिष्टादग्नेः प्रतिष्ठापनं स्यादिति । तदभ्युक्ष्य । तत् [4]स्थण्डिलमभ्युक्षति । उपर्युक्षणमभ्युक्षणं भवति । अग्निं प्रतिष्ठाप्येति । होमसमर्थोऽग्निः प्रतिष्ठापयितव्यः । अन्वाधायेति । अन्वाधानं[5] करोति । कर्माङ्गत्वेन चोद्यते । परिसमुह्येति । परिसमूहनं करोति । परिस्तीर्येति । सर्वतः स्तरणं परिस्तरणम् । तत्र कुशैः परिस्तरणं कर्तव्यम् । अथ केन क्रमेण परिस्तरणं कर्तव्यम् । पुरस्ताद् दक्षिणतः पश्चादुत्तरत इत्युदक्संस्थम् । उदीच्यां दिशि यत् संतिष्ठते तदुदक्संस्थम् । उदक्संस्थवचनं न कर्तव्यम् । कस्मात् । सिद्धत्वात् । तत्तु विधीयते । कथमेकैकस्यां दिशि उदक्संस्थता स्यादिति । तूष्णीं पर्युक्षणम् । तूष्णीममन्त्रकमित्यर्थः[6] । तूष्णीमिति न वक्तव्यम् । कस्मात् । मन्त्रानुपदेशात् ।

---

[1] होष्यधर्माणां—A, D. [2] द्वे omitted in A, C, D. [3] कथं omitted in A, B. [4] स्थलम्—A, C, D. [5] अन्वभ्याधानं—B. [6] A, C, D omit this.

पर्युक्षणचोदनायां प्रसज्यते मन्त्रः। कस्मात्। गुणभूतत्वान्मन्त्रस्य। न प्रसज्यते। अतत्प्रकृतित्वात्[1]। [2]तस्मात् तूष्णीमिति न वक्तव्यमुच्यते। तत्र प्रयोजनेन भाव्यम्। तत्राप्राप्तस्य मन्त्रस्य प्रतिषेधं कुर्वन् ज्ञापयति। अन्ये पर्युक्षणधर्माः कथं प्रसज्येरन्निति। के पुनस्ते धर्माः। पुनः पुनरुदकादानं त्रिश्चाद्यन्तयोः करणं परिसमूहनपूर्वकत्वं च। एवं पुनः पूर्वं परिसमूहनं न विधेयम्। व्यवधानार्थं तद् विधीयते[3]। कथं परिसमूहनस्य पर्युक्षणस्य च मध्ये परिस्तरणं स्यादिति ॥ १ ॥

पवित्राभ्यामाज्यस्योत्पवनम् ॥ २ ॥

कर्तव्यमिति शेषः। तत्राज्यार्थं सर्पिराज्यशब्देनोच्यते ॥ २ ॥ अथ किंलक्षणे पवित्रे भवतः। कथं वोत्पवनं कर्तव्यम्। अत उत्तरसूत्रमारभ्यते—

अप्रच्छिन्नाग्रावनन्तर्गर्भौ प्रादेशमात्रौ कुशौ नानान्तयोर्गृहीत्वाङ्गुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्यां 'सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः' इति प्रागुत्पुनाति सकृन्मन्त्रेण द्विस्तूष्णीम् ॥ ३ ॥

अच्छिन्नाग्राविति वक्तव्ये प्रशब्दो न वक्तव्यः। कस्मात्[4]। प्रशब्दः प्रकर्षवाची। सूक्ष्मच्छिन्नाग्रौ गृह्येयातामिति। अन्यथा हि नैवं लभ्येयाताम्। तस्मात् प्रशब्दः कर्तव्यः। अनन्तर्गर्भौ अन्तर्ययोर्गर्भौ न स्तः ताविमावनन्तर्गर्भावित्युच्येते। प्रादेशमात्राविति परिमाणवचनम्[5]।

---

[1] अतत्प्रकृतत्वात्—A; अतः प्रकृतित्वात्—B. [2] तस्मात् omitted in A, C, D. [3] विधेयम्—A. [4] तस्मात्—B. [5] परिमाणवचनः—A, C.

कुशाविति द्रव्यनिर्देशः । तौ कुशावेवंलक्षणकौ । नानान्तयोर्गृहीत्वा । नानाग्रहणं पृथग् ग्रहणार्थम् । अथवा असंहितार्थं स्यात् । असंबद्धावित्युक्तं भवति । उपपद्यते चायमर्थः । कस्मात् । नानाशब्दस्य पृथग्वाचित्वात् । अङ्गुष्ठोपकनिष्ठिकाभ्यां ग्रहणं भवति । तत्रोपकनिष्ठिकेति । कनिष्ठिकाया अनन्तरं या वर्ततेऽङ्गुलिः[1] सोपकनिष्ठिकेत्युच्यते । लोके[2] प्रसिद्धा च । उत्तानाभ्यां पाणिभ्यामिति नियमः । सवितुष्ट्वेत्यनेन मन्त्रेण । प्रागुत्पुनातीति व्याख्यानकाले पाठः कर्तव्यः । प्राङुत्पुनातीत्येतस्मिन् पाठे कर्तुः प्राङ्मुखत्वप्राप्तिः । तच्चानिष्टं स्यात् । कस्मात् । विहितत्वात् 'तस्य नित्याः' (आ० श्रौ० १. १. ८) इति । तेन क्रियायाः प्राक्त्वं विधीयते । ननु चैतदपि सिद्धम् । बाढं सिद्धम् । इह शास्त्रान्तरे प्राक् प्रत्यक् चोत्पवनं दृष्टम्[3] । तन्निवृत्त्यर्थं व्याख्यानकाले त्वयं पाठो न्याय्यः । एवं गते येऽन्ये शास्त्रान्तरदृष्टा[4] विधयोऽविरोधिनस्तेषामपीहेच्छातः[5] क्रिया सिद्धा । तस्मात् प्रागुत्पुनातीत्ययं पाठः क्रियते । 'सर्वत्रैवं कर्मावृत्तौ' (आ० श्रौ० १. ४. २९) इति सिद्धे सकृन्मन्त्रेणेति किमर्थमारभ्यते । त्रिग्रहणे सति सा परिभाषा भवति । इह च त्रिग्रहणं नास्ति । एवं चेत् त्रिग्रहणमेवास्तु प्रागुत्पुनाति त्रिरिति । एवं सिद्धे सति यदारभ्यते तस्य प्रयोजनमुच्यते । कथम् । एषा[6] परिभाषा इह कथं न स्यादिति । तत्र किं सिद्धम् । यावत्कर्माभ्यासो वर्तते तावन्मन्त्रो यथा स्यादिति । किमुदाहरणम् । 'प्रदक्षिणं शिरस्त्रिरुन्दति' (१. १७. ७) । तथा—'त्रिस्तेजसा मा समनज्मि' (१. २१. ३) इति च । किमर्थं पुनर्योग[7] आरभ्यते । अधिकारार्थम् । अधिकृतस्यैवाज्यस्योत्पवनं[8] कथं स्यादिति । यद्येवमिहैवाज्यग्रहणमस्तु । प्रागाज्यमुत्पुनातीति । एवमपि

---

[1] अङ्गुलिः omitted in A, D. [2] लोकप्रसिद्धा—A, C. [3] प्रत्यक् च वचनं दृष्टं प्रत्यङ च—A; प्राक्चोत्पवनं दृष्टं प्रत्यङ च—C; प्राक्प्रत्यगुत्पवनं दृष्टम्—B. [4] येऽन्यशास्त्रदृष्टाः—A, D. [5] इच्छतः—D. [6] एवं—A, C, D. [7] योगद्वयम्—B. [8] अधिकृतस्याज्यस्यैवोत्पवनं—A, C, D.

पवित्रार्थमवश्यमारब्धव्यम् । तयोः संज्ञा क्रियते कथमनयोः कुशयोः पवित्रे[1] इत्येषा संज्ञा स्यदिति । संज्ञायाः[2] किं प्रयोजनम् । 'चतुरश्चतुरो मुष्टीन् निर्वपति पवित्रे अन्तर्धाय' (१. १०. ६) इति, 'दक्षिणोत्तरौ पाणी संधाय पवित्रवन्तौ' (४. २. २) इति । एवं पवित्रशब्द इहैव कर्तव्यः । प्रादेशमात्रौ कुशौ पवित्रे इति । एवं सति द्विरुत्पवनक्रिया चोदिता न[3] भवति । एवं सिद्धे यत् पृथग्योगः क्रियते तद् द्वैविध्यं दर्शयति । एवं सति किं सिद्धं[4] भवति । विकल्पः । किं सर्वत्र । नेत्युच्यते । [5]विनिविष्टविषयावेतौ विधी मन्तव्यौ । तत्र योऽयं समन्त्रको विधिः स प्रकरणे कृतार्थो भवति । कस्मात् । परिसमाप्तार्थत्वात्[6] । पर्याप्तधर्मश्च विधिः प्रकरण एव भवति । अथान्यः[7] प्रकरणान्तरे विधीयते[8] । यथा नवनीतस्योत्पवनं विधीयते । तथा[9] 'चतुर्गृहीतमाज्यं जुहुयात्' (आ० श्रौ० २. ५. १४, ३. १२. ३) इत्येवमादिषु । तस्मादेतत् प्रयोजनं पृथग्योगेन ॥ ३ ॥

कृताकृतमाज्यहोमेषु परिस्तरणम् ॥ ४ ॥

कृताकृतशब्दोऽयमीषदर्थे वर्तते, यथा लोके ईषद्भुक्त इत्युक्ते कृताकृतं भोजनमिति । अत्र तु भवति वा न वेत्येतस्मिन्नर्थे द्रष्टव्यः । 'कृताकृतावाज्यभागावावाहने' (आ० श्रौ० ३. १. १२) इत्यत्र[10] । के पुनराज्यहोमाः । किं येष्वाज्यमेव[11] विहितम्, आहोस्विदाज्यं चान्यच्च द्रव्यमिति । उच्यते । येष्वाज्यमेव[12] । इतरथा हि विशेषोऽपार्थकः स्यात् । तस्माद् येषु नान्यद् द्रव्यं विद्यते, आज्यमेव विद्यते तेषु परिस्तरणं

---

[1] पवित्रम्—A. [2] संज्ञया—B. [3] न—omitted in A, C. [4] साधितं—B. [5] निविष्ट—A; निर्विष्ट—B. [6] परिसमाप्त्यर्थत्वात्—A, D. [7] अन्यत्—A. [8] यथा न भवति—D. [9] तत्र—A, C, D. [10] कृतावाज्यभागावित्यत्र—A. [11] येषाम्—A. [12] येषाम्—B.

कृताकृतम् । एवमपि यत्राज्य चोद्यते तत्रैव कृताकृतं भवति । यत्र न चोद्यते तत्र न भवति । किमाज्यहोमेष्विति । अविशेषात् सर्वाज्यहोमेषु प्राप्नोति । नेत्युच्यते । कस्मात् । यदि सर्वत्र स्यात् तत्र तत्राज्यग्रहणमपार्थकं स्यात् । तेन तत्र तत्राज्यग्रहणप्रयोजनमेतदेव कथं कृताकृतत्वं परिस्तरणस्य स्यादिति ।। ४ ।।

तथाज्यभागौ पाकयज्ञेषु ।। ५ ।।

तथाशब्दः प्रकारवाची । तेन प्रकारेण कृताकृतावित्यर्थः । आज्यभागौ पाकयज्ञेषु भवतो न वा । तत्रैके पाकयज्ञग्रहणप्रयोजनं[1] वर्णयन्ति—अन्ये पाकयज्ञा अन्ये आज्यहोमा इति । येषामन्यत्वं तेषामुक्तो दोषः । तन्त्रं न प्राप्नोत्याज्यहोमेषु । अथ किमर्थं पाकयज्ञग्रहणम् । आज्यहोमाधिकारनिवृत्त्यर्थम् ।। ५ ।।

ब्रह्मा च धन्वन्तरियज्ञशूलगववर्जम् ।। ६ ।।

तथेत्यनुवर्तते । ब्रह्मा चानित्यो भवति । किं सर्वत्रानित्यो भवति । नेत्युच्यते । धन्वन्तरियज्ञशूलगववर्जम् । अन्यत्रानियमो[2] भवति । तत्र संशयः । धन्वन्तरियज्ञे शूलगवे च किं ब्रह्मा नैव[3] भवत्याहोस्विन्नित्य एवेति । ब्रवीति । नित्य एव ब्रह्मा तयोः । कथं गम्यते । दर्शनात् । 'ब्रह्माणमग्निं चान्तरा' (१. १२. ६) इति, तथा 'वैद्यं चरित्रवन्तं ब्रह्माणमुपवेश्य' (४. ९. १४) इति च । यदि तर्हि दर्शनात् प्रवृत्तिः प्रतिषेधोऽपार्थकः । नेत्युच्यते । यदि तर्हि प्रतिषेधो न

---

[1] A omits ग्रहण. [2] अनित्यो—A, C, D. [3] धन्वन्तरियज्ञे ब्रह्मा न—A, C, D.

क्रियते, अनयोरपि विकल्पः स्यादिति । न भविष्यति । दर्शनात् । नेत्युच्यते । दर्शनं कृतपक्षे कृतार्थं स्यात् । तस्मादुक्तः प्रतिषेधः । अत्र त्वेतत् संदिह्यते । परिस्तरणादीनां किं युगपत्क्रिया, अक्रिया वेति । आहोस्विदिच्छातो विकल्प इति । अन्यत् क्रियते, अन्यन्न क्रियत इति ब्रवीति । अतो[1] विकल्प इति । कथं ज्ञायते । शूलगवे ब्रह्मणो विकल्पप्रतिषेधात्[2] । तत्र हि नित्यं परिस्तरणम् । यद्ययमभिप्रायः स्याद्युगपत्क्रिया अक्रिया वेति तत्र परिस्तरणस्य नित्यत्वात् स्वयमेव[3] ब्रह्मणो नित्यत्वम् । एवं सति प्रतिषेधोऽपार्थकः । प्रतिषेधात् तु गम्यतेऽयमर्थः । परिस्तरणाज्यभागयोर्ब्रह्मणश्चान्यतरक्रिया अक्रिया वेति सिद्धम् ॥ ६ ॥

अमुष्मै स्वाहेति जुहुयात् ॥ ७ ॥

अमुष्मा इति सर्वनामनिर्देशः । अस्य स्थाने कथं देवतादेशः स्यात् । स्वाहेति स्वाहाकारान्ततात्र[4] विधीयते । किमर्थं पुनरिदमारभ्यते । स्वाहाकारप्राप्त्यर्थम् । ननु स्वाहाकारः प्राप्तः परिभाषासामर्थ्यात्— 'स्वाहाकारान्तैर्मन्त्रैः' (आ० श्रौ० १. ११. १०) इति । एवं तर्हि चतुर्थ्युपदेशार्थम् । तथापि न वक्तव्यम्[5] । लक्षणप्रसिद्धौ स्वाहाकारसंयोगे चतुर्थी विभक्तिराम्नाता–'नमःस्वस्तिस्वाहा–' (पाणिनि० २. ३. १६) इत्येवमादिषु । एवं तर्हि ऋङ्‌निवृत्त्यर्थम् । 'अथ काम्यानां स्थाने' (३. ६. १) इत्यत्र देवतानां न ऋच उपदिष्टाः । तत्र संदिह्यते । किं तद्देवताभिः ऋग्भिर्होमोऽस्तु उत देवतादेशेनेति । तथा 'प्राजापत्यस्य स्थालीपाकस्य' (१. १३. ८) इत्यत्र । कुतः पुनः संशयः । उभयथा दृष्टत्वात् । तद्देवत्यैश्च मन्त्रैर्होमो दृष्टः[6] । 'अग्ने नय सुपथा राये अस्मान्'

---

[1] अन्यतो—A, D.　[2] अविकल्पितत्वात् तत्र प्रतिषेधात्—A, D.
[3] असंशयमेव—B.　[4] स्वाहाकारस्तत्र—A, C, D.　[5] तथा च न वक्तव्यम्—A, C, D.　[6] तद्देवत्यैर्मन्त्रैश्च होमो दृष्टः—A, D.

(२. १. ४; २. ४. १४) इत्यत्र ऋग्भिर्होमो दृष्टः । तथा देवतापदैः—'सावित्र्यै ब्रह्मणे' (३. ५. ४) इत्येवमाद्यैः । तेन यत्र मन्त्रो नोपदिश्यते देवतादेशो वा तत्र विकल्पः प्राप्नोति । तत्र किमुदाहरणम् । 'अथ काम्यानां स्थाने' (३. ६. १) इति । तन्निवृत्त्यर्थम् अमुष्मै स्वाहेति जुहुयादित्यारभ्यते ॥ ७ ॥

अग्निरिन्द्रः प्रजापतिर्विश्वे देवा ब्रह्मेत्यनादेशे ॥ ८ ॥

न आदेशः अनादेशः तस्मिन् । देवतानादेशे एता देवताः । अग्निरिन्द्र इत्येवमादिभ्यो देवताभ्यो होमः कर्तव्यः । कानि पुनरुदाहरणानि । जातकर्मान्नप्राशनमित्येवमादीनि । यद्यनादेशवचने प्रयोजनमेतद् एवं सत्यहरहःक्रिया प्रसज्येत । न भविष्यति । कस्मात् । अनादेशवचनस्य सापेक्षत्वात् । किमपेक्षते । आदेशमेव कर्मणाम् । कर्मणां यत्रादेशोऽस्ति न होमश्चोद्यते तत्रैता देवता भवन्ति । एवं सति दोषः । 'रथमारोक्ष्यन्' (२. ६. १) इत्येवमादिष्वपि होमः प्रसज्येत । तत्रापि कर्म दृश्यते न होमः । तस्मादनादेशवचने एवंकल्प्यमाने दोषः प्रसज्यते । दोषभयान्नायमर्थः । अथ कः पुनरर्थः । अनादेशवचने मन्त्रानादेशे । यत्र होमश्चोद्यते न मन्त्रः तत्रैताभ्यो देवताभ्यो होमः कर्तव्यः । कथमेतद् गमिष्यते —यथा मन्त्रानादेशे आभ्यो देवताभ्यो होमः कर्तव्य इति, न होमानादेश इति । तत्र होमानादेशे प्रतीयमाने उक्तो दोषः । किंच मन्त्राधिकारश्चायं न होमाधिकारः । तस्माद् यत्र होमश्चोद्यते न मन्त्रः, तत्रैताभ्यो देवताभ्यो होमः कर्तव्यः । एवं सति किमुदाहरणम् । चैत्ययज्ञः । तत्र होमश्चोद्यते न मन्त्रः । तदपि नोपपद्यते । कस्मात् । एता देवता आज्येनेज्यन्ते । तत्र चाज्यं स्थालीपाकः पशुर्वा भवतीति व्याख्यास्यते । अतश्च तत्र चैत्य एव देवता भवति । इमानि तर्ह्युदाहरणानि । 'चौळकर्मोपनयनगोदानविवाहाः' (१. ४. १) इति । ननु च तत्र मन्त्रा आदिष्टा इति । 'नैके कांचन' (१. ४. ६) इति पक्षेण प्रतिषिद्धास्ते मन्त्राः । पक्षेण तत्रैताभ्यो

होमः कर्तव्यः। तस्माद् यत्र मन्त्रो नोपदिश्यते होमश्चोद्यते तत्रैता देवताः प्राप्नुवन्तीत्येतत् सिद्धम् ॥ ८ ॥

एकबर्हिरिध्माज्यस्विष्टकृतः स्युस्तुल्यकालाः ॥ ९ ॥

बर्हिश्च इध्मश्च आज्यं च स्विष्टकृच्च बर्हिरिध्माज्यस्विष्टकृत्[1]। एकं बर्हिरिध्माज्यस्विष्टकृद् येषां ते एते एकबर्हिरिध्माज्यस्विष्टकृतः। एकं समानमित्यर्थः। स्युर्भवेयुरित्यर्थः। तुल्यकालाः [2]समानकाला इत्यर्थः। पाकयज्ञाः क्व पुनः [2]समानकाला भवन्ति। आश्वयुजीकर्माग्रयणं च। नेत्युच्यते। आग्रयणस्य नासौ कालो नियतः। तस्मादतुल्यकालत्वान्नेतदुदाहरणम्। इदमन्यत्—यदा पौर्णमास्यां रात्रौ काम उत्पद्यते[3] तदा [4]काम्यस्य च पार्वणस्य च तुल्यकालत्वम्। प्रकृतिविकृत्योः संनिपाते दर्शपूर्णमासौ बलीयांसौ। अथवा 'सर्व एवाभिषिक्तस्य प्रत्युद्धारः पुत्रजन्मना व्याख्यातः' (वासिष्ठधर्मसू० १५. २१) इत्येवं तुल्यकाला इति। अथवा पूर्वोक्तमप्युदाहरणं भवति। कथम्। आग्रयणस्य कर्तुरिच्छातः शरदि प्रवृत्तिः। आश्वयुजीकर्मापि शरदि भवति। तस्मादेतदप्युदाहरणमुपपन्नम्। बर्हिरादीनां पाठो निदर्शनार्थ इति। तेन किं सिद्धं भवति। परिस्तरणपरिसमूहनादीनामपि सकृत् क्रिया सिद्धा भवति ॥ ९ ॥

तदेषाभि यज्ञगाथा गीयते ॥ १० ॥

तदेतत् पाकयज्ञानां समानकालविधानार्थं प्रति यज्ञगाथा गीयते। यज्ञार्था[5] गाथा यज्ञगाथा ॥ १० ॥

---

[1] स्विष्टकृतः—A, D. [2] समकालाः—B. [3] कामा उत्पद्यन्ते—A, C, D. [4] कामस्य—D. [5] यज्ञार्थं—A, C, D.

यज्ञगाथोदाह्रियते—

‘पाकयज्ञान् समासाद्य एकाज्यानेकबर्हिषः ।
एकस्विष्टकृतः कुर्यान्नानापि सति दैवते’ इति ॥ ११ ॥

तत्र यज्ञगाथाप्रयोजनं नानापि सति दैवत इति । नानादेवतेष्वपि समानदेवतेष्वपि पाकयज्ञेषु तुल्यकालेष्वेतद्विधानं[1] भवति । इतरथा हि समानदेवतेषु प्रधानाहुतयोऽपि तन्त्रेण क्रियेरन् । कथम् । बर्हिराज्यादीनां [2]निदर्शनार्थत्वात् तन्त्रेण क्रिया प्रसज्येत । तेन यज्ञगाथोदाह्रियते । कथं बर्हिरादीनामेव तन्त्रत्वं स्यात्, प्रधानाहुतीनां मा भूदिति । अतो यज्ञगाथोदाहरणं क्रियते ॥ ११ ॥

इति प्रथमे तृतीया कण्डिका

उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौळकर्मोपनयनगोदानविवाहाः ॥ १ ॥

उदगयन इति । उदग् यदा गच्छत्यादित्यः तदुदगयनं भवति । तस्मिन् उदगयने । कुत एतत् । अन्येऽपि ग्रहा उदग् गच्छन्त्येव । आदित्य उदग् गच्छतीति प्रसिद्धत्वाल्लोके । आपूर्यमाणपक्ष इति । आपूर्यमाणस्य पक्षः आपूर्यमाणपक्षः । कस्यापूर्यमाणस्य पक्ष[3] इति । चन्द्रमस इत्युच्यते । एवं सत्यर्थो नोपपद्यते । कथम् । मासस्य हि[4] पक्षो न चन्द्रमसः । तस्मादर्थानुपपत्तिः । अयमन्यो विग्रहः—आपूर्यमाणश्चन्द्रमा यस्मिन् पक्षे इत्येवमस्तु । एवं विग्रहे क्रियमाणे समासो नोपपद्यते । कस्मात् । अन्यपदार्थप्रधानत्वाद् वहुव्रीहिसमासस्य । आपूर्यमाणश्वन्द्रमा इत्येवं

---

[1] तुल्यकालेष्वप्येतद्विधानं—A, C, D. [2] प्रदर्शनार्थत्वात्—A, C, D.
[3] पक्ष—omitted in B. [4] हि—omitted in A, C, D.

भवतु । तस्मादन्यथा विग्रहः । आपूर्यमाणश्चासौ पक्षश्चेति । एवमस्तु । एवमुभयमुपपद्यते अर्थश्च समासश्च । केन पुनरापूर्यते पक्षः । शुक्लेन ज्योतिषाहरहः । अथवा पूर्वो विग्रह उपपद्यते । कथम् । स हि मासानामर्धमासानां च कर्ता यस्मात् तस्माच्चन्द्रमसोऽपि पक्ष उपपद्यते । तस्मिन्नापूर्यमाणपक्षे । कल्याणे नक्षत्रे । कल्याणमिति प्रशस्तं [1]शास्त्रसिद्धमित्यर्थः । तस्मिन् कल्याणे नक्षत्रे । एवमेतैर्युक्तायां तिथौ चौळादीनि कर्माणि भवन्ति । अथ कर्मग्रहणं किमर्थम् । सर्वकर्मणां प्रवृत्त्यर्थम् । क्व । उदगयने । यदि[2] कर्मग्रहणस्यायमर्थः चौळादीनां पृथग् ग्रहणमपार्थकम् । कस्मात् । तेषामपि कर्मग्रहणेनैव ग्रहणं भविष्यति । उच्यते । चौळादीनां ग्रहणं कर्तव्यमेव । किं कारणम् । वक्ष्यति—'तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयात्' (१. ४. ३) इति । कथमेता आहुतयो विधीयमानाश्चौळादीनामेव स्युरिति । अत एतेषां ग्रहणम् । अथवा कर्मग्रहणं चौळार्थमेव चौळकर्मेति । ननु च 'तृतीये वर्षे चौळम्' (१. १७. १) इति तत्र कर्मग्रहणं नास्ति । एकदेशग्रहणं तद्[3] द्रष्टव्यम् । अयमेव सुतरामर्थ उपपद्यते । एवं चेद् व्रतादेशनेऽयं कालो[4] न प्राप्नोति । कस्मात् । अग्रहणात् । उच्यते । प्राप्यते । कुतः । 'एतेन वापनादि' (१. २२. २०) इति व्यपदेशात् । यदि तर्हि व्यपदेशेन कालोऽपि प्राप्नोति । एवं तर्हि गोदानग्रहणमपार्थकम् । चौळकर्मव्यपदेशात् । 'एतेन गोदानम् । षोडशे वर्षे' (१. १८. १) इति । सत्यमेतत् । गोदानव्यपदेशात् कालः सिध्यति । नात्र गोदानार्थं ग्रहणम् । किमर्थं तर्हि । यत्र गोदानगन्धः[5] स्वल्पोऽप्यस्ति तत्रापि कथमयं कालः स्यादिति । अतो गोदानग्रहणं कृतम् । यथा—'गौदानिकं कर्म कुर्वीत' (३. ८. १०) इत्यत्र । ननु च तत्रापीदं कर्म

---

[1] शास्त्रात् सिद्धम्—A, C, D. [2] यदि omitted in A, D. [3] तु—A, D. [4] अयं कालः omitted in A, D. [5] गन्धः omitted in B.

प्रसज्यते । तेन यथादिष्टं यस्मिंश्च काले तत् सर्वं भविष्यति । यत्नादृते तत्र कालो न प्राप्नोति । कस्मात् । तत्र 'गौदानिकं कर्म कुर्वीत' (३. ८. १०) इति कर्मग्रहणात् कालो न प्राप्नोति । 'आचार्यसकाशे वाचं विसृजीत' (१. १८. ६) इत्येवमादिर्यथा न भवति कर्मग्रहणात् । एवं कालोऽपि न प्राप्नुयात् तत्र । तेनायं यत्नः क्रियते । यदि समावर्तनार्थं तस्यैव ग्रहणं कर्तव्यम् । एवं तर्हि लाघवार्थं गोदानग्रहणम् ।। १ ।।

सार्वकालमेके विवाहम् ।। २ ।।

एके आचार्याः सर्वस्मिन् काले विवाहमिच्छन्ति । किं पुनः कारणम् । यदासावतिवयाः स्यात् काल उदीक्ष्यमाणे दोष उपजायते । को दोषः । 'ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति' (मनु. ९. ८९) [?] इति । अन्ये च लौकिका दोषा विद्यन्ते विग्रहादयः । एवमेतैरन्यैश्च कारणैः कालानियमो नाकस्मात् ।। २ ।।

तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयात् ।। ३ ।।

तेषामिति चौळादीनां ग्रहणं स्वयमेव भविष्यति । तेषामेवाधिकारः । तस्मात् तेषामिति न वक्तव्यम् । अनन्तरो विवाहोऽधिकृतः । तन्निवृत्त्यर्थं तेषामित्युच्यते । तन्नोपपद्यते । दर्शयिष्यति । यथा सर्वेषामेवैता आहुतयो भवन्तीति । 'विवाहे चतुर्थी' (१. ४. ८) इति विवाहग्रहणं करोति । तेन सर्वत्रैता आहुतयो भवन्तीति सिद्धम् । तेषामिति न वक्तव्यमेवेति । तत्रैके तेषां पुरस्तादिति पुरस्ताद्धोमा एते भवन्तीति । एवं संप्रतिपन्नाः प्राच्याः । यद्येवं तेषांग्रहणमपार्थकमेव । पुरस्तादित्येव पुरस्ताद्धोमः सिद्धः । अपर आहुः– तेषांग्रहणं पुरस्ताद्धोमनिवृत्त्यर्थम् । तेषामेव चौळकर्मादीनामेता आहुतयो भवन्तीति । न पुरस्ताद् भवन्तीति ।

---

1 यस्मिन् काले—A, D.

एतस्मिन् पक्षे[1] पुरस्ताद्ग्रहणमपार्थकम् । नापार्थकम् । प्रयोजनमुत्तरत्र वक्ष्यामः ॥ ३ ॥

तत्र चतस्र आज्याहुतीरिति चतस्रग्रहणमपार्थकम् । चतस्र एवैता भविष्यन्ति—

'अग्न आयूंषि पवसे' (ऋ० सं० ९. ६६. १९) इति तिसृभिः 'प्रजापते न त्वदेतान्यन्यः' (ऋ० सं० १०. १२१. १०) इति च ॥ ४ ॥

तस्मादुपदेशादेव चतस्र आहुतयो भविष्यन्ति । 'स्वाहाकारान्तैर्मन्त्रैः' (आ. श्रौ. १. ११. १०) इति प्रत्यृचं मन्त्रसमाप्तिर्भविष्यति । ब्रवीति च । एवं सिद्धे[2]यच्चतस्रग्रहणं करोति तद् दर्शयति—अन्यत्र प्रत्यादेशं होमो भवतीति । 'धाता ददातु दाशुष इति द्वाभ्याम्' (१. १४. ३) इत्येवमादिषु । कथं पुनश्चैतद् गम्यते प्रत्यादेशं होमो भवतीति । येन क्वचिद् यत्नं करोति प्रत्यृचमिति । तेन यत्र यत्नोऽस्ति तत्र प्रत्यादेशं होमो भवतीत्येतत् सिद्धम् । एवमेके । अन्ये पुनर्नैवमिति मन्यन्ते । कथं तर्हि । प्रत्यृचमेव होमः सर्वत्र । कस्मात् । स्वाहाकारान्तैर्मन्त्रैरिति ऋगन्ते स्वाहाकारो भवतीति । स्वाहाकारस्य प्रदानार्थत्वात् । न च स्वाहाकारमतिक्रम्य द्वितीयो मन्त्रो वक्तव्य इति । एकस्यां च क्रियायामनेको मन्त्रो (न) वक्तव्य इत्ययमेव न्याय्यो[3] विद्यमानायां गताविति । तस्मात् प्रत्यृचं[4] होमो भवतीति । ननु चतस्रग्रहणमपार्थकम्, प्रत्यृचग्रहणानि वा । उच्यते । सर्वाणि प्रयोजनवन्ति भवन्ति । तत्र चतस्रग्रहणे प्रयोजनं चतस्र एव स्युर्न भूयस्य इति । कथं पुनर्भूयस्यः प्राप्नुवन्ति । समुच्चयमेक इति वचनादष्टावाहुतयः प्राप्नुवन्ति । तत्रापि कथं चतस्र एव

---

[1] एतस्मिन्नप्यर्थे—A, C, D. [2] ब्रवीष्येव सिद्धे—A, D.
[3] अयमुपन्यासः—B. [4] प्रत्यृचमेव सर्वत्र—B.

स्युरिति। एतदर्थं नियमः क्रियते। एवं सति समुच्चयो नोपपद्यते इति। मन्त्रेषु समुच्चयमुपपादयिष्यति। कथं प्रयोगः कर्तव्यः। ऋगन्ते व्याहृतिः व्याहृत्यन्ते स्वाहाकार इति। तदेतत् प्रयोजनं नोपपद्यते। मन्त्राणां समुच्चयश्च नोपपद्यते। आहुत्यधिकारात्। तेनाहुतीनामेव समुच्चयः कर्तव्यो न मन्त्राणामिति। तेनाष्टावेवैता आहुतयः। एताः समुच्चयपक्षे भवन्ति। ननु चैवं वर्ण्यमाने नियमोऽपार्थकः। अन्यदेव नियमप्रयोजनम्। चतस्र एव कथं नाधिकाः स्युरिति। कथं वाधिकत्वं प्राप्नोति। आज्यभागयोर्विकल्पेन क्रिया प्राप्नोति। तत्र कथं पक्षेणापि तयोः क्रिया न स्यादित्यतो नियमः क्रियते। नियमे सति दोषः प्रसज्यते। स्विष्टकृदपि न प्राप्नोति। नैष दोषो भविष्यति स्विष्टकृतः। कस्मात्। पुरस्ताद्ग्रहणात्। पुरस्ताद्ग्रहणं ह्यत एव कृतम्। पुरस्तान्नियमः कथं स्यादुपरिष्टान्मा भूदिति। आज्यग्रहणं किमर्थम्। द्रव्यनिर्देशार्थमुच्यते। द्रव्यनिर्देशार्थं चेन्न वक्तव्यम्। अनादिष्टद्रव्यके ह्याज्यमेव दर्शयति— 'आज्यशेषेण वानक्ति हृदये' (१. ८. १०) इति। तेनाज्यं प्रतीयते सर्वहोमेषु। अन्यार्थमिहाज्यग्रहणम्। किमर्थं तर्हि। आज्यहोम-प्राप्त्यर्थम्। आज्यहोमे सति कृताकृतमेतेषु परिस्तरणं यथा स्यादित्येतत् प्रयोजनम् ॥ ४ ॥

व्याहृतिभिर्वा ॥ ५ ॥

व्याहृतिभिर्वा चतसृभिर्होमः कर्तव्यः। कुत एतत्। यथा चतस्रो व्याहृतयो भवन्तीति। परिभाषासामर्थ्यात्। 'व्याहृतिभिश्च' (आ० श्रौ० १. ११. १३) इत्युक्त्वा [1]पुनर्व्याहृतय उपदिश्यन्ते—'भूःस्वाहा' इत्येवमाद्याः। तत्र चतसृणामेव व्याहृतीनां प्रत्येकमुपदेशं करोति। एवं प्रत्यक्षोपदेशात् व्याहृतिग्रहणमपार्थकम्। तत्रेदं प्रयोजनम्। कथम्।

[1] पुरस्तात्—B

यत्र यत्र व्याहृतीनां [1]प्रत्येकमुपदेशः स्यात् तत्र तत्र चतस्रो गृह्येरन्निति । अविशिष्टेन व्याहृतिग्रहणेन चतस्रो[2] गृह्यन्ते । तस्मादिह चतस्रो व्याहृतयः सिद्धा भवन्ति ॥ ५ ॥

समुच्चयमेके ॥ ६ ॥

एके आचार्याः समुच्चयमिच्छन्ति । व्याहृतीनां पूर्वोक्तानां चाहुतीनां समुच्चयमिच्छन्ति । तत्र आहुतीनां समुच्चयो भवतीति कथमेतज्ज्ञायते । आहुत्यधिकारात् 'चतस्र आज्याहुतीर्जुहुयात्' (१. ४. ३) इति । तेन न मन्त्रसमुच्चयः, आहुतीनां च समुच्चय इत्युक्तं पुरस्तात् ॥ ६ ॥

नैके कांचन ॥ ७ ॥

एके आचार्याः कामप्याहुतिं नेच्छन्ति। किमुक्तं भवति । नैवाहुतयो भवन्तीति । एवं सति नैक इत्येव वक्तव्यम्, कांचनग्रहणमपार्थकम् । नैक इत्येवमुच्यमाने समुच्चयविकल्पः स्यात् । समुच्चयो भवति वा न वेति । एवं गृह्यते, प्रतिषेधविकल्पस्तु न स्यात् । अतः कांचनग्रहणं क्रियते । नैतदस्ति प्रयोजनम् । कस्मात् । समुच्चयविकल्पस्य प्रागेवोक्तत्वात् । तस्मान्नैक इत्येव वक्तव्यम् । ब्रवीति । नैक इत्येवमुच्यमाने दोषः स्यात् । को दोषः । होमविकल्पः स्यान्नाहुतिविकल्पः । कः पुनर्विशेषो होमस्य वा आहुतीनां च । आहुतयो या इहोपदिष्टास्तासां प्रतिषेधः स्यात् । होमे तु प्रतिषिध्यमाने नैव होमकर्मारभ्यते । तेन कांचनग्रहणं क्रियते । कथम् । आहुतिप्रतिषेधः स्यात् । न होमप्रतिषेध इति ॥ ७ ॥

'त्वमर्यमा भवसि यत् कनीनाम्' (ऋ० सं० ५. ३. २) इति विवाहे चतुर्थी[3] ॥ ८ ॥

---

[1] प्रत्येकम्—omitted in B. [2] सप्त—A, C, D. [3] चतुर्थीम्—B.

'त्वमर्यमा भवसि' इत्येतया ऋचा चतुर्थी आहुतिर्भवतीत्येतदुक्तं वेदितव्यम्। तत्र संशयः—किं पूर्वोक्तायाश्चतुर्थ्याः स्थाने एषा भवति, आहोस्वित् तस्या[1] उत्कर्षणमिति। तत्रैके [2]चतुर्थीत्युपदेशात् चतुर्थ्याः स्थाने भवतीति मन्यन्ते। कस्मात्। समानजातित्वात्। अन्ये पुनः पुर्वोक्तायाश्चतुर्थ्या उत्कर्षो भवतीति प्रतिपन्नाः। किं कारणम्। असमानजातित्वात्। तत्र चतुर्थीति प्रत्यक्षं काचिच्चोदना। संख्यानिर्दिष्टश्चार्थः पूर्वोक्तं न बाधते। यत्र च संख्यानिर्देशे पूर्वस्योद्धारमिच्छन्ति तत्र यत्नान्तरमारभ्यते। यथा—'तृतीयस्याह्नः स्थाने महाव्रतम्' (आ० श्रौ० १०. २. ३१) इति। यत्र पुनर्यत्नो नास्ति तत्र संख्याशब्द उपदिश्यमानो न बाधको भवति। को[3] दृष्टान्तः। तद्यथा—'प्रतिप्रस्थाता वाजिने तृतीयः' (आ० श्रौ० २. १७. १५) इति प्रतिप्रस्थाता चोद्यमान आग्नीध्रस्योत्कर्षाय[4] भवति नापनयाय। एवमिहाप्येषा चतुर्थी पूर्वोक्तायाश्चतुर्थ्या उत्कर्षाय[5] भवति। तस्मात् पञ्चैता आहुतयो भवन्तीत्युच्यते। आग्नीध्रवत्। यथा तत्राग्नीध्रश्चतुर्थ एवमिहापि पञ्चैता आहुतयो भवन्तीति ॥ ८ ॥

इति प्रथमे चतुर्थी कण्डिका

कुलमग्रे परीक्षेत—'ये मातृतः पितृतश्च' इति यथोक्तं पुरस्तात् ॥ १ ॥

अग्र इति प्रथममित्यर्थः। कुलं परीक्ष्य प्रथमं, पश्चाद् वरस्य ये गुणा वध्वाश्च। सत्सूत्तरेषु गुणेषु कथं कुलमेव प्रधानमिति। एतद्धि

[1] आहोस्वित् तस्या—omitted in A, C, D. [2] चतुर्थीमिति—B.
[3] को—omitted in A. [4] इति चोद्यमान आग्नीध्रस्योत्कर्षो भवति—B.
[5] उत्कर्षः—B.

प्रयोजनमग्रेग्रहणस्य । कथं पुनस्तत् परीक्ष्यं कुलम् । तदुक्तं पुरस्तात् 'ये मातृतः पितृतश्च—' (आ० श्रौ० ९. ३. २०) इति ।। १ ।।

अथ वरगुणा विधीयन्ते—

बुद्धिमते कन्यां प्रयच्छेत् ।। २ ।।

तत्र बुद्धिमत इति बुद्धिमत्तरायेत्यर्थः । का पुनर्बुद्धिः । यार्थदर्शिनी । कोऽर्थः । यः शास्त्राविरुद्धः ।। २ ।।

एवं वरगुण उक्तः । कन्यागुणो वक्तव्यः ।

बुद्धिरूपशीललक्षणसंपन्नामरोगामुपयच्छेत ।। ३ ।।

बुद्धिर्व्याख्याता । रूपमिति । रोचनीयं तु रूपम्, यत्र हि मनो रमते । [1]लक्षणैः संपन्ना लक्षणसंपन्ना तां लक्षणसंपन्नामुपयच्छेत[2] ।। ३ ।।

तत्र तु लक्षणानां बहुत्वात्[3] तस्य शास्त्रस्य दुरवगाहत्वात् तेनाचार्य उपदेशतः स्वयमेव लक्षणोपायं शास्ति—

दुर्ज्ञेयानि लक्षणानि अष्टौ पिण्डान् कृत्वा—'ऋतमग्रे प्रथमं जज्ञ ऋते सत्यं प्रतिष्ठितम् । यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यताम् । यत् सत्यं तद् दृश्यताम्' इति पिण्डानभिमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति ।। ४–५ ।।

दुर्ज्ञेयत्वाल्लक्षणोपायं शास्ति । कः पुनरसावुपायः । ऋतमग्र इत्यनेन मन्त्रेण पिण्डानभिमन्त्र्य कुमारीं ब्रूयात्—एषामेकं गृहाण—

[1] गुणैः संपन्ना गुणसंपन्ना added in A.　[2] लक्षणैरुपसंपन्ना लक्षणोपसंपन्ना तां लक्षणोपसंपन्नाम्—B.　[3] उभयत्वात्—B; महत्त्वात्—D.

इति । अथ पिण्डाधिकारे पुनः पिण्डग्रहणं किमर्थम् । कुमार्यभिमन्त्रणं मा भूदिति । कः पुनः प्रसङ्गः । एकवाक्यनिर्देशात् कुमार्याश्च द्वितीयानिर्देशाच्च प्रसज्यते । तन्निवृत्त्यर्थं द्वितीयं पिण्डग्रहणं क्रियते ॥ ४–५ ॥

अथ कुतस्ते पिण्डा भवन्तीत्युपरिष्टादन्वाचष्टे—

क्षेत्राच्चेदुभयतःसस्याद् गृह्णीयादन्नवत्यस्याः प्रजा भविष्यतीति विद्यात् । गोष्ठात् पशुमती । वेदिपुरीषाद् ब्रह्मवर्चस्विनी । अविदासिनो ह्रदात् सर्वसंपन्ना । देवनात् कितवी । चतुष्पथाद् विप्रव्राजिनी । इरिणादधन्या । श्मशानात् पतिघ्नी ॥ ६ ॥

क्षेत्राच्चेदुभयतःसस्यादाहृतं पिण्डं गृह्णीयात्, अन्नवत्यस्याः प्रजा भविष्यतीति विद्यात् । उभयतःसस्यादिति । एकस्मिन् संवत्सरे यत्रोभयं सस्यं निष्पद्यते तदुभयतःसस्यं क्षेत्रम् । तस्मादुभयतःसस्यात् क्षेत्रात् । गोष्ठाच्चेदाहृतं पिण्डं गृह्णीयात् पशुमत्यस्याः प्रजा भविष्यतीति विद्यात् । वेदिपुरीषाच्चेदाहृतं पिण्डं गृह्णीयात्, ब्रह्मवर्चस्विन्यस्याः प्रजा भविष्यतीति विद्यात् । अविदासिनो ह्रदादाहृतं पिण्डं [यदि] गृह्णीयात् सर्वसंपन्नास्याः प्रजा भविष्यतीति विद्यात् । तत्र किं प्रकृतैर्गुणैः संपन्ना, आहोस्वित् प्रकृतैश्चाप्रकृतैश्चेति । तत्राधिकृतैश्चानधिकृतैश्चेति । सर्वग्रहणसामर्थ्यात् । देवनाच्चेदाहृतं पिण्डं गृह्णीयात् कितवीति[1] विद्यात् । चतुष्पथाच्चेदाहृतं पिण्डं गृह्णीयात्, विप्रव्राजिनीति विद्यात् । विविधं प्रव्रजति, अन्यैः सह प्रतिष्ठत इत्यर्थः[2] । इरिणाच्चेदाहृतं पिण्डं गृह्णीयात्,

---

[1] अस्याः प्रजा भविष्यति—added in B. [2] This sentence is omitted in A, C, D.

अघन्या भवतीति विद्यात् । इरिणमित्यूषरमुच्यते । यत्रौषधयो न प्ररोहन्ति तदिरिणम् । श्मशानादाहृतं पिण्डं [यदि] गृह्णीयात् पतिघ्नीति[1] विद्यात् । पतिं हन्तीत्यर्थः ।। ६ ।।

इति प्रथमे पञ्चमी कण्डिका

अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहः । तस्यां जातो द्वादशावरान् द्वादश परान् पुनात्युभयतः । ऋत्विजे वितते कर्मणि दद्यादलंकृत्य स दैवः । दशावरान् दश परान् पुनात्युभयतः । सह धर्मं चरतम् इति प्राजापत्यः । अष्टावरानष्ट परान् पुनात्युभयतः । गोमिथुनं दत्त्वोपयच्छेत स आर्षः । सप्तावरान् सप्त परान् पुनात्युभयतः । मिथः समयं कृत्वोपयच्छेत स गान्धर्वः । धनेनोपतोष्योपयच्छेत स आसुरः । सुप्तानां प्रमत्तानां वापहरेत् स पैशाचः । हत्वा[1] भित्त्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत् स राक्षसः ।। १ ।।

अलंकृत्य कन्यामुदकपूर्वां दद्यादित्येवमादयोऽष्टौ विवाहा वेदितव्याः । तत्र पूर्वे चत्वारो विवाहास्तेषां पूर्वः पूर्वः प्रशस्तः । उत्तरे चत्वार उत्तरोत्तरे पापीयांसः । अथ किं सर्वेषां सर्वे भवन्ति, आहोस्विन्नियमोऽस्तीति । अस्ति केषांचिन्नियमः । पूर्वौ तावद् ब्राह्मणस्य भवतः । किं कारणम् । इतरयोः प्रतिग्रहाभावात् । ऋत्विक्त्वाभावाच्च । गान्धर्वः क्षत्रियस्य, राक्षसश्च । कथं ज्ञायते । युद्धसंयोगात् । गान्धर्वस्य पुरा दृष्टत्वात् । आसुरस्तु वैश्यस्य । कस्मात् । धनसंयोगात् । अन्ये त्रयोऽनियताः । हेत्वभावात् । तेन त्रयाणामपि भवन्तीति ।। १ ।।

इति प्रथमे षष्ठी कण्डिका

---

[1] हृत्वा—A, C, D.

अथ खलूच्चावचा जनपदधर्मा ग्रामधर्माश्च तान् विवाहे प्रतीयात् ।। १ ।।

अथशब्दोऽधिकारार्थः । इत उत्तरं यत् कर्म वक्ष्यामस्तत् सर्वं[1] विवाहेषु वेदितव्यम् । खलुशब्दोऽपार्थकः । उच्चावचा इति नानाप्रकारा बहवश्चेत्यर्थः । अथ खलु जनपदधर्मा इति वक्तव्ये उच्चावचग्रहणमपार्थकम् । कथमुच्यते । उच्चावचग्रहणे ऽक्रियमाणेऽपि सर्वे धर्माः प्रसज्यन्ते ग्रामेषु जनपदेषु च ये शक्याः । एवं सति सर्वेषां समुच्चयः स्यात् । स चानिष्टः । तेनोच्चावचा इति वक्तव्यम् । नानाप्रकारा एव कथं क्रियेरन्नित्यर्थवदुच्चावचग्रहणम्[2] ।। जनपदधर्मा इति के उच्यन्ते । अङ्गा वङ्गा मगधाः कुरवो विदेहाः पाञ्चालाः शूरसेना इत्येवमादयः । एतेषु ये[3] च ग्रामाः तेषु जनपदेषु च ये धर्मास्तान्, विवाहे प्रतीयात् । जानीयादित्येतदुक्तं भवति । तानित्येतच्छक्यमनारब्धुम् । कस्मात् । अधिकृतत्वात् । नेत्युच्यते । ग्रामधर्माश्च विवाहे प्रतीयादित्युच्यमाने अर्थगतिर्न ज्ञायते । कस्मात् । द्वितीयाभावात् । तस्मात् तानिति वक्तव्यम् । एवमपि शक्यमनारब्धुम् । अत्रैव द्वितीयानिर्देशः कर्तव्यः । ग्रामधर्मान् विवाहे प्रतीयादिति । ब्रवीति । एवमुच्यमाने जनपदधर्माणां ग्रामधर्माणां च विवाहे प्रवृत्तिः स्यान्नान्येषाम् । कथम् । [4]विध्यर्थत्वेनोपदिष्टत्वात् । तेनाविधिशब्देनोपदेशः क्रियते । तस्मात् तानित्युच्यते । एवमुच्यमाने किं सिद्धं भवति । अन्येषामपि धर्माणां तानित्यनेन शब्देनानुकर्षः क्रियते । के पुनस्ते धर्माः । कुलधर्मा इत्युच्यन्ते । तेन ग्रामधर्मैः जनपदधर्मैः कुलधर्मैश्च विवाहे भवितव्यमिति साधितं भवति । अथ विवाहाधिकारे विवाहग्रहणमपार्थकमिति पश्यामः । तत्तु क्रियते । कथमेते धर्माः कृत्स्ने विवाहे स्युरिति ।

---

[1] सर्वेषु—A; सर्वेष्वपि—D. [2] अतः for अर्थवत्—in A, C, D.
[3] ये के च—A, D. [4] विध्यर्थेनोप°—B, C.

उपयमनादुत्तरकालं[1] विवाहत्वादुपयमनात् पूर्वं[2] न स्युरित्यतो विवाहग्रहणं क्रियते ॥ १ ॥

यत्तु समानं तद् वक्ष्यामः ॥ २ ॥

यद् वक्ष्यामस्तत् सर्वेषां समानमिति वेदितव्यम् । समानं तुल्यमविभक्तमित्यर्थः । तदिदमनारभ्यम् । कस्मात् । सिद्धत्वादस्यार्थस्य । यथान्यानि कर्माण्युपदेशादेव सर्वत्र समानानि भवन्ति, एवमिहापि समानं भविष्यति । ब्रवीति । एवमेतन्नियमार्थमिदमारभ्यते । यद् वक्ष्यामस्तदेव भवति नान्यदिति । किं पुनस्तदन्यदिति । जनपदधर्मत्वेन यो धर्मः प्राप्नोति यच्च वक्ष्यामस्तयोर्विकल्पः स्यात् । स मा भूदिति कृत्वा नियमः क्रियते । यद्येवं न भविष्यति विकल्पः । वक्ष्यमाणा एव धर्मा भविष्यन्ति । किं कारणम् । शास्त्रविहितत्वात् । नेत्युच्यते । जनपदधर्मा अपि शास्त्रविहिता एव । तेन विकल्प उपपद्यते । तस्मान्नियमार्थोऽयमारम्भ इति यदुक्तं तन्न्याय्यम् । कः पुनरसौ धर्मोऽनेनाभिप्रेतो निवर्त्यते । तत्र पाण्ड्येषु सद्य एव व्यवायो दृष्टः । शास्त्रे च 'त्रिरात्रं द्वादशरात्रम्' (१. ८. ११) इत्येवमादि ब्रह्मचर्यमुपदिश्यते । तत् कथं नियम एव स्यात्, न सद्यो व्यवाय इत्येवमर्थमेतत्सूत्रमारभ्यते ॥ २ ॥

पश्चादग्नेर्दृषदमश्मानं प्रतिष्ठाप्योत्तरपुरस्तादुदकुम्भं समन्वारब्धायां हुत्वा तिष्ठन् प्रत्यङ्मुखः प्राङ्मुख्या आसीनायाः 'गृभ्णामि ते सौभगत्वाय हस्तम्' (ऋ० सं० १०. ८५. ३६) इत्यङ्गुष्ठमेव गृह्णीयाद्यदि कामयीत पुमांस एव मे पुत्रा जायेरन्निति ॥ ३ ॥

---

[1] कालमपि विवाहकालत्वात्—A, C, D. [2] ऊर्ध्वं—A, C, D.

पश्चाद् दृषदमश्मानं प्रतिष्ठापयति । तत्राश्मग्रहणेन कस्य ग्रहणं भवति । अश्मग्रहणेन दृषत्पुत्रकस्यापि ग्रहणं भवति । तेनोभयोरपि प्रतिष्ठापनं कर्तव्यम् । एवमेके । अन्ये पुनरश्मग्रहणं विशेषार्थमुपदिशन्ति । अश्ममयीं दृषदमिति । एतस्मिन् पक्षे दृषद एव प्रतिष्ठापनं प्राप्नोति । न भविष्यति । एतस्मिन्पक्षे दृषत्पुत्रकस्यापि प्रतिष्ठापनं कर्तव्यम् । कस्मात् । मङ्गलार्थत्वात् । ब्रवीति । यद्युभयोरपि पक्षयोर्दृषत्पुत्रस्य प्रतिष्ठापन-मिष्यते चिन्ताप्रयोजनं किम् । उत्तरत्र प्रयोजनम् । अश्मग्रहणेन दृषत्पुत्रो गृह्यते चेत् परिणीयाश्मानमारोहयतीत्युच्यमाने दृषत्पुत्रे आरोहणं कर्तव्यम् । अथाश्ममयी दृषदिति ये वर्णयन्ति दृषद्येवारोहणं तेषां प्राप्नोति । एतस्मिन् पक्षे अश्मग्रहणमपार्थकं, येनाश्ममय्येव दृषद् भवति । नेत्युच्यते । मृण्मय्यपि दृषद् विद्यते । तन्निवृत्त्यर्थं विशेषग्रहणं क्रियते । उत्तरपुरस्तादुदकुम्भं प्रतिष्ठापयत्यग्नेः । समन्वारब्धायां समन्वारब्धवत्या-मित्यर्थः । हुत्वा तिष्ठन् प्रत्यङ्मुख इति । तिष्ठन्ग्रहणं कुर्वन् दर्शय-त्येतमर्थम्—आसीनेन होमः कर्तव्य इति, प्रत्यङ्मुखवचनं प्राङ्मुखत्व-निवृत्त्यर्थम् । प्राङ्मुख्या आसीनायाः । प्राङ्मुख्या इति किमर्थम् । अवाङ्मुखत्वनिवृत्त्यर्थम् । आसीनाया इति कस्मात् । उत्तरं कर्म तिष्ठन्त्याः स्यादिति । 'गृभ्णामि ते सौभगत्वाय हस्तम्' (ऋ० सं० १०. ८५. ३६) इत्यङ्गुष्ठमेव गृह्णीयात् । तत्राङ्गुष्ठग्रहणं हस्तोपलक्षणार्थम् । साङ्गुष्ठं हस्तं गृह्णीयात् अनेन कामेन—यदि कामयीत पुमांस एव मे पुत्रा जायेरन्निति । अत्र पुमांसग्रहणमपार्थकम् । पुत्रशब्देनैव सिद्धत्वात् । नेत्युच्यते । पुत्रशब्दोऽप्युभयलिङ्गो दृष्टः । पुंसि स्त्रियां च लोके वक्तारो भवन्ति । एहि पुत्रेति । तथा च मेधातिथिनोक्तो दुहितरमङ्के उपवेश्य[1] पुत्र[2] क्वासौ[3] जामातेति (?)। तेनैवं दृष्टत्वाद् विशेषणमुपपद्यते पुमांसः पुत्रा इति ॥ ३ ॥

---

[1] निवेश्य—A. [2] पुत्रि—C. [3] त्वासौ—B.

अङ्गुलीरेव स्त्रीकामः ।। ४ ।।

अङ्गुलीषु हस्तं गृह्णीयादिति स्त्रीकामश्चेद् भवति । हस्तग्रहणे प्रज्ञाप्यमाने तत्र मन्त्रस्याधिकारो भवतीति प्रज्ञापितं भवति ।। ४ ।।

रोमान्ते हस्तं साङ्गुष्ठमुभयकामः ।। ५ ।।

पुत्रकामः स्त्रीकामश्च ।। ५ ।।

प्रदक्षिणमग्निमुदकुम्भं च त्रिः परिणयन् जपति । 'अमोऽहमस्मि सा त्वं सा त्वमस्यमोऽहम् । द्यौरहं पृथिवी त्वं सामाहमृक् त्वम् । तावेह विवहावहै प्रजां प्रजनयावहै । संप्रियौ रोचिष्णू सुमनस्यमानौ जीवेव शरदः शतम्' इति ।। ६ ।।

उदकुम्भग्रहणं शक्यमकर्तुम् । [1]यथैवान्येषां यज्ञपात्राणां प्रादक्षिण्यं भवति, एवमुदकुम्भस्यापि । तस्मात् [2]परिसंख्यार्थमिति वर्णयन्ति । उदकुम्भस्यैव प्रादक्षिण्यं[3] भवति नान्येषां यज्ञपात्राणाम् । अन्येषां तु प्रयोजनम्—विवाहं प्रति यदन्यत् प्रतिविशिष्टमत्रद्रव्यं तस्य वहिष्करणं यथा स्यादिति । किं पुनस्तत् । दृषदित्युच्यते । त्रिःपरिणयन् जपतीत्येतद् विचारयिष्यामः । किं त्रिर्जपति परिणयन् आहोस्वित् त्रिः परिणयन् जपतीति । किं चातः । यदि तावत् त्रिर्जपति परिणयन्नित्येव कल्प्यते तेन त्रिर्जपः सकृच्च परिणयनं प्राप्नोति । अथ चेत् त्रिः परिणयन् जपतीति । एवं त्रिः परिणयनं सकृन्मन्त्रः प्राप्नोति । उभयथा दोषः । एवं तर्हि कथमस्तु । त्रिः परिणयनं त्रिर्जप इति । कथमेतद् गम्यते । अनेकं तावत् परिणयनं दर्शयति परिणीय परिणीयेति । यावच्च परिणयनं तावच्च

[1] यद्यन्येषां—A, C, D. [2] ज्ञापनार्थम्—A. [3] प्रदक्षिणं—A, C, D.

जप इति सिद्धं भवति । कथम् । परिणयाङ्गत्वाज्जपस्य । यथान्यत्रापि यावत्कृत्वः पर्युक्षणं तावत्कृत्वो जपतीति सिद्धं भवति ।। ६ ।।

परिणीय परिणीयाश्मानमारोहयति—
'इममश्मानमारोहाश्मेव त्वं स्थिरा भव ।
सहस्व पृतनायतोऽभितिष्ठ पृतन्यतः' ।।
इति ।। ७ ।।

इममश्मानमारोहेत्यनेन मन्त्रेण यत्रारोहणं तद् विचारितं पुरस्तात् । वीप्साग्रहणं यावत्परिणयनं तावदारोहणं कथं स्यादिति ।। ७ ।।

वध्वोऽञ्जलावुपस्तीर्य भ्राता भ्रातृस्थानो वा द्विर्लाजानावपति[1] ।। ८ ।।

वध्वाः अञ्जलिः वध्वञ्जलिः । वध्वञ्जलिरित्येवं प्राप्ते वध्वोऽञ्जलाविति पठ्यते । तत्रायमपपाठो[2] द्रष्टव्यः । छान्दसो वा निर्देशः । वध्वः अञ्जलावित्यलुक्समासो वा पाठो द्रष्टव्यः । उभयथा च पठन्ति । अनया युक्त्या उभयथा चोपपद्यते । उपस्तीर्याभिघार्येत्यर्थः । भ्रातेति सोदर्यस्य ग्रहणम् । भ्रातृस्थानो वेति । मातुलपुत्रः पितृव्यपुत्रो वा भातृस्थान इत्युच्यते । भ्रातुरभावे भ्रातृस्थानेन भवितव्यम् । द्विर्लाजानावपति ।। ८ ।।

त्रिर्जामदग्न्यानाम् ।। ९ ।।

यदि जामदग्न्यो वरो भवति तदा त्रिर्लाजानावपति ।। ९ ।।

---

[1] All the four MSS. read six *sūtra-s* together in this place, up to स्रुचेव जुहुयात्. [2] अपवादो—A, C, D; उपपाठो —B.

प्रत्यभिघार्य हविः ।। १० ।।

तत्रायं हविःशब्दः क्व वर्तते । किमवदाने उत शेष इति । तत्र केचिदवदाने कल्पयन्ति । केचिच्छेषे । तत्र शेष उपपद्यते । नावदाने । कुत एतत् । दर्शनात् । किमिदं पुनर्दर्शनमिति चेत् । स्विष्टकृति वक्ष्यति —'नात्र हवींषि प्रत्यभिघारयति' (१. १०. २५) इति । तेन हविःशब्दः शेषे वर्तते । नावदाने । नैतदुपपद्यते । कस्मात् । हविःशब्दस्य साधारणत्वात् । तत्रापि हविःशब्दः साधारण एव । तेन संशय एव[1] । नेति ब्रूमः । अवदानस्यानभिघारणे दोष उपपद्यते । को दोषः । चतुरवत्तभेदः[2] । तेन तत्र प्रत्यभिघारणप्रतिषेधः शेषस्यैव भवति । नावदानस्य । एवं चेत् तस्मादिहापि शेषस्य प्रत्यभिघारणं प्रथमं[3] भवति पश्चादवदानस्येति ।। १० ।।

अवत्तं च ।। ११ ।।

अवत्तं चेति । प्रत्यभिघार्य । अवत्तमवदानमित्युच्यते । ये पुनर्योगविभागं कुर्वन्ति—प्रत्यभिघार्येति एवं छिद्यमाने सूत्रे पूर्वमवदानस्य सिद्धं भवति प्रत्यभिघारणम् । हविश्चेति हविषः पश्चात् प्रत्यभिघारणं प्राप्नोति[4] । एवं चावत्तग्रहणमपार्थकं संपद्यते । तस्मान्नैवायं योगविभागः कर्तव्यः ।। ११ ।।

एषोऽवदानधर्मः ।। १२ ।।

[5]सूत्रप्रकरणमुपजीवन्नाचार्य इमां परिभाषां करोति—एषोऽवदानधर्म इति । अवदानचोदनायां सत्यां कथमयं धर्मः स्यादिति । क्व पुनरिष्यते ।

---

[1] एव omitted in B. [2] भेदात्—A, C, D. [3] प्रथमं omitted in A, C. [4] भवति—B. [5] तत्र प्रकरण°—B.

यथा—'मध्यात् पूर्वार्धाच्च हविषोऽवद्यति' (१. १०. २१), तथा—'अवदानसंपदा जुहुयात्' (आ० श्रौ० २. ६. १२) इत्येवमादिषु ।

अथाभिघारणप्रत्यभिघारणे कः करोति । भ्राता करोति । कस्मात् । अधिकृतत्वात् । समानकर्तृवन्निर्देशाच्च । नेत्युच्यते । यदि हि भ्राता कर्ताभिप्रेतः स्याद् भ्रातरमधिकृत्योपस्तरणं चोदयेत् । यस्मादुपस्तरणादुत्तरकालं भ्राता चोद्यते तस्माद् भ्रातुरकर्तृत्वम् । भ्रातुः कर्तृत्वं यत्रैवोपदिष्टं[1] तत्रैव भवति । एवं तर्हि[2] आचार्यः कर्ता प्रसज्येत । असावपि नोपपद्यते । कस्मात् । आचार्येणासौ विसर्जितः सन्नेतत् करोति । एवं तर्हि स्वयमेव वरः करोति । तस्यापि[3] कर्तृता नोपपद्यते । कस्मात् । उपरिष्टादन्यं कर्तारं दर्शयति—'उदकुम्भेनावसिच्य'—(१. ७. २१) इति । स्वयंकर्तृत्वे[4] सत्यवसेचनं न शक्यते कर्तुम् । नेत्युच्यते । तत्रोदकुम्भशब्द उदकुम्भस्थे उदके वर्तते । तेन तत्रस्थेनोदकेनावसेचनं कर्तव्यम् । तस्माद् वर एव कर्ता भवतीत्येतत् सिद्धं भवति ॥ १२ ॥

'अर्यमणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवो अर्यमा प्रेतो मुञ्चातु नामुतः' स्वाहा ॥
'वरुणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवो वरुणः प्रेतो मुञ्चातु नामुतः' स्वाहा ॥
'पूषणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवः पूषा प्रेतो मुञ्चातु नामुतः' स्वाहा ॥
इत्यविच्छिन्दत्यञ्जलिं स्रुचेव जुहुयात् ॥ १३ ॥

अर्यमणं नु देवमित्यादिभिर्मन्त्रैर्लाजान् जुहोति । कथं जुहोति । अविच्छिन्दत्यञ्जलिं स्रुचेव जुहुयात् । अथ को जुहोति । वधूर्जुहोति । कथं

[1] यत्रोपदिष्टं—B. [2] अथ—A, C, D. [3] तस्मिन्नपि—B.
[4] स्वयंकर्तृकत्वे—A, C, D.

गम्यते । अविच्छिन्दतीति स्त्रीलिङ्गनिर्देशात् । कथं वान्यथा स्यात् । अविच्छिन्दन्नञ्जलिमिति । अथ मन्त्राः कस्य भवन्ति । तत्रैके वध्वा एवेच्छन्ति । कस्मात् । सा हि जुहोति । तस्मात् सा संवध्यते । मन्त्रलिङ्गदर्शनाच्च । 'कन्या अग्निमयक्षत' इति । नेत्युच्यते । वध्वाः मन्त्रो न भवति । कुतः । अनधिकारात् । नहि स्त्री मन्त्रेऽधिक्रियते । अधिक्रियत इति ब्रूमः । कथम् । यथा पत्नीवाचनादिषु । तत्र तु वचनाद् भवति । इह तु संदिग्धत्वान्मन्त्रस्य वरस्यैव मन्त्रैर्भवितव्यम् । प्राधान्याच्च । यच्चोक्तं लिङ्गदर्शनादिति । तत्र लिङ्गं नोपपद्यते । नासौ कन्याशब्द एतां कन्यामभिवदति । अस्याः कर्माण्यभिधीयन्ते । तेन वरस्यैवैतैर्मन्त्रैर्भवितव्यम् । लिङ्गदर्शनाच्च पश्यामो यथा वरस्यैवैते मन्त्रा भवन्तीति । किं दर्शनम् । [1]परोक्षवन्मन्त्रनिर्देशः । 'स इमां देवः' इति । यदि[2] वध्वाः मन्त्राः स्युः 'स मां देवः' इत्येवं स्यात् । तस्मात् वरस्यैवैते मन्त्रा भवन्तीत्येतत् सिद्धम् ।। १३ ।।

अपरिणीय शूर्पपुटेनाभ्यात्मं तूष्णीं चतुर्थम् ।। १४ ।।

ततः[3] परिणयनमकृत्वेत्यर्थः । एवं चेदपरिणीयेति वचनमपार्थकम् । कस्मात् । परिणयनस्याप्राप्तत्वात् । परिणयनं हि त्रिर्निर्दिष्टम् । तेनेह नैव भविष्यति । एवं सिद्धे यदपरिणीयेत्याह तज्ज्ञापयति—शूर्पपुटेन होमं कृत्वा परिणयनं चतुर्थममन्त्रकं भवतीति । एवं तावदेके प्रतिपन्नाः । नेत्येके । कः पुनरस्यार्थोऽपरिणीयेति । अयमर्थः—पूर्वं होमात् परिणयनं[4] कथं स्यादिति । कथं वा न प्राप्नोति । त्रीणि परिणयनान्यनन्तराणि चोक्तानि यथा चोदितान्येव स्युः । तथा त्रयो होमा अनन्तरमाम्नाताः । तेषां च तथैव क्रिया प्राप्नोति । न चेष्यते । न च व्यवधानकारणमन्यदस्ति । तेन कथं परिणीय परिणीय होमः स्यादित्येतदर्थमप्राप्तं परिणयनं

---

[1] परोक्षवान्—A.　[2] यथा—A.　[3] अत्र—B.　[4] होम। परिणयनात्—A.

प्रतिषिध्यते । तेनापरिणीयेत्युच्यते । शूर्पपुटेनेति । पुटाकृतिर्यो [1]देशः शूर्पस्य तेन होमः कर्तव्यः । सा चतुर्थी आहुतिः । अभ्यात्ममित्याभिमुख्ये-नेत्यर्थः । तूष्णींग्रहणं तूष्णींहोमधर्मप्राप्त्यर्थम् । चतुर्थमिति वचनं परिसंख्यानार्थम् । कथम् । स्विष्टकृदेतस्य द्रव्यस्य न स्यादिति । सैव कर्त्री यथा स्यादिति च ।। १४ ।।

ओप्योप्य हैके लाजान् परिणयन्ति ।। १५ ।।

एके आचार्या ओप्य लाजान् परिणयनमिच्छन्ति । हशब्दोऽभिमत-पक्षप्रदर्शनार्थः ।। १५ ।।

तथोत्तमे आहुती न संनिपततः ।। १६ ।।

तथा सत्यस्यां क्रियायामुत्तमयोराहुत्योः[2] संनिपातो न भवति । यद्येवं वचनमपार्थकम् । नैवोत्तमयोराहुत्योः संनिपातोऽस्ति । तत्रैके प्रशं-सामिमां मन्यन्ते । यस्मादुत्तमयोराहुत्योः[2] संनिपातो नास्ति तस्मादयं[3] पक्षः कर्तव्यः । अन्ये पुनर्निन्दामेनां मन्यन्ते । [4]तस्मादयं पक्षो न कर्तव्यः । तदिदमुभयं नोपपद्यते । किमर्थं तर्हीदमारभ्यते । तथा कर्तव्यं परिणयनं यथोत्तमयोराहुत्योः संनिपातो न भवति । कथं वा स्यात् । इह प्रागुक्त-मपरिणीयेति । तदन्यार्थं कृतं सदिह दोषमुत्पादयति । कथम् । तृतीयं परिणयनमकृत्वा चतुर्थो होमः स्यात् । अपरिणीय चतुर्थमिति वचनात् । स मा भूदिति कृत्वेदं वचनमारभ्यते उत्तमयोराहुत्योः संनिपातो न भवतीति । तेन तृतीयं परिणयनं कृत्वा चतुर्थो होमः कर्तव्यः ।। १६ ।।

अथास्यै शिखे विमुञ्चति यदि कृते भवतः ।। १७ ।।

---

[1] योंऽशः—B.   [2] उत्तरयोः—B.   [3] अयमेव—B.   [4] तेनायं B.

अथशब्दोऽनन्तरार्थः । एतस्मिन्नन्तराले स्विष्टकृन्मा भूदिति । अस्या इति किमर्थम् । अथ शिखे विमुञ्चतीत्युच्यमाने[1] उभयोर्दम्पत्योः[2] शिखाविमोक्षः स्यात् । स मा भूदित्यस्या इत्युच्यते । यदि कृते भवतः । कथं पुनस्तयोः करणमकरणं वा । ग्रामधर्मत्वेन वा जनपदधर्मत्वेन वा । तेन यदीत्यनित्यार्थे ॥ १७ ॥

कीदृशे पुनस्ते शिखे—

ऊर्णास्तुके केशपक्षयोर्बद्धे भवतः ॥ १८ ॥

तयोर्विमोक्षो[3] भवति ॥ १८ ॥

'प्र त्वा मुञ्चामि वरुणस्य पाशात्' (ऋ० सं० १०. ८५. २४) **इति । उत्तरामुत्तरया ॥ १९ ॥**

प्र त्वा मुञ्चामीत्याभ्यामृग्भ्याम् । दक्षिणे केशपक्षे प्रथमयर्चा[4] । सव्ये द्वितीयया ॥ १९ ॥

अथैनामपराजितायां दिशि सप्त पदान्यभ्युत्क्रामयति । 'इष एकपद्यूर्जे द्विपदी रायस्पोषाय त्रिपदी मायोभव्याय चतुष्पदी प्रजाभ्यः पञ्चपद्यृतुभ्यः षट्पदी ।

सखा सप्तपदी भव सा मामनुव्रता भव ।

पुत्रान् विन्दावहै बहूंस्ते सन्तु जरदष्टयः' इति ॥ २० ॥

अथैनामपराजितायां दिशि सप्त पदान्यभ्युत्क्रामयति इष एकपदीत्येवमादिभिर्मन्त्रैः । अथशब्दः पूर्वेण[5] व्याख्यातः । अत्र[6] संशयः—

---

[1] इत्येवमुच्यमाने—B. [2] दम्पत्योः omitted in B. [3] शिखयोर्विमोको—A, C, D. [4] पूर्वयर्चा—B. [5] Omitted in A, C, D. [6] तत्र—A, C, D.

किमेतावानेव मन्त्रः आहोस्विदन्योऽप्यस्तीति । कुतः पुनः संशयः । साका-ङ्क्षत्वात् । इष एकपदीति साकाङ्क्षोऽयं मन्त्रः । एतावता भवितव्यम् । कस्मात् । शेषस्यानुपदेशात् । नेत्युच्यते । [1]उपदिष्टः शेष उत्तरे मन्त्रे । स इह नोपपद्यते[2] । तत्रोपदिष्टः कथमिहानुकृष्येत । यथाग्निहोत्रे 'प्राश्नामि' (आ० श्रौ० २.४.७) इति पुरस्तादुक्तमुपरिष्टाद् भवति । एवमिहा-प्यनुकर्षो भवति । तदेतन्नोपपद्यते । पुरस्तादुक्तमुपरिष्टाद् भविष्यति । उपरिष्टात्तु विधीयमानं पुरस्तान्न भवति । नेत्युच्यते । शास्त्रान्तरेऽप्यु-परिष्टादाम्नातः पुरस्ताद् भवति । यथा 'घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीद' (तै० सं० १.१.११.२) इति यथा ध्रुवायां दृष्टो [मन्त्रः] जुह्वादिषु भवति, एवमुपरिष्टादाम्नातोऽयमिह पुरस्ताद्[3] भवति । शास्त्रान्तर एतदुदाहरणम् । स्वशास्त्रेऽपि ज्ञापकं कर्तव्यम् । इदं तर्हि ज्ञापकम् । पुरस्तादाम्नात उपरिष्टाद् भवति । उपरिष्टादाम्नातः पुरस्ताद् भवतीति । रहस्ये वक्ष्यते । [4]गायत्र्यादीनां छन्दसां दशानाम् 'उद्वहामि' इत्यस्य शब्दस्य प्रथमे छन्दसि पाठः क्रियते । सर्वेषां छन्दसामयं शब्दो भवति । एवं तावत् पुरस्तादाम्नातः । अथोपरिष्टात् तत्र 'उल्लिखामि' इति शब्द उत्तरत्राम्नातः पुरस्ताद् भवति प्राणादिषु । एवमिहापि दर्शनप्रसिद्धेः प्राप्नोति । नेत्युच्यते । याजुषाणां मन्त्राणामनु-कर्षो[5] दृष्टः । इमाश्च ऋचः[6] । सखा सप्तपदी भवेत्येवमादीनां[7] मन्त्राणा-मनुकृष्यमाणानां तु ऋचोऽनुकर्षः कृतो भवति । अस्तु को दोषः । सर्वा एवैता ऋचः [8]संपद्यन्तेऽनुष्टुभः अनुकर्षे क्रियमाणे । तत्र समाप्त्यर्थत्वाद्[9]

[1] Portion from here up to नेत्युच्यते is left out in A, C, D.
[2] वा विरुध्यते—B. [3] अयमपि कस्मान्न—A, C, D. [4] In this reference to the *Aitareya Āranyaka* (V. 1. 4) and the words उद्वहामि and उल्लिखामि there are many scribal errors in all MSS.
[5] आकर्षो—B. [6] संपद्यन्ते added in A. [7] एवमादिना मन्त्रेण न ऋचो—A, C, D. [8] संपद्यन्ते omitted in A, C, D. [9] सप्तमार्थत्वात्—B.

वाक्यस्यानुकर्षः प्राप्नोति । ऋक्त्वादनुकर्षो न ऋचोऽनुकृष्यन्ते । एवमेतस्मिन् संदिग्धे ऐतरेयिणां वचनमारब्धम्—'भवादि सर्वत्र समानम्' इति । तेनेहाप्यनुकर्ष एवाध्यवसीयते । [1]ऋगनुष्टुभां च तुल्यत्वात् । तस्मादस्माकमप्यनुकर्षो भवतीत्यवस्थितम् । असमान-विभक्तित्वान्नानुकर्ष इत्येके ॥ २० ॥

उभयोः संनिधाय शिरसी उदकुम्भेनावसिच्य ब्राह्मण्याश्च वृद्धाया जीवपत्न्या जीवप्रजाया अगार एतां रात्रिं प्रतिश्रयेत् ॥ २१ ॥

उदकुम्भेनावसिच्येति । उदकुम्भस्थेनोदकेनावसेचनं कर्तव्यम् । [2]अवसेचनं कृत्वानन्तरमेतस्मिन् काले स्विष्टकृद् भवति । ब्राह्मणी या जीवपतिका जीवप्रजा तस्याः । एवंलक्षणाया ब्राह्मण्या अगारे एतामनन्तरां रात्रिं प्रतिश्रयेत् । प्रतिश्रयीत वसेदिति । प्रतिश्रयितव्ये सत्ययं विशेषः । किमुक्तं भवति । देशान्तरे विवाहो यदा तदा प्रतिश्रयणं भवतीति । यदा पुनरेकस्मिन् ग्रामे वा नगरे वा तदार्थान्न प्रतिश्रयणम् । किमर्थं स्त्री विशेष्यते न पुरुष इति । पुरुषस्य बहुभार्यस्य[3] काचिन्मृतप्रजा भवति । तस्या अगारे मा भूदित्यतः[4] स्त्रीविशेषणं क्रियते ॥ २१ ॥

ध्रुवमरुन्धतीं सप्त ऋषीनिति दृष्ट्वा वाचं विसृजेत 'जीवपत्नीं प्रजां विन्देय' इति ॥ २२ ॥

---

[1] अनुष्टुभश्च—A, C, D. [2] तत्र added in B. [3] बहुभार्यत्वात् तस्य—A, C, D. [4] न प्रतिश्रयीतेति—A, C, D.

जीवपत्नीत्यनेन मन्त्रेण वाग्विसर्गविधानात् प्राग् वाङ्नियमोऽस्ति । कस्य पुनरयं वाग्विसर्गो भवति । वध्वाः । कुतः । मन्त्रलिङ्गात् ।। २२ ।।

इति प्रथमे सप्तमी कण्डिका

प्रयाण उपपद्यमाने 'पूषा त्वेतो नयतु हस्तगृह्य' (ऋ० सं० १०. ८५. २६) इति यानमारोहयेत् ।। १ ।।

प्रयाण उपपद्यमान इति कस्मात् । पूषा त्वेत इति यानमारोहये-दित्युच्यमाने[ऽहरहर्यान]ारोहणं प्राप्नोति । एवमप्युपपद्यमानग्रहणम-पार्थकम् । वक्तव्यमेव । इतरथा हि प्रयाणे यानमेव नित्यं स्यात् । तत्र यानं नाम चक्रीवच्छदिष्कमाकाशं[1] वा यानमित्युच्यते । उपपद्यमाने याने अनेन मन्त्रेणारोहणं कर्तव्यम् । असति यानेऽन्यत्रायं मन्त्रो न भवति, अन्येनापि नयनं[2] भवतीत्येतज्ज्ञापितं भवति ।। १ ।।

'अश्मन्वतीरीयते संरभध्वम्' (ऋ० सं० १०. ५३. ८) इत्यर्धर्चेन नावमारोहयेत् ।। २ ।।

अर्धर्चग्रहणमृङ्‌निवृत्त्यर्थम् ।। २ ।।

उत्तरेणोत्क्रामयेत् ।। ३ ।।

उत्तरेणार्धर्चेनोत्क्रामयेत् । तत्रोत्क्रामयेदित्युत्तारयेद्वा उत्क्षिपेद्वेत्यर्थः ।। ३ ।।

'जीवं रुदन्ति' (ऋ० सं० १०. ४०. १०) इति रुदत्याम्[3] ।। ४ ।।

यदासौ[4] बन्धुवियोगाद् रोदिति तदास्यां रुदत्यां[1] जपेदित्यर्थः ।। ४ ।।

---

[1] छदिष्कामाशं—A, C; चक्रीबसच्छतिष्कमाकाशं—B. [2] यानं—B.
[3] रुदन्त्याम्—B. [4] वधूः—B.

विवाहाग्निमग्रतोऽजस्रं नयन्ति ॥ ५ ॥

विवाहाग्निग्रहणमन्यस्याग्नेर्नयनं मा भूदिति। नयने अजस्रग्रहणं किमर्थम्। धार्यमाणस्य नयनं स्यादिति। एवं ब्रुवन्नेतमर्थं ज्ञापयति—अन्यत्र नीयमानस्य समारोपणमपि कृत्वा नयनं भवतीति ॥ ५ ॥

कल्याणेषु देशवृक्षचतुष्पथेषु 'मा विदन् परिपन्थिनः' (ऋ० सं० १०. ८५. ३२) **इति जपेत् ॥ ६ ॥**

कल्याणा इति शोभनाः प्रशस्ताः प्रकाशा इत्यर्थः। तेषु कल्याणेषु देशवृक्षचतुष्पथेषु एषा ऋग् भवति। तत्र त्वन्येषामियमृग् भये दृष्टा। इह च भयं नोपपद्यते। उच्यते। इहापि भयमस्ति। कथम्। एतेषु देशवृक्षचतुष्पथेषु गन्धर्वाप्सरसो नित्यं संनिहिता भवन्ति। ते तयोर्दम्पत्योर्लुभ्यन्ते[1]। तेन तयोरपीदं भयस्थानं भवति। तस्मादत्रापि भय एवैषा ऋक् प्रयुज्यते ॥ ६ ॥

वासे वासे 'सुमङ्गलीरियं वधूः' (ऋ० सं० १०. ८५. ३३) **इतीक्षकानीक्षेत ॥ ७ ॥**

वासे वास इति वसतौ वसतावित्यर्थः। य ईक्षका भवन्तिताननेन मन्त्रेणेक्षेत—सुमङ्गलीरिति। तत्र वासे वास इति नियमार्थमारभ्यते। कः[2] पुनर्नियमः। वासे वास एव ईक्षकानीक्षेतानेन मन्त्रेण। अन्यत्र य ईक्षकास्तान् प्रति मा भूदयं मन्त्र इति ॥ ७ ॥

'इह प्रियं प्रजया ते समृध्यताम्' (ऋ० सं० १०. ८५. २७) **इति गृहं प्रवेशयेत् ॥ ८ ॥**

---

[1] लभ्यन्ते—A. C. [2] कथं—A, B.

इह प्रियमित्यनेन मन्त्रेण गृहं प्रवेशयति वधूम्[1] ।। ८ ।।

विवाहाग्निमुपसमाधाय पश्चादस्यानडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नुपविष्टायां समन्वारब्धायाम् 'आ नः प्रजां जनयतु प्रजापतिः' (ऋ० सं० १०. ८५. ४३) **इति चतसृभिः प्रत्यृचं हुत्वा 'समञ्जन्तु विश्वे देवाः'** (ऋ० सं० १०. ८५. ४७) **इति दध्नः प्राश्य प्रतिप्रयच्छेत् ।। ९ ।।**

अत्र विवाहाग्निग्रहणं न कर्तव्यम् । कस्मात् । अधिकृतत्वात् । अत एव कर्तव्यम् । नयनेऽधिकृतत्वाद्धोमे यः कश्चनाग्निः प्रसज्येत, स मा प्रसाङ्क्षीदिति । तस्माद् विवाहाग्निग्रहणं क्रियते । उपसमाधायेति न वक्तव्यम् । कस्मात् । सिद्धत्वात् । क्व सिद्धम् । अन्वाधाय कर्म क्रियते । चर्मास्तरणकालोपदेशार्थम् । अथवेदं प्रयोजनम् । एककर्तृकत्वं प्रदर्शयति । एवं किं सिद्धं भवति । अन्यत्रान्योऽप्युपसमाधानं करोतीति । न विवाहे उपसमाधानमन्यः करोति । पश्चादिति देशनिर्देशः[2] । आनडुहमिति चर्मणो विशेषणं क्रियते । प्राक् चास्य ग्रीवा भवत्युपरिष्टाल्लोमानि भवन्ति । तस्मिन्नुपर्युपविष्टायाम् । तस्मिन्निति न वक्तव्यम् । कस्मात् अधिकृतत्वात् । तस्मिन्निति यदि नोच्यते नैव तत्रोपवेशनं स्यात् । तस्माद् वक्तव्यमेव । समन्वारब्धायाम् । समन्वारब्धवत्यामित्यर्थः । 'आ नः प्रजां जनयतु प्रजापतिः' इति चतसृभिः प्रत्यृचं होमो भवति । तत्र प्रत्यृचग्रहणमपार्थकम् । यथा 'धाता ददातु दाशुषे' (१. १४. ३) इत्यत्र प्रत्यृचं होमो भवत्यसत्यपि प्रत्यृचग्रहणे । एवमिहापि भविष्यति । तस्मात् प्रत्यृचग्रहणं न कर्तव्यम् । उच्यते । कर्तव्यमिह । एते होममन्त्राः कर्मकरणाः । कर्मकरणत्वात् स्वाहाकारान्तेन होमः प्राप्नोति । कस्मात् । स्वाहाकारस्य मन्त्रत्वात् । एवं प्राप्ते प्रत्यृचग्रहणं क्रियते कथमृगन्तेन

---

[1] प्रवेशयितव्या वधूः—B. [2] दिङ्निर्देशः—B.

होमः स्यान्न स्वाहाकारान्तेनेति । यत्र प्रत्यृचग्रहणं नास्ति तत्र स्वाहा-कारान्तेन होमः प्राप्नोति । तेन क्वचिदादेशेन होमः स्यादिति । नैतदस्ति[1] यत्र वचनं तत् परीक्ष्य क्रियते । समञ्जन्तु विश्वेदेवा इति दध्नः प्राश्य प्रतिप्रयच्छेत्, तत्र संशयः । किमयं प्राशनमन्त्र आहोस्वित् प्रदानमन्त्रः । उच्यते । उभयार्थः । यद्युभयार्थः अभ्यासः प्राप्नोति । उच्यते । न भवत्य-भ्यासः । कस्मात् । उभयलिङ्गत्वान्मन्त्रस्य । यथा [2]द्वार्ययोरभिमर्शन-मन्त्रः सकृदेव प्रयुक्तः सन्नुभयार्थो भवति तद्वदिहापीति । स्वयं प्राश्य पश्चात् प्राशनार्थं तस्याः प्रयच्छेदिति[3] ।। ९ ।।

आज्यशेषेण वानक्ति हृदये ।। १० ।।

अथवा आज्यशेषेण हृदये अनक्ति । न पूर्वं कर्म करोति चेद्धृदये[4] अनक्ति आत्मनस्तस्याश्चानेन मन्त्रेण ।। १० ।।

अत ऊर्ध्वमक्षारलवणाशिनौ ब्रह्मचारिणावलंकुर्वाणावधः-शायिनौ[5] स्याताम् । त्रिरात्रं द्वादशरात्रं संवत्सरं वैक ऋषिर्जायत इति ।। ११ ।।

अत ऊर्ध्वमिति । अनेनातःशब्देन किं निर्दिश्यते । गृहप्रवेशनीयस्य निर्देशः । प्रकृतत्वात् । तेन गृहप्रवेशनीयादूर्ध्वमेषा व्रतचर्या भवति । यद्येवं दोषः । प्राग् गृहप्रवेशनीयादेतानि व्रतानि न प्राप्नुवन्ति । इष्यन्ते[6] च । तस्मान्नायमर्थः । एवं तर्हि अतःशब्देन विवाहो निर्दिश्यते । ननु च व्यवधानाद् गृहप्रवेशनीयेन तस्य निर्देशो नोपपद्यते । नेत्युच्यते । विवाह एव प्राधान्येन प्रकृतः । गृहप्रवेशनीयः[7] प्रसङ्गेनोक्तः[8] । तस्माद्

---

[1] नैवास्ति—A, C, D. [2] द्वयोः—A, C, D. [3] प्रयच्छति—A, C, D. [4] द्वे हृदये—A, C, D. [5] A, C, D. omit अलंकुर्वाणौ. [6] इष्यते—A, C, D. [7] गृहप्रवेशनीयं—B. [8] उक्तम्—B.

विवाह एव निर्दिश्यते अत इति । तेन विवाहादूर्ध्वमेषा व्रतचर्या भवति । एवमपि दोषः प्राप्नोति । [1]प्राग् गृहप्रवेशनीयाद् व्रतसमाप्तिर्भवति । न चेष्यते । तस्माद् दोषः[2] । एवमुभयथापि दोषः । एवं तर्ह्यन्यथा सूत्र-विन्यासः कर्तव्यः । 'अक्षारलवणाशिनावधःशायिनौ ब्रह्मचारिणौ स्याताम्' । तेनेमानि व्रतचर्याणि विवाहात् प्रभृति विधीयन्ते । 'अत ऊर्ध्वं त्रिरात्रं द्वादशरात्रं संवत्सरं वा' । तेनातःशब्देन गृहप्रवेशनीयो गृह्यते[3] । तेन गृहप्रवेशनीयादूर्ध्वं कालनियमः । प्राक् चानियतः कालः । एवमिष्टोऽर्थः[4] सिद्धो भवति । संवत्सरमेके व्रतमिच्छन्ति । कस्मात् । एवंनियमसंयुक्तस्य ऋषिकल्पः किल[5] पुत्रो जायत इति ।। ११ ।।

चरितव्रतः सूर्याविदे वधूवस्त्रं दद्यात् ।। १२ ।।

चरितव्रतः समाप्तव्रत इत्यर्थः । सूर्याविदे । सूर्यया दृष्टो मन्त्रः सूर्यैव भवति । वृषाकपिरिति यथा । तं मन्त्रं यो वेद स भवति सूर्यावित् । तस्मै सूर्याविदे वधूवस्त्रं देयम् । कथं पुनरसौ वेदितव्यः । स्वरतो वर्णत इत्येवमादिभिर्लक्षणैः सामान्यलक्षणेन च । कस्य[6] पुनर्वाससो दानमुपदिश्यते । यद् वासो विवाहकाले आसीत् तस्येदं दानमुपदिष्टमिति मन्तव्यम् ।। १२ ।।

अन्नं ब्राह्मणेभ्यः ।। १३ ।।

अन्नं ब्राह्मणेभ्यो दद्यात् ।। १३ ।।

अथ स्वस्त्ययनं वाचयीत ।। १४ ।।

---

[1] गृहप्रवेशनीयाद् व्रतसमाप्तिरर्वाग्—B. [2] तस्मादेष दोषः—A, C, D.
[3] This sentence omitted in A. [4] एवमादिष्टोऽर्थः—A, C, D.
[5] Omitted in A, C, D. [6] कतमस्य—A, C, D.

अथानन्तरं स्वस्त्ययनं वाचयीत—ब्रूध्वं स्वस्तीति[1] ।। १४ ।।

इति प्रथमे अष्टमी कण्डिका

पाणिग्रहणादि गृह्यं परिचरेत् स्वयम् ।। १ ।।

पाणिग्रहणमादिर्यस्य तदिदं पाणिग्रहणादि[2] । यस्मिन् कर्मणि गृह्यते पाणिः तदिदं पाणिग्रहणम् । तदादि पाणिग्रहणादि । किं पुनस्तत् । परिचरणं वेदितव्यम् । यद्येवं पाणिग्रहणादिग्रहणं न कर्तव्यम् । कस्मात् । अधिकृतत्वात् । नेत्युच्यते । गृहप्रवेशनीयोऽधिकृतः । तेन गृहप्रवेशनीयादूर्ध्वं गृह्यपरिचर्या स्यात् । अतः पाणिग्रहणादिग्रहणं क्रियते । ये पुनः पाणिग्रहणमेवाधिकृतं मन्यन्ते तेषां किं प्रयोजनम् । कथमव्यवच्छिन्नानि[3] कर्माणि प्रवर्तेरन्निति । ननु चोदनासामर्थ्यादेव अव्यच्छेदक्रिया[4] भविष्यति। नेत्युच्यते । यावन्नोपशाम्येत गृह्योऽग्निस्तावत् परिचरणं स्यात् । उपशान्ते तु तस्मिन् न स्यात् । कस्मात् । गृह्याभावात् । तेनोपशान्तेऽप्यन्यमग्निमानीय [5]नष्टाहरणप्रायश्चित्तं कृत्वा परिचरणं कथं स्यादिति । अतो वचनमारभ्यते । तत्र गृहसंयोगादस्य गृह्य इत्येषा संज्ञा भवति । तत्र किं परिचरणम् । यदित ऊर्ध्वं विधास्यते । एतत्परिचरणं सहोमकमेके मन्यन्ते । अन्ये पुनर्लौकिकमेवेच्छन्ति । कस्मात् । मन्त्रविरोधात् । नहि कुमार्या[6] मन्त्र उपपद्यते पत्न्या वा । ननु च वचनान्मन्त्रो भवितुमर्हति । यथा पत्नीवाचने पत्न्याः । तद्वदिहापि । तस्मात् तयोरपि मन्त्रोपदेशः क्रियमाणो भवति । तेन मन्त्रवत्परिचरणमिति यदवोचाम तद् युक्तम् । स्वयंग्रहणमुत्तरार्थम्[7] ।। १ ।।

---

1 Omitted in A, C, D. 2 किं तस्य कर्म पाणिग्रहणादि added in A, C, D. 3 स्थितानि added in B. 4 अविच्छिन्ना क्रिया—A. 5 All the MSS. read दृष्टकाल आहरणे 6 कन्यायाः—B; A adds तस्या वा. 7 क्रियते—added in B.

पत्न्यपि वा ॥ २ ॥

पत्नी वा परिचरेत् । यथा परिचरणं तदुक्तम् ॥ २ ॥

पुत्रः कुमार्यन्तेवासी वा ॥ ३ ॥

अथवा पुत्रादयः परिचरणक्रियां कुर्वन्ति । [1]अन्तेवासीति शिष्य उच्यते । अन्ये पुनरन्यं ब्रुवते ॥ ३ ॥

नित्यानुगृहीतः स्यात् ॥ ४ ॥

अनुशब्दोऽयं परिशब्दस्य स्थाने द्रष्टव्यः । नित्यं परिगृहीतः स्यादिति । एतदुक्तं भवति । तत्र यजमानस्य पत्न्या वा समीपे कथमस्य नित्यं स्थानं स्यादिति । यजमानेन पत्न्या वा नित्यं परिगृहीतः कथं स्यादिति । अथवा होष्यद्धर्माणां प्रतिष्ठापनान्तानां कथमभ्यासो न स्यादित्येतदर्थं वचनमारभ्यते । कथं वा प्राप्नोति । 'अथ खलु यत्र क्वच होष्यन् स्यात्' (१. ३. १) इति वचनात् । अथाहरहरेते धर्माः प्राप्नुवन्ति । होमसंयोगात् । देशान्तरगमने वा देशसंस्कार इति कृत्वा प्रवृत्तिः स्यात् । तन्निवृत्त्यर्थं वचनमारभ्यते । नित्यं[2] सकृदेव परिगृहीतो भवतीति ॥ ४ ॥

यदि तूपशाम्येत् पन्त्युपवसेदित्येके ॥ ५ ॥

यदि खलूपशाम्येत[3] पत्न्या उपवासो भवतीत्येके आचार्या मन्यन्ते । अन्ये पुनर्यजमानस्यैवेच्छन्ति । तन्न । कथं ज्ञायते । यदि तूपशाम्येदुपवसेत् पत्नीत्येके इत्येवं वक्तव्ये यदेवं ब्रूते । तेन यजमानस्य

---

[1] तत्र—added in B. [2] नित्यः—A, C, D. [3] उपशाम्येत्—A, C.

न भवति । अन्ये पुनरन्यत् प्रायश्चित्तमिच्छन्ति शास्त्रान्तरदृष्टम् अपि वोत्तरया[1] जुहुयादिति । तत्र 'अयाश्च' (आ० श्रौ० १. ११. १३) इत्यनया जुहुयात्[2] । एवमेके ।। ५ ।।

तस्याग्निहोत्रेण प्रादुष्करणहोमकालौ व्याख्यातौ ।। ६ ।।

तस्य । कस्य । गृह्यस्य । अग्निहोत्रेण प्रादुष्करणं होमकालश्च व्याख्यातः । तत्र तस्येति वचनमपार्थकम् । कस्मात् । अधिकृतत्वात् । उच्यते । तस्यग्रहणं क्रियते योगविभागप्रदर्शनार्थम् । 'तस्याग्निहोत्रेण' विधिर्व्याख्यातः । किमेवं सिद्धं भविष्यति । तस्याग्निहोत्रेणैव [3]विधिर्व्याख्यातो वेदितव्यः, नान्येनेति । तेन पाकयज्ञतन्त्रं निवृत्तं भवति । नान्यत् किंचन कुतश्चित् प्राप्नोति । एवं सति दोषः । होष्यद्धर्माणामपि निवृत्तिः प्राप्नोति। न भविष्यति । प्राक् कृतो यत्नः यत्रक्वचग्रहणम्[4] । तेन प्रतिषिद्धविषयेऽपि धर्मप्राप्तिः । एवं चेदग्निहोत्रेणेत्यतिप्रसक्तो विधिः । तेनोत्तरमारभ्यते । प्रादुष्करणहोमकालावेव भवतो नान्यदित्येवमपि । अन्यन्न प्राप्नोति । परिसंख्यानात् ।। ६ ।।

होम्यं च मांसवर्जम् ।। ७ ।।

होम्यं चाग्निहोत्रेण व्याख्यातं मांसं वर्जयित्वा । मांसप्रतिषेधान्मन्यामहे यथान्यान्यग्निहोत्रद्रव्याणि स्वशास्त्रे दृष्टानि शास्त्रान्तरे विहितानि च परिसंख्यातानि नव[5] द्रव्याणि भवन्तीति ।। ७ ।।

कामं तु व्रीहियवतिलैः ।। ८ ।।

---

[1] चोत्तरया—B.
[2] जुहुयात्—omitted in A, C, D.
[3] Portion from here up to तेन प्रतिषिद्ध° omitted in A, C, D.
[4] अतिरिच्यते—added in B.
[5] परिसंख्यातानि नव—omitted in B.

व्रीह्यादिभिर्होमः कर्तव्यः। कामं त्विति कस्मादुच्यते। वाशब्दः कर्तव्यः। वाशब्दे क्रियमाणे तुल्यविकल्पः स्यात्। न चेष्यते। तेन यदा पूर्वोक्तानि द्रव्याणि न सन्ति तदा व्रीह्यादिभिर्होमो यथा स्यादित्यतः कामं त्वित्युच्यते। अथात्र संशयः। किं व्रीह्यादिभिः समस्तैर्होमः उतान्यतरेणेति। समस्तैरिति। कस्मात्। समासनिर्देशात्। न भविष्यति। किं कारणम्। न्यायविरोधात्। अन्यतरेणापि क्रियमाणेऽसावर्थः साधितो भवति। शास्त्रान्तरप्रसिद्धेश्च। येन व्रीहयोऽपि पृथक् चोद्यन्ते यवा अपि पृथक् चोद्यन्ते—'व्रीहिभिर्यजेत। यवैर्यजेत' इति। स्वशास्त्रेऽपि दर्शनान्न भविष्यति समस्तैर्होमः। वक्ष्यति—'पृथक् पूर्णशरावाणि निदधाति' (१. १७. ३) इति ॥ ८ ॥

अग्नये स्वाहेति सायं जुहुयात्। सूर्याय स्वाहेति प्रातः ॥ ९ ॥

आभ्यां मन्त्राभ्यां सायं प्रातर्जुहोति[1] ॥ ९ ॥

तूष्णीं द्वितीये उभयत्र ॥ १० ॥

तूष्णींग्रहणं तूष्णींहोमधर्मप्राप्त्यर्थम्। उभयत्रेति सायं प्रातश्चेत्यर्थः ॥ १० ॥

इति प्रथमे नवमी कण्डिका

अथ पार्वणः स्थालीपाकः ॥ १ ॥

अथशब्दोऽधिकारार्थः। पार्वण इति। पर्वणि भवः पार्वणः। तत्र पक्षसंधिः पर्वेत्युच्यते। पौर्णमासी चामावास्या च। अत्र पर्वग्रहणं[2]

---

[1] होमः—A, D. [2] पार्वणग्रहणं—B.

न कर्तव्यम् । कस्मात् । 'तस्य दर्शपूर्णमासाभ्यामुपवासः' इति वचनात् पर्वण्येव भविष्यति । दर्शपूर्णमासव्यपदेशादुपवास एव प्रसज्येत । न कर्मणः कालः । पाणिग्रहणादिवचनादहरहः क्रिया प्राप्नोति । सा मा भूदिति कृत्वा पार्वणग्रहणं क्रियते । स्थालीपाक इति कर्मणो नामधेयम् ।। १ ।।

तस्य दर्शपूर्णमासाभ्यामुपवासः ।। २ ।।

तस्य । कस्य । पार्वणस्य । दर्शपूर्णमासाभ्यामुपवासो व्याख्यातः । तस्येति न वक्तव्यम् । प्रकृतत्वात् । उच्यते । तस्यग्रहणं हि नियमार्थम् । कः पुनर्नियमः । तस्यैव पार्वणस्य कथमयमुपवासविधिः स्यादन्यत्र मा भूदिति । क्व प्रसज्यते । 'एतत् तन्त्रम्' (१. १०. २८) इति सर्वपाकयज्ञेष्वेतत् तन्त्रं भवति । एवमुपवासोऽपि सर्वत्र स्यात् । स मा भूदित्यतो नियमः क्रियते । अथ कीदृग्लक्षण[1] उपवासः । तत्रायमुपवासशब्दोऽभोजने प्रसिद्धो भवति लोके । इह तु नाभोजने । कुतः । सकृद्भोजने शास्त्रान्तरे विहितत्वात् ।। २ ।।

इध्माबर्हिषोश्च संनहनम् ।। ३ ।।

इध्माबर्हिषोश्च संनहनं, बन्धनमित्यर्थः । तत्तु दर्शपूर्णमासाभ्यां व्याख्यातम् । शास्त्रान्तरे यथादृष्टं संनहनं तथा कर्तव्यं समन्त्रकममन्त्रकं वा ।। ३ ।।

देवताश्चोपांशुयाजेन्द्रमहेन्द्रवर्जम् ।। ४ ।।

देवताश्च दर्शपूर्णमासाभ्यां व्याख्याताः । तद्व्यपदेशात् सर्वा देवताः प्राप्नुवन्ति । तत्र प्रतिषेधः । उपांशुयाजेन्द्रमहेन्द्रवर्जम् । उपांशुयाजं वर्जयित्वा इन्द्रं महेन्द्रं चेति । तेन पौर्णमास्यामग्निरग्नीषोमौ च अमा-

---

[1] कीदृशलक्षणोऽयमुपवासः—A, C, D.

वास्यायामग्निरिन्द्राग्नी च द्वे द्वे देवते भवतः । अथात्र विचारः क्रियते । इन्द्रमहेन्द्रयोः प्रतिषेधोऽपार्थक इति । कस्मात् । सांनाय्याभावात् । नेत्युच्यते । इह संनयत एते देवते भवतः । तत्र च संनयन्निति कर्ता निर्दिश्यते । तेन वैतानिके योऽसौ संनयन् यदि भवति इहापि संनयन्नेव भवति । तेन संनयतः कर्तुः इन्द्रो महेन्द्रो वा विकल्पेन भवति । तस्मात् प्रतिषेधो न्याय्यः । यद्येवं संनयत इन्द्राग्नी न प्राप्नोति । कस्मात् । 'इन्द्राग्नी अमावास्यायामसंनयतः' (आ० श्रौ० १. ३. १०) इति वचनात् । तस्मादग्निरेवैकः प्राप्नोति । नेत्युच्यते । इन्द्राग्नी द्वितीया देवता भवति । कथम् । असंनयन्नेवेति[1] कृत्वा । कथं पुनरसावसंनयन् भवति । देवताप्रतिषेधात् । तदभावे च[2] सांनाय्याभावः । कथम् । भोक्त्री हि देवता । भोज्यं सांनाय्यं हविः । भोक्तृदेवताप्रतिषेधात् तेन भोज्यमपि सांनाय्यं प्रतिषिद्धं भवति । सांनाय्यप्रतिषेधाच्चासंनयन्[3] भवति । तस्मादसंनयत इन्द्राग्नी देवते एवेति यदुक्तं तदुपपद्यते ।। ४ ।।

काम्या इतराः ।। ५ ।।

काम्या इतरा देवता भवन्ति । उक्ताभ्यश्च[4] या अन्या उपांश्वाद्याः । तत्र संशयः । किमेता एव विधीयन्ते, आहोस्विदन्या इति । उभयथाप्यपार्थकम् । कथम् । 'अथ काम्यानां स्थाने' (३. ६. १) इति वक्ष्यति । नेत्युच्यते । सोऽयमुपांश्वादीनां प्रतिषेधः कृतः । तेन सर्वत्रैव प्रतिषेधः स्यात् । तेनेदमारभ्यते । नेत्युच्यते । 'अथ काम्यानाम्' इत्यविशिष्टवचनम् । तेन काम्यानां स्थाने न भविष्यति प्रतिषेधः । तस्मादप्रयोजनम् । एवं तर्हि कामसंयोगेन[5] पार्वणे कथं प्रयोगः स्यादित्येतदर्थं[6] वचनमारभ्यते । अथ प्रयोगे सतीन्द्रमहेन्द्रयोः केन द्रव्येण प्रयोगः कर्तव्यः । तत्र सांनाय्येन

---

[1] असंनयन्नित्येव—B. [2] तदभावेऽपि च—B. [3] असंनयनं—C.
[4] उक्ताभ्यां—A. [5] कामसंयोगे पर्वणि—B. [6] इत्येवमर्थं—A, C, D.

प्राप्नोति । तथा दृष्टत्वात् । नेत्युच्यते । इह स्थालीपाकेनैव होमः कर्तव्यः । सांनाय्याभावात् । अथोपांशुयाजस्यापि चरुः प्राप्नोति । नेत्युच्यते । आज्येनैवोपांशुयाजः कर्तव्यः ।[1] कस्मात् । आज्यस्य विद्यमानत्वात् ।। ५ ।।

तस्यै तस्यै देवतायै चतुरश्चतुरो मुष्टीन् निर्वपति पवित्रे अन्तर्धायामुष्मै त्वा जुष्टं निर्वपामीति ।। ६ ।।

तस्यै तस्या इति वीप्सा क्रियते । चतुरश्चतुर इत्येषापि । मुष्टीन् निर्वपति । परिमाणार्थो निर्देशः । निर्वपतीति क्रिया चोद्यते । पवित्रे प्रागुक्ते । ते अन्तर्धाय अमुष्मै त्वा जुष्टं निर्वपामीत्यनेन मन्त्रेण । तत्रामुष्मा इति [2]स्थानविभक्त्यर्थो निर्देशः ।। ६ ।।

अथैनान् प्रोक्षति यथानिरुप्तममुष्मै त्वा जुष्टं प्रोक्षामीति ।। ७ ।।

अथशब्दः प्रयुज्यते । कथं सर्वेषु निरुप्तेषु प्रोक्षणं स्यादिति । ते तु निर्वपणप्रोक्षणे एकस्मिन्नेव पात्रे भवतः, न नानापात्रयोरिति । कुत एतत् । उत्तरत्र विभागदर्शनात् । यथाशब्दः प्रकारवाची । येन प्रकारेण निर्वापः कृतः तेन प्रकारेण प्रोक्षणमपि कर्तव्यम्[3] । केन पुनः प्रकारेण निर्वपणं कृतमिति । तस्यै तस्यै चतुरश्चतुरः पवित्रे अन्तर्धायेति । प्रोक्षणेऽपि समोऽयं विधिः प्रसज्यते[4] ।। ७ ।।

अवहतांस्त्रिष्फलीकृतान् नाना श्रपयेत् ।। ८ ।।

---

[1] Lacuna in A, C, D. [2] स्थाने—B. [3] क्रियते—A, D; क्रियेत—C. [4] प्रसज्येत—A.

अवहतानिति । अवहननं कृत्वा निष्फलीकरणं करोति । फलीकरणं नाम तुषविमोकः । शुक्लीकृतानित्यर्थः । अत्र अर्थात् त्रिः प्रक्षालनं भवति । नाना श्रपयेत् । नाना, न सहेत्यर्थः ।। ८ ।।

समोप्य वा ।। ९ ।।

एकपात्रे श्रपणं भवति ।। ९ ।।

यदि नाना श्रपयेद् विभज्य तण्डुलानभिमृशेदिदममुष्मा इदममुष्मा इति ।। १० ।।

यदीत्यनित्यार्थे । नानाश्रपणं भवति चेत् ततस्तण्डुलान् विभज्याभिमृशेद् इदममुष्मा इदममुष्मा इति ।। १० ।।

यद्यु वै समोप्य व्युद्धारं जुहुयात् ।। ११ ।।

यदि समोप्य श्रपयेद् तद्[1] व्युद्धारं जुहुयात् । व्युद्धृत्य व्युद्धृत्य व्युद्धारम् । नानापात्रे कृत्वेत्यर्थः । व्युद्धारं कृत्वाभिमृश्य जुहुयात् । शृतं[2] पात्रे विभज्याभिमृशेत् । इदममुष्मा इदममुष्मा इति । जुहुयादिति न वक्तव्यम् । कस्मात् । उत्तरत्र होमं वक्ष्यति । ब्रवीति । जुहुयादिति । उच्यते कथं होमकाले व्युद्धारः स्यादिति ।। ११ ।।

शृतानि हवींष्यभिघार्योदगुद्वास्य प्रत्यभिघार्य[3] बर्हिष्यासाद्येध्ममभिघार्य ‘ अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय ’ स्वाहेति[4] ।। १२ ।।

---

[1] तद्—omitted in A, C, D. [2] ततः—A, C, D. [3] Omitted in A, C, D. [4] B reads the next *sūtra* along with this *sūtra*.

शृतानि पक्वानीति । नाप्यशृतानि नापि दग्धानीत्यर्थः । अभिघार्योदगुद्वास्येति पाठः । उदङ्ङुद्वास्येत्येवं पठ्यमाने तु उदङ्मुखस्योद्वासनं प्राप्नोति । न चेष्यते । तस्मादुदगुद्वास्यति पाठः क्रियते । बर्हिष्यासाद्य[1] । तत्र केचिदेतस्मिन्नेव काले बर्हिषामास्तरणं कुर्वन्ति, केचित् पूर्वास्तृतमेव बर्हिःशब्देन कल्पयन्ति । एतस्मिन् पुनः कालेऽभिघारणमिच्छन्ति । इध्ममभिघार्य 'अयं त इध्म आत्मा' इत्यनेन मन्त्रेण जुहोति ।। १२ ।।

तूष्णीमाघारावाघार्याज्यभागौ जुहुयात् । अग्नये स्वाहा सोमाय स्वाहेति ।। १३ ।।

तूष्णीमिति मन्त्रप्रतिषेधोऽपार्थकः । कस्मात् । अनुपदेशान्मन्त्रस्य । ब्रवीति । तुष्णींग्रहणं कुर्वन्नेतज्ज्ञापयति—[2]मन्त्रवर्जं येऽन्ये धर्मास्ते पुनः कथं प्रवर्तेरन्निति । के पुनस्ते धर्माः । पात्रं प्रदेश[3] इत्येवमादयः । आज्यभागावित्युत्तरयोराहुत्योः संज्ञा । प्रयोजनं ' तथाज्यभागौ पाकयज्ञेषु' (१. ३. ५) इति ।। १३ ।।

उत्तरमाग्नेयं दक्षिणं सौम्यम् ।। १४ ।।

आग्नेयमाज्यभागमुत्तरपार्श्वे जुहोति । सौम्यं दक्षिणे पार्श्वे[4] ।।१४।।

किमर्थं पुनरनयोर्देशो विधीयते । देशविधानकारणमुत्तरमारभ्यते—

विज्ञायते—'चक्षुषी वा एते यज्ञस्य यदाज्यभागौ' ।।१५।।

विज्ञायत इति ब्राह्मणवाक्यमिदमाकृष्यते[5] । किमर्थम् । यथान्येषु विधिषु न ब्राह्मणवाक्यान्वाकर्षणं[6] क्रियते । इह [7]श्रुतिवाक्येनाज्यभागयोः

---

[1] Omitted in A, C, D. [2] मन्त्रवर्जिता ये धर्माः—A, C, D. [3] देशः—A, C, D. [4] जुहोति—added in A, C, D. [5] इदम्—omitted in A, C, D. [6] वाक्यान्वेषण°—A, C, D. [7] तु—added in A.

दक्षिणसंस्थतां विदधाति । [1]तज्ज्ञापयति—अन्यत्रोदक्संस्थता प्राक्संस्थता वा[2] भवतीति ।। १५ ।।

इहाप्युदक्संस्थतास्तु । प्रथमं सौम्यो हूयतामित्यत उत्तरमारभ्यते—

तस्मात् पुरुषस्य हि प्रत्यङ्मुखस्यासीनस्य दक्षिणमक्ष्युत्तरं भवत्युत्तरं दक्षिणम् ।। १६ ।।

आग्नेयस्त्वाज्यभागो यस्माद् दक्षिणमक्षि भवति तस्मान्न शक्यते आग्नेयः पश्चाद्धोतुम् ।। १६ ।।

मध्ये हवींषि ।। १७ ।।

जुहोति । कस्य मध्ये । आज्यभागयोर्मध्ये ।। १७ ।।

प्रत्यक्तरं वा ।। १८ ।।

प्रत्यक्तरे वा देशे हवींषि जुहोति । आज्यभागयोरेव । प्रत्यक्तरमिति पश्चिमतरमित्यर्थः ।। १८ ।।

प्राक्संस्थान्युदक्संस्थानि वा ।। १९ ।।

प्राक्संस्थानि वा हवींषि भवन्ति, उदक्संस्थानि वा । तदिदं नारब्धव्यम् । सिद्धत्वात् । नेत्युच्यते । यदीदं नारभ्येत मध्ये हवींषीति मध्याधिकारोऽनुवर्तते । तस्मादारब्धव्यम् । अथात्र संशयः । किमेकैकाहुतिरुदक्संस्था, आहोस्वित् सर्वा आहुतयः उदक्संस्था भवन्तीति । तत्र सर्वासामाहुतीनामुदक्संस्थता भवति ।। १९ ।।

उत्तरपुरस्तात् सौविष्टकृतम् ।। २० ।।

---

[1] तत्—omitted in A, C, D.

[2] प्राक्संस्थता वा—omitted in B.

उत्तरपूर्वदेशे सौविष्टकृतं जुहोति ।। २० ।।

मध्यात् पूर्वार्धाच्च हविषोऽवद्यति ।। २१ ।।

हविषो मध्याच्च पूर्वार्धाच्चावद्यति ।। २१ ।।

मध्यात् पूर्वार्धात् पश्चार्धादिति पञ्चावत्तिनाम्[1] ।। २२ ।।

[1]पञ्चावत्तिनामयमवदानक्रमो भवति । तत्र पश्चार्धाच्चेति वक्तव्यम् । एवमुच्यमाने सिध्यत्यर्थः[2] । क्रमो न सिध्येत । प्राक्संस्थतोदक्संस्थतानियमात् । तेन क्रमार्थमिदं वचनम्[3] । कथमनेन क्रमेणावदानानां ग्रहणं भवतीत्यतो वचनमारभ्यते ।। २२ ।।

उत्तरार्धात् सौविष्टकृतम् ।। २३ ।।

उत्तरार्धात् सौविष्टकृतमवदानमवद्यति । अथात्र संशयः । विवक्षितमेकवचनमविवक्षितमिति । उच्यते । विवक्षितमेकवचनम् । कस्मात् । उपदशात् । एवं सति विवक्षिते एकवचने दोषः प्राप्नोति । को दोषः । चतुरवत्तिनां त्र्यवत्तता प्राप्नोति । कथम् । उपस्तरणमवदानं प्रत्यभिघारणमिति । नायं दोषः । द्विः प्रत्यभिघारणं करिष्यते । एवमपि पञ्चावत्तिनां चतुरवत्तता प्राप्नोति । नैष दोषः । तत्रापि त्रिः प्रत्यभिघार्यते[4] । तच्च न । कस्मात् । त्रिरभिघारणस्याविहितत्वात् । तेनैष दोषः प्राप्नोति एकवचने प्रतीयमाने । तस्मात् सौविष्टकृतमिति जातिवाचकोऽयं[5] निर्देशः । तस्मादुत्तरार्धभागाद्धविषः पूर्वोक्तेनावदानधर्मेण स्विष्टकृतो ह्यवदानानि ग्राह्याणि ।। २३ ।।

---

1 पञ्चावत्तीनाम्—B. 2 सिध्यत्ययमर्थः—A, C, D. 3 A, C, D omit this sentence. 4 त्रिरभिघारणं भवति—A, C, D. 5 जातिवाचिनो—C; अयं—omitted in A, D.

अनेन मन्त्रेण स्विष्टकृद्धोतव्यः—

' यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् । अग्निष्टत् स्विष्टकृद् विद्वान् त्सर्वं स्विष्टं सुहुतं करोतु मे । अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे सर्वान् नः कामान् त्समर्धय स्वाहा ' इति ।। २४ ।।

नात्र हवींषि प्रत्यभिघारयति । [स्विष्टकृतं द्विरभिघारयति][1] ।। २५ ।।

अत्र स्विष्टकृति हवींषि न प्रत्यभिघारयति । अत्रग्रहणमपार्थकम् । कस्मात् । अधिकृतत्वात् । नेत्युच्यते । न हवींषि प्रत्यभिघारयतीत्युच्यमाने सर्वत्र प्रतिषेधः स्यात् प्रत्यभिघारणस्य । तस्मादत्रग्रहणं क्रियते ।। २५ ।।

बर्हिषि पूर्णपात्रं निनयेत् ।। २६ ।।

पूर्णपात्रमपां पूर्णं पात्रं बर्हिषि निनयेत् निषिञ्चेदित्यर्थः । एतत् पूर्णपात्रं प्रागेव पूरितं भवति । कथं गम्यते । तद्भूतोपदेशात् ।। २६ ।।

एषोऽवभृथः पाकयज्ञानाम्[2] ।। २७ ।।

यदिदं पूर्णपात्रनिनयनमवभृथः पाकयज्ञानां भवति । किं पुनः कारणं पूर्णपात्रनिनयनस्य अवभृथत्वं विधीयते । अवभृथसंस्कृतं यथा

---

1 This *sutra* is missing in the MSS., the existence of which is implied in the *bhāṣya* on the previous *sūtra*; cf. द्विरभिघारणं करिष्यते ।

2 A, C, D omit पाक.

स्यादिति । किं प्रयोजनम् । अवभृतधर्माः कथं स्युरिति । के पुनस्ते धर्माः । कालः अभ्युक्षणमित्येवमादयः । कः पुनरवभृथकालः । ऊर्ध्वं सर्वप्रायश्चित्तेभ्यः प्राक् संस्थाजपात् । अथ पुनरत्र सर्वप्रायश्चित्तानि भवन्तीति । भवन्तीत्युच्यते । अथ कस्य सर्वप्रायश्चित्तानि भवन्ति । कर्तुः । नेत्युच्यते । ब्रह्मणः । किमेतावदेव । नेत्युच्यते । निरसनोपवेशने ब्रह्मजपः सर्वप्रायश्चित्तानि संस्थाजप इतीमानि पञ्च कर्माणि ब्रह्मणो भवन्तीति । सत्यां प्रवृत्तौ । पाकयज्ञाधिकारे पाकयज्ञग्रहणं किमर्थम् । न कर्तव्यम् । कर्तव्यं सर्वपाकयज्ञाधिकारार्थम् ।। २७ ।।

एतत् तन्त्रम् ।। २८ ।।

एतत् तन्त्रं सर्वपाकयज्ञानां भवतीत्यर्थः । अथ तन्त्रग्रहणेन किं गृह्यत इति चेदुपवासादिविधानं सर्वं प्राप्नोतीति चेदुपवासो न भविष्यति । कस्मात् । तस्येति नियमितत्वात् । एवं तर्हि इध्माबर्हिषोश्च संनहनमपि न पुनः प्राप्नोति । तस्येत्यधिकृतत्वात् । नानुवर्तिष्यतेऽधिकारः । यद्यधिकारो नानुवर्तते, एवं तर्हि देवता अपि सर्वत्र प्राप्नुवन्ति । नेत्युच्यते । अननुवर्तमानेऽप्यधिकारे देवता अन्यत्र न भविष्यन्ति । कथम् । तन्त्रग्रहणसामर्थ्यात् । प्रत्यक्षविधानाच्च देवतानामन्यत्र । तद्यथा पौर्णमास्यव्यपदेशे सति न देवता भवन्ति । एवमिहापि ।। २८ ।।

हविरुच्छिष्टं दक्षिणा ।। २९ ।।

यद्धुतस्य शिष्टं तद्धविरुच्छिष्टं तद्दक्षिणादाने भवति । दक्षिणादानान्मन्यामहेऽन्यः कर्तेति, स्वयंकर्तृकत्वे सति दक्षिणादानं नोपपद्यते । अथ किं सर्वेषु पाकयज्ञेषु हविरुच्छिष्टं दक्षिणा भवति । नेत्युच्यते । दक्षिणादानं सर्वत्र न प्राप्नोति । कस्मात् । तन्त्रव्यपदेशे कृते अथ दक्षिणा विहिता । यदि दक्षिणादानमभविष्यत्, विधाय दक्षिणादानं

तन्त्रव्यपदेशः कृतः स्यात् । येषु भवति येषु वा न भवति तानुत्तरत्र वक्ष्यामः[1] ॥ २९ ॥

इति प्रथमे दशमी कण्डिका

अथ पशुकल्पः ॥ १ ॥

अथ पशुकल्पो वक्ष्यते । इत उत्तरं यद् वक्ष्यामः, असौ पशुकल्पो वेदितव्यः । तत्रैके नित्यमिमं पशुं मन्यन्ते । यत् त्रेतायां 'षाण्मास्यः[2] सांवत्सरो वा' (श्रौ० सू० ३. ८. ४) इति दृष्टस्तस्य स्थाने[3] एकाग्नावयं पशुर्भवतीति । एवं सति कल्पग्रहणमपार्थकम् । अथ पशुरित्येतावता सिद्धम् । अयं च पशुशब्दः पशुगुणके कर्मणि वर्तते । यथा सोमशब्दश्च सोमगुणके । इह तु नैव पशुमेवोपदिशति—तस्य पशोः कल्प इति । तेन कल्पग्रहणान्मन्यामहे यत्र यत्र[4] पशुश्चोदितस्तत्र तत्रानेन पशुकल्पेन कथं क्रियत इति । तस्मात् कल्पमात्रमेवेदमुपदिश्यते । न नित्यः पशुः । क्व[5] पशुश्चोद्यते यस्यायं कल्पः । अष्टकायां शूलगवे च । यदि तदर्थं पशुकल्प विधानम् उपाकरणोपदेशोऽपार्थकः । कथम् । उभयत्रोपाकरणप्रतिषेधात् । 'प्रोक्षणोपाकरणवर्जम्' (२. ४. १३) इति, 'प्रोक्षणादि समानम्' (४. ८. १५) इति च । तस्मादुपाकरणोपदेशादिह मन्यामहे नित्योऽपि पशुर्भवतीति । नेत्युच्यते । कल्पग्रहणान्न नित्यः पशुर्भवतीति कल्पमात्रमेवात्र विधीयते । ननु चोपाकरणोपदेशोऽपार्थक इति । उच्यते । आतिथ्यकर्मणि पशुर्भविष्यति । तथा मधुपर्के । उत्तरत्र काम्याः पशवो

---

[1] B adds: पूर्णपात्रनिनयनानन्तरं परिस्तरणदर्भांश्च at the end of fo. 40. The next eleven folios are lost. Then begins fo. 52 with मूर्धनि त्रिरवघ्राणं करोति (I. 15. 1). [2] षण्मास्यः संवत्सरो—A, C, D. [3] दृष्टस्थाने—A, C, D. [4] यत्र—omitted in A, C, D. [5] कः—A, C, D.

वक्ष्यन्ते। अथ के काम्या इत्येतस्मिन्नधिकारे। तदुत्तरत्रैव साधयिष्यामः। अथशब्दोऽधिकारार्थः ॥ २ ॥

पशुकल्पविधिमधिकरोति—

उत्तरतोऽग्नेः शामित्रस्यायतनं कृत्वा पाययित्वा पशुमाप्लाव्य पुरस्तात् प्रत्यङ्मुखमवस्थाप्य 'अग्निं दूतम्' (ऋ० सं० १. १२. १) इति द्वाभ्यां हुत्वा सपलाशयार्द्रशाखया पश्चादुपस्पृशेदमुष्मै त्वा जुष्टमुपाकरोमीति ॥ २ ॥

उत्तरतः उदीच्यां दिशि। उत्तरतः कस्य। अग्नेः। शामित्रस्यायतनं कृत्वा। शामित्रो नामाग्निः। तस्यायतनं करोति उत्तरतः। आयतनं नाम स्थानम्। पाययित्वा पशुमाप्लावयति। आप्लाव्य च तं पशुं पुरस्तात् प्रत्यङ्मुखमवस्थाप्य। पूर्वस्यां दिशि। कस्य। अग्नेः। प्रत्यङ्मुखमवस्थाप्य 'अग्निं दूतम्' इति द्वाभ्यां जुहोति।

तत्रैतस्मिन् प्रतीके संशयः। किं कारणम्। अनेकगतत्वात्[1] प्रतीकस्य। कथम्। 'अग्निं दूतं वृणीमहे' (ऋ० सं० १. १२. १), 'अग्निं दूतं पुरो दधे' (ऋ० सं० ८. ४४. ३), 'अग्निं दूतं प्रति यदब्रवीतन' (ऋ० सं० १. १६१. ३), इत्येवमनेकगतत्वात्[1] प्रतीकस्य संशयः। ब्रवीति। अविशेषवचनाद् आदितः संप्रत्ययो भविष्यति। न प्राप्नोति। कस्मात्। क्वचिद्विशेषोपदेशात्। 'प्र द्यावेति दैर्घतमसम्' (आ० श्रौ० ५. १८. १) इति, 'सुसंदृशं त्वेति पङ्क्त्या' (आ० श्रौ० २. १६. ३४) इति, 'अप्सुमन्तौ गायत्रौ' (आ० श्रौ० ६. १३. ४) इति। एवं तर्ह्यन्ततः संप्रत्ययोऽस्तु। तथापि न प्राप्नोति। कस्मात्। विशेषदर्शनात्। तत्रापि 'प्र द्यावेति वासिष्ठम्' (आ० श्रौ० ८. ८. ४) इति।

[1] अनेकऋग्गतत्वात्—E.

किं पुनरत्र प्रतिपत्तव्यम् । सामान्यान्नियमो भविष्यति । अस्ति पुनः किंचित् सामान्यम् । अस्तीति ब्रूमः । तेन 'अग्निं दूतं वृणीमहे' इत्ययमादेशः । कथं गम्यते । सूक्तादौ हीनपादग्रहणं दृष्टम् । तेनेहापि हीनपादग्रहणसामर्थ्यात् सूक्तादिग्रहणं युक्तम् । ब्रवीति । यद्येवमेवमपि दोषः । द्वे सूक्ते प्राप्नुतः । कस्मात् । 'अग्निं दूतम्' इति 'द्वाभ्याम्' इति समाननिर्देशात् सूक्ताभ्यामित्येवं गम्यते । नेत्युच्यते । यत्र हि सूक्तादिग्रहणे अनेकसूक्तं भवति तत्र यत्नान्तरमारभ्यते । यथा 'उपप्रयन्त इति सूक्ते,' 'इमे विप्रस्येति सूक्ते' (आ० श्रौ० ४. १३. ७) इति सूक्तग्रहणं करोति । तेनेह सत्यपि सूक्तादौ ग्रहणे नैव सूक्तग्रहणं प्राप्नोति । यत्नान्तराभावात् । तस्माद् [1]द्वाभ्यामृग्भ्यामिति प्रत्येतव्यम् । सामान्यात् सूक्तादौ च ग्रहणमिति । सपलाशयार्द्रशाखया पश्चादुपस्पृशेदमुष्मै त्वा जुष्टमुपाकरोमीति । सपलाशयेति किमुक्तं भवति । सपर्णयेत्यर्थः । आर्द्रशाखयेति शुष्कशाखया मा भूदिति । पश्चादिति पृष्ठत इत्यर्थः । उपस्पृशेत् अन्वारभेदित्यर्थः । अमुष्मै त्वा जुष्टमुपाकरोमीत्यनेन मन्त्रेण ।। २ ।।

व्रीहियवमतीभिरद्भिः पुरस्तात् प्रोक्षति—अमुष्मै त्वा जुष्टं प्रोक्षामीति ।। ३ ।।

व्रीहियवमतीभिरद्भिः पुरस्ताद् अग्रत इत्यर्थः । प्रोक्षति । अमुष्मै त्वा जुष्टं प्रोक्षामीत्यनेन मन्त्रेण ।। ३ ।।

तासां पाययित्वा दक्षिणमनु बाहुं शेषं निनयेत् ।। ४ ।।

तासामपां पाययति । पीतानां यच्छेषं दक्षिणं बाहुमनु निनयति । निषिञ्चतीत्यर्थः । तासामिति ग्रहणमपार्थकम् । कस्मात् । अधिकृतत्वात् । उच्यते । कर्तव्यमेव । किं कारणम् । कथं नित्यं पायनं स्यात् ।

---

[1] द्वाभ्यां—repeated in A, C, D.

अन्यथा हि प्रोक्षणावशिष्टानामेव पायनं स्यादिति। तत्र को दोषः स्यात्। प्रोक्षणाभावे पायनाभावः स्यात्, निमित्ताभावे नैमित्तिकस्याप्यभावः। क्व पुनः प्रोक्षणं नास्ति, 'प्रोक्षणोपाकरणवर्जम्' (२. ४. १३) इत्यत्र। तेन प्रोक्षणाभावेऽपि पायनं यथा [1]स्यादित्यतस्तासामिति नित्यार्थं वचनम् ॥ ४ ॥

आवृतैव पर्यग्निकृत्वोदञ्चं नयन्ति ॥ ५ ॥

आवृतेति तूष्णीम् अमन्त्रकमित्यर्थः। मन्त्रप्रतिषेधोऽपार्थकः। कस्मात्। अनुपदेशान्मन्त्रस्य। ब्रवीति। अप्राप्तमन्त्रप्रतिषेधं कुर्वन्नेतमर्थं ज्ञापयति–समन्त्रकस्य पर्यग्निकरणस्य ये धर्मास्ते कथं प्रवर्तेरन्निति। अतो मन्त्रप्रतिषेधः क्रियते। के पुनस्ते धर्माः। त्रिः पर्यग्निकरणं पश्वादीनां च द्रव्याणाम्। उदञ्चं च नयन्ति। उदीचीं नयन्ति ॥ ५ ॥

तस्य पुरस्तादुल्मुकं हरन्ति ॥ ६ ॥

तस्य पशोः पुरस्ताद् अग्रत इत्यर्थः। उल्मुकमिति दीप्तकाष्ठम्[2]। तस्येति न वक्तव्यम्। कस्मात्। अधिकृतत्वात्। पुरस्ताद्धरन्तीत्युच्यमाने संशयः स्यात्। पुरस्ताच्छब्दश्चानेकार्थः। पूर्वदिग्वाच्यग्रतोवाची प्रथमवाचीत्येवं पुरस्ताच्छब्दस्यानेकार्थवाचित्वात् तस्यग्रहणं क्रियते। कथमग्रतो हरणं स्यान्न पूर्वेण। नापि[3] प्रथमम्। तस्मात् तस्येति वक्तव्यम् ॥ ६ ॥

शामित्र एष भवति ॥ ७ ॥

एषोऽग्निः शामित्रो नाम भवति। यस्मादयं शामित्रस्तस्मात् तस्मिन्नायतनेऽस्य प्रतिष्ठापनं भवति, यत्तत् प्रागुक्तं शामित्रस्यायतनमिति ॥ ७ ॥

---

[1] स्यादतः—A, D. [2] प्रदीप्तं काष्ठम्—E. [3] पूर्वेणापि न—A, C, D.

वपाश्रपणीभ्यां कर्ता पशुमन्वारभते ।। ८ ।।

तत्र वपाश्रपण्योः सिद्धयोरयमुपदेशः । काष्मर्यमय्यौ भवतः । तत्रैका द्विशाखा, अन्या विशाखा । ताभ्यां वपाश्रपणीभ्यां कर्ता पशुमन्वारभेत । कः पुनः कर्ता । यःकश्चित् समर्थः ।। ८ ।।

कर्तारं यजमानः ।। ९ ।।

कर्तारमन्वारभते यजमानः । अत्र यजमानशब्दो नोपपद्यते । यजन् पशुं बध्नन् यजमानो द्रष्टव्यः ।। ९ ।।

पश्चाच्छामित्रस्य प्राक्शिरसं प्रत्यक्शिरसं वोदक्पादं संज्ञप्य पुरा नाभेस्तृणमन्तर्धाय वपामुत्खिद्य वपामवदाय वपाश्रपणीभ्यां परिगृह्याद्भिरभिषिच्य शामित्रे प्रताप्याग्रेणैतमग्निं हृत्वा दक्षिणत आसीनः श्रपयित्वा परीत्य जुहुयात् ।। १० ।।

शामित्रस्य पश्चिमदेशे बर्हिरवस्तीर्य । 'तदध्वर्युर्बर्हिरधस्तादुपास्यति' (ऐ० ब्रा० २. ११) इति श्रुतिसामर्थ्याद् बर्हिषो निधानं भवति । प्राक्शिरसं, प्राच्यां दिशि शिरो यस्य सोऽयं प्राक्शिराः तम् । प्रत्यक्शिरसं वा । उदक्पादम् उदीच्यां दिशि पादौ यस्य सोऽयमुदक्पादः तम् । संज्ञप्य उज्झितजीवमित्यर्थः । प्राक्शिरसं प्रत्यक्शिरसं वेति न वक्तव्यम् । उदक्पादमिति सिद्धत्वात् । न सिध्यति । उदक्पादश्च तावदेवासौ स्यात् । न प्रत्यक्शिरा नापि प्राक्शिराः । ऊर्ध्वशिरा मा भूदिति कृत्वा, अतः प्राक्शिरस्त्वं प्रत्यक्शिरस्त्वं वा विधीयते । पुरा नाभेः अर्वागित्यर्थः । अनतिक्रम्य पशुम् । कथं वातिक्रमणं स्यात् । यदासौ प्राक्शिराः स्यात् संज्ञपितस्तदा दक्षिणाङ्गकारितायामतिक्रम्य पशुं वपामुत्खिदेत् । तन्मा भूदित्यतः पुरेत्युच्यते । तृणमन्तर्धायेति । वपामुत्खिद्य उद्धृत्येत्यर्थः ।

वपामवदायेति अवखण्ड्येत्यर्थः । अथ पुनर्वपाग्रहणं किमर्थम् । कृत्स्नावदानार्थम् । ननु चोपदेशादेव कृत्स्नावदानता सिध्यति, तेनेह यत्नेन कृत्स्नावदानतां साधयन्नेतज्ज्ञापयति । अन्येष्ववदानेषु अकृत्स्नानि ग्राह्याणि भवन्तीति । अवखण्ड्य वपाश्रपणीभ्यां गृह्णाति । परिगृह्याद्भिरवसिञ्चति । अवसिच्य शामित्रे प्रतापयति । तत्र किमिदं प्रतापनम् । श्रपणार्थम् आहोस्विद् धर्ममात्रमिति । धर्ममात्रमित्येवमुपदिशन्ति । कुतः । उत्तरत्र श्रपणविधानात् । अग्रेणैतमग्निं हृत्वा । तत्रैतमग्निमिति कतरोऽत्राग्निर्निर्दिश्यते । औपासनः । कस्मात् । प्राधान्यात् । इतरस्य संज्ञान्तरेण विहितत्वात् । दक्षिणत आसीनः श्रपयित्वा । अस्यैवाग्नेः दक्षिणत आसीनः श्रपयति । तत्रार्थाद् घृतपरिषेको भवति । श्रपयित्वा परीत्य जुहुयात् । उभावप्यग्नी पर्यावर्तते । तेनैव पथा येन स[1] गतो भवति । अमुष्मा इति मन्त्रेण [जुहुयात्] ।। १० ।।

एतस्मिन्नेवाग्नौ स्थालीपाकं श्रपयन्ति ।। ११ ।।

औपासने स्थालीपाकं श्रपयन्तीत्यर्थः । एतस्मिन्निति न वक्तव्यम् । एतस्मिन्नित्युच्यमाने[2] कथमौपासने श्रपणं स्यादिति । ननु च स एवाधिकृतः । सत्यप्यधिकारे नैव तत्र प्राप्नोति । कस्मात् । इतरस्य श्रपणार्थत्वात् । तस्मादेतस्मिन्नित्युच्यते नियमार्थम् ।। ११ ।।

एकादश पशोरवदानानि सर्वाङ्गेभ्योऽवदाय शामित्रे श्रपयित्वा हृदयं शूले प्रताप्य स्थालीपाकस्याग्रतो जुहुयात् ।।१२।।

एकादशावदानानि भवन्ति पशोः सर्वाङ्गेभ्यश्च । तत्र पशुग्रहणमपार्थकम् । कस्मात् । अधिकृतत्वात् । उच्यते । पशुग्रहणेन नायं पशुर्गृह्यते । यश्च त्रेतायाः पशस्तस्य यान्यवदानान्येकादश विहितानि तेषां

[1] अनेनैब यथा स—A, D. [2] अनुच्यमाने—A, D.

ग्रहणं कथं स्यादिति । अतः पशुग्रहणं क्रियते । कानि पुनस्तान्यवदानानि । उच्यते । हृदयं जिह्वा वक्षो यकृद् वृक्या सव्यं दोः पार्श्वे दक्षिणा श्रोणिः गुदमिति एकादशैतानि पशोरवदानानि । अथ तान्यवदानानि भवन्ति । सर्वाङ्गग्रहणं किमर्थम् । कथं सर्वेभ्योऽङ्गेभ्यो ग्रहणं स्यादिति । इतरथा ह्यनियमः स्यात् । पशुग्रहणेन नन्ववदाननियमः सिद्धः । तस्मात् सर्वाङ्ग-ग्रहणं न कर्तव्यम् । एवं तर्ह्येकादशभ्योऽवदानेभ्यः कथमतिरिक्तानि विकल्पेन स्युरित्यतः सर्वाङ्गग्रहणं क्रियते । कानि पुनरङ्गानि सर्वाङ्ग-ग्रहणेन गृह्यन्ते । 'षड्विधो वै पुरुषः षडङ्गः' (ऐ० ब्रा० २. ३९) इति । बाहू ऊरू हृदयदेशः शिर इति एतानि षड् वैकल्पिकानि भवन्ति । एकादश तु नित्यानि । हृदयं शूले प्रताप्य शामित्रे श्रपयति । स्थालीपाकस्याग्रतो जुहुयात् । स्थालीपाकस्य प्रथमं जुहोति । यदा स्थालीपाकः पृथक् क्रियते अवदानानि च तदा अनयोः पृथक् प्रयोगे स्विष्टकृदपि भिद्यते । भेदकारण-मुक्तमुत्तरत्र वक्ष्यामः ।। १२ ।।

अवदानैर्वा सह ।। १३ ।।

अवदानैर्वा सह जुहोति स्थालीपाकमग्रतोऽवदानानाम् ।। १३ ।।

एकैकस्यावदानस्य द्विर्द्विरवद्यति ।। १४ ।।

एकैकस्यावदानस्य द्विर्द्विरवद्यतीति न वक्तव्यम् । कस्मात् । सिद्धत्वात् । ब्रवीति । नियमार्थम् । पञ्चावत्तिनामपि कथं द्विर्द्विरवदानं स्यादिति । नेत्युच्यते । तत्रापि त्रिर्ग्रहणमिष्टम् । यद्येवं द्विर्ग्रहणमपार्थकम् । द्विर्द्विर्ग्रहणं क्रियते, न देशः, कथमनियमः स्यादिति । देशे पुनरनियते को लाभः । अवदानधर्मत्वं न प्राप्नोति ।। १४ ।।

आवृतैव हृदयशूलेन चरन्ति ।। १५ ।।

हृदयशूलेनावृता चरन्ति । आवृतेति मन्त्रप्रतिषेधः कस्मात् क्रियते । अन्येषां धर्माणां प्राप्त्यर्थम् । के पुनस्ते धर्माः । शुष्कार्द्रयोः संधिदेशः उदकोपस्पर्शनं समिधो ग्रहणमित्येवमादयः ।। १५ ।।

इति प्रथमे एकादशी कण्डिका ।।

चैत्ययज्ञे प्राक् स्विष्टकृतश्चैत्याय बलिं हरेत् ।। १ ।।

चितौ भवश्चैत्यः । [1]चैत्योऽस्य देवता चैत्यः । चैत्यश्चासौ यज्ञश्चेति चैत्ययज्ञः । तस्मिश्चैत्ययज्ञे[2] । एके एवं विग्रहं कुर्वन्ति । एवं सति चितिस्थाया एव देवताया यज्ञोऽयं प्राप्नोति । नापि नदीदेवताया आकाशदेवतायाश्च । इष्यते च । निमित्तं च नहि[3] निर्दिष्टं भवति । एवं सत्यसावन्यो विग्रहोऽस्तु[4] । सर्वा देवताश्चैत्याः । [चिति] चित्ते[5] भवश्चैत्य इत्येवं शब्द उपपादयितव्यः । एवं सत्येवं शक्यते वक्तुम् । अथ होमे का देवतात्र भवति । उच्यते । चैत्य एव । नेत्युच्यते । यदि होमेऽपि सैव देवता चैत्याय बलिं हरेदिति चैत्यग्रहणमपार्थकं संपद्यते । तेन बलिहरणविधानान्मन्यामहे होमे न भवति सा देवतेति । अथ कस्य पुनरत्र होमः कर्तव्यः । अग्निरिन्द्र इत्येतासां होमः प्राप्नोति । अन्यस्यानादेशात् । नेत्युच्यते । सैव देवता भवति । कस्मात् । आदिष्टत्वात् । कथं पुनरादिष्टा भवन्ति । इह पुरुषः केनचिदर्थेनार्थी सन् कस्यैचिद्देवतायै प्रतिशृणोति अहं त्वामनेन यक्ष्यामीति । कामसंप्राप्तौ सत्यां स तां देवतां यजति । केन पुनर्यजति । पशुना स्थालीपाकेनाज्येन वा होमः कर्तव्यः तस्या देवतायाः । ननु चैवं सति बलिहरणे चैत्यग्रहणमपार्थकम् । नेत्युच्यते । तस्य प्रयोजनं प्रत्यक्षहरणार्थम् । कथं वा प्रत्यक्षहरणं न स्यात् । [6]उत्तरसूत्रविरोधात् । तस्माद-

---

[1] चित्यः—A, C, D. [2] चैत्ये—A, C, D. [3] नदी—A, C, D. [4] चित्ये तु सर्वदेवता चेत्—added in A, C, D. [5] This word is corrupt in all the MSS. [6] उत्तरत्र—A, C, D.

वश्य चैत्यग्रहण कर्तव्यम् । अथ प्राक् स्विष्टकृत इति कस्मात् । प्राक्-स्विष्टकृद्ग्रहणं पूर्वं बलिहरणं कृत्वा पश्चात् स्विष्टकृद्यथा स्यादिति । एवमिहापि बलिहरणस्य प्राक् स्विष्टकृत उपदेशात् अन्यत्रोर्ध्वं स्विष्टकृतः कर्माणि भवन्तीत्येतत् सिद्धम् । यथा 'हृदयदेशमस्या आलभेत' (१. १३. ८) इत्येवंप्रकाराणि इत्येवमेके। नेत्यपरे । प्रागेव स्विष्टकृतः सर्वत्र कर्माणि भवन्ति। नन्वेवं सति बलिहरणे कालोपदेशोऽपार्थकः प्राक् स्विष्टकृत इति । नात्र स्विष्टकृद्ग्रहणं कालोपदेशार्थम्। किं तर्हि । चैत्ययज्ञहोम-प्रदर्शनार्थम्। मा भूद् बलिहरणमात्रमेवैतस्मिन् कर्मणि । अथ यज्ञशब्दाद्धो-मोऽस्त्विति चेत् । तन्न । बलिहरणमात्रेऽपि यज्ञशब्दस्य दृष्टत्वात् । यथा भूतयज्ञ इति । तस्माद्धोमग्रहणार्थं प्राक्स्विष्टकृद्ग्रहणमिति ।। १ ।।

यद्यु वै विदेशस्थम् ।। २ ।।

विदेश इति । विप्रकृष्टो देशः विदेशः । यदि विदेशस्थं चैत्यं यजेतेत्येतदुक्तं भवति । उ वा इत्येतौ निपातौ उत्तरेण पक्षेण सह संयुज्येते ।। २ ।।

यदि विदेशस्थश्चैत्यो भवति कथमसौ यष्टव्य इत्युत्तरत्रोपाय-मारभते—

पलाशदूतेन 'यत्र वेत्थ वनस्पते' (ऋ० सं० ५. ५. १०) **इत्येतयर्चा द्वौ पिण्डौ कृत्वा वीवधेऽभ्याधाय दूताय प्रयच्छेदिमं तस्मै बलिं हरेति चैनं ब्रूयादयं तुभ्यमिति यो दूताय ।। ३ ।।**

एतयर्चेति वचनमपार्थकम् । पादग्रहणादेवैषा भविष्यति । ब्रवीति । नियमार्थं ग्रहणमिति । अन्यत्र तु पादग्रहणे अनेकाप्यृग् भवतीत्येतद्दर्शयति —उत्तरत्र प्रयोजनम् अन्ये पुनरेतयर्चेत्यस्या ऋच अभ्यासो यथा स्या-दित्येतदर्थम् । क्व पुनरभ्यास इष्यते । पिण्डग्रहणे वीवधाभ्याधाने प्रति-यच्छति—इत्येतेषु त्रिषु कर्मस्वभ्यासमिच्छन्ति यत्नकरणेन । द्वौ पिण्डौ

कृत्वा वीवधेऽभ्यादधाति । अभ्याधाय दूताय प्रयच्छेदिति । द्वयोः पिण्डयोरेकं पिण्डमुद्दिशति । इमं पिण्डं तस्मै बलिं हरेति एनं पलाशदूतं ब्रूयात् । द्वितीयं पिण्डं तस्मै दूताय प्रयच्छत्ययं तुभ्यमिति । इमं तस्मै बलिं हरेत्येतस्मिन् प्रैषे विप्रतिपन्ना आचार्याः । किमिति । तस्मा इत्येतस्य स्थाने केचिद्देवतादेशं कुर्वन्ति केचिन्न कुर्वन्ति । ये तावन्न कुर्वन्ति तेषां किं कारणम् । यत्राचार्यस्य नामादेशोऽभिप्रेतो भवति तत्रामुष्मा इत्येवमाह । तस्मादत्र नामादेशो न भवति । ये पुनरिहेच्छन्ति तत् कथम् । सर्वनामसामान्यात् तस्मा इति ब्रूयात् अमुष्मा इति ब्रूयाद्वा । एवमुभयथा संप्रतिपन्नाः । अकारणमिति तु वचनेनोपदिशन्ति । तदिति विदेशनामानया हेतुमुपदिशन्ति ।। ३ ।।

प्रतिभयं चेदन्तरा शस्त्रमपि किंचित् ।। ४ ।।

प्रतिभयं यद्यन्तरा भवति । कस्यान्तरा । कर्तुश्चैत्यस्य च । ततः शस्त्रमपि किंचिद्दातव्यं तस्मै दूताय ।। ४ ।।

नाव्या चेन्नद्यन्तरा प्लवरूपमपि किंचिदनेन तरितव्यमिति ।। ५ ।।

नावार्हा नाव्या नदी यद्यन्तरा भवति प्लवरूपमपि किंचिद् दद्यात् । अनेन तरितव्यमित्यनेन मन्त्रेण ।। ५ ।।

धन्वन्तरियज्ञे ब्रह्माणमग्निं चान्तरा पुरोहितायाग्रे बलिं हरेत् ।। ६ ।।

धन्वन्तरेर्यज्ञो धन्वन्तरियज्ञः । तस्मिन् धन्वन्तरियज्ञे ब्रह्माणमग्निं चान्तरा पुरोहितायाग्रे बलिहरणं कर्तव्यम् । अग्रे प्रथममित्यर्थः । अग्रग्रहणान्मन्यामहे पश्चाद्धन्वन्तरये बलिहरणं भवतीति । तत्र तु यदि

विदेशस्थो धन्वन्तरिर्भवति तदा त्वयं विशेषः । धन्वन्तरेः पूर्वं पुरोहिताय बलिहरणम् । शेषं पूर्ववद् द्वितीयं दूताय ॥ ६ ॥

इति प्रथमे द्वादशी कण्डिका

उपनिषदि गर्भलम्भनं पुंसवनमनवलोभनं च ॥ १ ॥

रहस्यमुपनिषत् । तस्यामुपनिषदि । गर्भलम्भनम् । गर्भो लभ्यते येन कर्मणा तद् गर्भलम्भनं नाम कर्म । तदुपनिषदि व्याख्यातम् । उपनिषन्नाम रहस्यम्, तत्र गर्भाधानादय आत्मज्ञानपर्यन्ताः संस्कारा आम्नाताः । अयमपि संस्कारस्तत्रैवाम्नातः । तेन तथैवास्य करणं भवितुमर्हति । पुंसवनम् । पुमान् येन संपद्यते लब्धो गर्भः सः, तत् पुंसवनं नाम कर्म । तदप्युपनिषद्येव व्याख्यातम् । अनवलोभनं च । येनासौ गर्भः संस्कृतः सन्[1] नावलुभ्यते, नावस्रंस्यत इत्यर्थः । तदनवलोभनं नाम कर्म । तदप्युपनिषद्येव व्याख्यातम् । एवमेतानि त्रीणि कर्माणि उपनिषदि यथाम्नातानि तथा कर्तव्यानीति ब्रवीति । ननु च उपदेशादेव तेषां कर्मणां क्रिया सिध्यति । यस्मात् स्वस्यामुपनिषदि नैतान्याम्नातानि तेनान्यस्यामुपनिषदि आम्नातान्यागमय्य कथं प्रयोगः स्यादित्यत उपदेशः । उत्तरविवक्षया चोपदिश्यते ॥ १ ॥

यदि नाधीयात् ॥ २ ॥

तामुपनिषदं यदि नाधीयात् तत्र कर्तव्यमुत्तरं कर्म ॥ २ ॥

किं पुनस्तदित्युच्यते—

तृतीये गर्भमासे तिष्येणोपोषितायाः सरूपवत्साया गोर्दधनि द्वौ द्वौ माषौ यवं च दधि प्रसृतेन प्राशयेत् ॥ ३ ॥

---

[1] संपन्नो—A, C, D.

त्रयाणां पूरणस्तृतीयः । तस्मिंस्तृतीये गर्भमासे । अथैतत् कर्म भवतीति [1]यद् वक्ष्यामः । तिष्येणोपोषितायाः । तत्र संशयः । किं तिष्येणोपवासश्चोद्यते आहोस्विदुपोषितायास्तिष्येण कर्म भवति । तत्र तिष्येण कर्म भवतीत्येषा [2]प्रतिज्ञा । कथं पुनरेतज्ज्ञायते । गुणार्थत्वादुपवासस्य, नक्षत्रस्य च गुणभूतत्वात् । गुणार्थस्य गुणोपदेशो न्याय्यः । तस्मात् कर्म तिष्येण भवति । उपवासस्तु पूर्वेण नक्षत्रेण । सरूपवत्साया गोः । समानं रुपं वत्सस्य[3] पुनर्यया सा सरूपवत्सा तस्याः । समानरूपवत्सायास्तस्या गोः । गोग्रहणं न कर्तव्यम् । कस्मात् । समानवत्साया दधनीत्युच्यमाने गोरेव प्रत्ययो भविष्यति । नेत्युच्यते । विशेषोपदेशात् । अन्यापि सरूपवत्सा विद्यते चेत् तस्या अपि ग्रहणं स्यात् । का पुनरन्या । अजा । अजाग्रहणं मा भूदित्यतो गोग्रहणं क्रियते । तथापि[4] न कर्तव्यम् । कस्मात्[5] । विद्यमानायां गवि अजायाः प्रवृत्तिर्न भवति । ब्रवीति । स्यात् प्रवृत्तिः । कथम्[6] । यदा गौरसमानरूपवत्सा अजा च समानरूपवत्सा तदा निमित्तोपसंप्राप्ते गामुत्सृज्याजा गृह्येत । तस्या ग्रहणं कथं न स्यादित्यतो गोग्रहणं क्रियते । अभावे सरूपवत्साया गोः याकाचिद् गौर्गृह्यते । द्वौ द्वौ माषाविति वीप्सा कस्मात् । बह्वर्थत्वाद्[7] वीप्सायाः प्रतिप्रसृतं[8] कथं द्वौ द्वौ माषौ स्यातामिति । नेत्युच्यते[9] । वक्ष्यत्येव त्रीन् प्रसृतानिति । तस्माद् वीप्सा न कर्तव्या । नेत्युच्यते । कर्तव्या वीप्सा । यदि न क्रियते दधन्येव प्रक्षेपः स्यात् । माषयोर्यवस्य च प्रसृते निधानं न स्यात् । सप्तम्युपदेशाद् दध्नः । वीप्साकरणं तु प्रसृतसंयोगार्थमेव । द्वौ द्वौ च माषौ यवं च दधि च

---

[1] तद्—A, C, D. [2] प्रति—A, C, D. [3] वत्सस्य—omited in A, C. [4] अपि—omitted in A, C. [5] कस्मात्—omitted in A, D. [6] कथम्—omitted in A, C. [7] Portion from द्वौ द्वौ to बह्वर्थत्वात् omitted in A, C, D. [8] प्रतिप्रसृति—A, C. [9] Portion from here up to the next नेत्युच्यते is omitted by haplography—A, C, D.

प्रतिप्रसृतमावर्तन्ते[1] । दधि प्रसृतेन प्राशयेदिति । तत्र दधिग्रहणं न कर्तव्यम् । कस्मात् । अधिकृतत्वात् । उच्यते । पूर्वं दधिग्रहणं सप्तम्या निर्दिष्टम् । तेन दध्नः प्राशनमेव न स्यात् । तेनावश्यं द्वितीयासंयुक्तं दधिग्रहणं कर्तव्यम् । न कर्तव्यम् । पुरस्तादेव द्वितीयासंयोगोऽस्तु । [2]उच्यते । न सिध्यत्यर्थः । माषयोर्यवस्य च दधनि प्रक्षेपो न स्यात् । इष्यते च प्रक्षेपः । तस्मात् सप्तमीनिर्दिष्टमपि दधिग्रहणमवश्यं कर्तव्यम् । तस्मिन् कृते यद्युपरिष्टान्न क्रियते प्राशनं न[3] स्याद्दध्नः । तस्मादुभयत्रारभ्यते ।। ३ ।।

किं पिबसि किं पिबसीति पृष्ट्वा पुंसवनं पुंसवनमिति त्रिः प्रतिजानीयात् ।। ४ ।।

अत्र किं पिबसीति प्रश्नः । पुंसवनमिति प्रतिप्रश्नः । यावत् [4]प्रश्नस्तावत् प्रतिप्रश्नेनापि भवितव्यम् । तत्र द्विः पृष्टाया द्विरेव प्रतिप्रश्नो दातव्यः । एवं सति त्रिग्रहणमपार्थकं स्यात् । तत्र ब्रूते यथादिष्टस्य प्रतिप्रश्नस्य त्रिरावृत्तिर्भवतीति । एवं सति षट्कृत्वः प्राप्नोति । न चैवं शक्यम् । कथं तर्हि भवतीति । किं पिबसीति त्रिः प्रश्नः । प्रतिप्रश्नेनापि त्रिर्भवितव्यम् । एवं चेद् वीप्सा न कर्तव्या उभयत्रापि । नेत्युच्यते । प्रतिप्रश्नमाचार्येण त्रिग्रहणं[5] कृतं त्रित्वज्ञापनार्थम् । एवं चेत् तत्रैव प्राप्नोति । तेनोभयत्रापि[6] वीप्सा क्रियते तुल्यत्वज्ञापनार्थम् । किं सिद्धं भवति । प्रश्नप्रतिवचनयोरुभयत्र त्रित्वं साधितं भवति ।। ४ ।।

एवं त्रीन् प्रसृतान् ।। ५ ।।

---

[1] आवर्तेत—A, C, D. [2] संयोगस्तूच्यते—A, C, D. [3] न omitted in A, C. [4] प्रतिप्रश्नः—A, C. [5] त्रिग्रहणं—omitted in A, C. [6] अपि—omitted in A, C.

अनेन[1] विधानेन त्रीन् प्रसृतान् प्राशयेत् । एकस्मिन् प्रसृते प्राप्ते त्रयः प्रसृता विधीयन्ते । तुल्यधर्माणः[2] कथं स्युरित्येवमुच्यते ।। ५ ।।

अथास्यै मण्डलागारच्छायायां दक्षिणस्यां नासिकाया-मजीतामोषधीं नस्तः करोति ।। ६ ।।

अथास्यै मण्डलागारच्छायायां नस्तः करोतीति । उक्तं यत् कर्म तत् पुंसवनं नाम वेदितव्यम् । तेनाथशब्दोऽयं प्रयुज्यते । तस्मात् कर्मान्तर-ज्ञापनार्थम् । किं पुनरिदं कर्म विधीयते । अनवलोभनं नाम । कुत एतत् । मन्त्रलिङ्गदर्शनात् । पौत्रमघं नियामिति । मण्डलागारच्छायायामिति । मण्डलः अगारः कर्तव्यः । तस्य छायायां तत् कर्म कर्तव्यम् । दक्षिणस्यां नासिकायाम् । नासिकाबिलद्वित्वाद् विशेषणं क्रियते । दक्षिणग्रहणं न कर्तव्यम् । कस्मात् । परिभाषासामर्थ्यात् । तत्तु क्रियते । अनङ्गत्वा-न्नासिकायाः । अङ्गवचने च सा परिभाषा । इह इन्द्रियत्वान्न प्राप्नोति । तस्माद्दक्षिणस्यामित्यारभ्यते । अजीतामोषधीमिति । [3]ओषधीनामधेय-मेवेदं न गुणविधिः । एवं सत्योषधीग्रहणमपार्थकम् । ओषधिग्रहणान्मन्या-महे गुणविधिरेवायमिति । तेन अजीतेत्यजीर्णा ओषधिर्विधीयते । का पुनः सा । दूर्वा इत्युपदिशन्ति । तामोषधीं नस्तःकरोति येनोपायेन शक्यते । अनुपदेशान्मन्त्रो न भवति ।। ६ ।।

प्रजावज्जीवपुत्राभ्यां हैके[4] ।। ७ ।।

---

[1] प्रकारेण—added in A, C. [2] तुल्यधर्माणां—A, C. [3] The word is written in MSS. both ways, either ओषधि or ओषधी ।
[4] The two *mantra-s* referred to here are printed as part of the *sūtra* in several previous editions; they are not found in the MSS. used by us. As printed in the ‘ Critical Notes ’ of Stenzler's edition they read: आ ते गर्भो योनिमैतु पुमान्बाण इवेषुधिम् । आ वीरो जायतां

एके आचार्याः प्रजावज्जीवपुत्राभ्यामृषिभ्यां[1] यौ मन्त्रौ दृष्टौ ताभ्यामेतत् कर्मेच्छन्ति । तेन नासिकायामोषध्यासेचनं ताभ्यां मन्त्राभ्यां भवतीत्यर्थः । अन्ये पुनस्तूष्णीमिति प्रागुक्तम् ।। ७ ।।

प्राजापत्यस्य स्थालीपाकस्य हुत्वा हृदयदेशमस्या आलभेत——

'यत्ते सुसीमे हृदये हितमन्तः प्रजापतौ ।
मन्येऽहं मां तद्विद्वांसं माहं पौत्रमघं नियाम्' इति ।। ८ ।।

प्राजापत्यस्य स्थालीपाकस्य हुत्वा हृदयदेशमस्या आलभेत । यत्ते सुसीम इत्यनेन मन्त्रेण । तत्रादावेव प्राजापत्यस्य स्थालीपाकस्य निर्वपणं करोति । तत्राज्यभागान्तं कृत्वा पुंसवनं करोति । नस्तःकर्म च । पश्चात् स्थालीपाकस्य जुहोति । कस्मात्[2] । उभयोः कर्मणोः[3] साधारणः स्थालीपाकः । हुत्वा च हृदयदेशमस्या आलभेत । स्पृशेदित्यर्थः । यत्ते सुसीम इत्यनेन मन्त्रेण । स्वयंकर्तृकत्वमस्मिन् कर्मणि भवति । कुतः । मन्त्रलिङ्गदर्शनात् । माहं पौत्रमघं नियामिति ।। ८ ।।

इति प्रथमे त्रयोदशी कण्डिका

चतुर्थे गर्भमासे सीमन्तोन्नयनम् ।। १ ।।

सीमन्तो यस्मिन् कर्मणि उन्नीयते तत् सीमन्तोन्नयनं नाम । तच्च-तुर्थे गर्भमासे भवति । सीमन्तोन्नयनमिति विशेषग्रहणं[4] क्रियते——प्रथमगर्भ

पुत्रस्ते दशमास्यः ।। अग्निरैतु प्रथमो देवतानां सोऽस्यै प्रजां मुंचतु मृत्युपाशात् । तदयं राजा वरुणो ऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदादिति ।।

[1] ऋषिभ्यां—omitted in A, C. [2] तस्मात्—A, C, D. [3] कर्मणोरसाधारण-स्थालीपाकः—C, D. [4] विशेषणग्रहणं—D, E.

इत्येवमेके पठन्ति । कस्मात् । इतरथा हि प्रतिगर्भमिदं कर्मावर्तेत । न भविष्यति । सकृदेवेदं कर्म चोद्यते । यदि सकृच्चोदितं न पुनः पुनरावर्तते । एवं सति पुंसवनादीनामपि सकृत् क्रिया प्राप्नोति । न चेष्यते । तेन यथा तेषां प्रतिगर्भमभ्यावृत्तिः एवमिहापि स्यात् । तस्मात् प्रथमगर्भ इति पठितव्यम् । अथापि नारब्धव्यम् । किं कारणम् । पूर्वस्य कर्मणः प्रतिगर्भमभ्यावृत्तिर्युक्ता[1] । कस्मात् । गर्भसंस्कारत्वात् । अस्य तु न भविष्यति । अगर्भसंस्कारत्वात् । तस्मान्न पठितव्यम् । नेत्युच्यते । इहापि गर्भसंस्कारोऽस्ति । कुतः । मन्त्रलिङ्गदर्शनात् । ' एवं तं गर्भमाधेहि दशमे मासि सूतवे ' इति (ऋ. खि. ४. १३. २) । तेनास्यापि कर्मणोऽभ्यावृत्तिः प्रतिगर्भं प्राप्नोति । अतश्च प्राप्नोति—संख्यातत्वात् संस्काराणाम् । येनाष्टाचत्वारिंशत् संस्कारा विहिताः तेन क्रिया प्राप्नोति । तथापि न कर्तव्यम् । कस्मात् । गर्भसंस्कारस्य गुणभूतत्वात् । सीमन्तोन्नयनमत्र प्रधानम् । तेन गुणभूतो गर्भसंस्कारः प्रधानभूतमावर्तयितुं नोत्सहते । कथं पुनरेतद् गम्यते यथा सीमन्तोन्नयनं प्रधानमिति । तत्समाख्यानात् । सीमन्तोन्नयनस्य प्राधान्यान्नाभ्यावृत्तिः । ननु हीनसंस्कारा गर्भा द्वितीयादयो भवन्ति । न भविष्यन्ति । कुतः । आधारस्य संस्कृतत्वात् । तस्मात् प्रथमगर्भादन्यत्र न प्राप्नोति । पुंसवनस्य तु गर्भसंस्कारत्वात् प्रतिगर्भस्यावृत्तिः । सीमन्तोन्नयनस्य प्राधान्यादनभ्यावृत्तिः ।। १ ।।

आपूर्यमाणपक्षे यदा पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात् ।। २ ।।

आपूर्यमाणपक्ष इत्युक्तो विग्रहः । शुक्लपक्ष इत्यर्थः । ननु चापूर्यमाणपक्ष एवेदं कर्म भविष्यतीति । तन्न । विशेषणान्तरमारभ्यते । तेन कृष्णपक्षेऽपि स्यात् । किं पुनस्तद्विशेषणम् । यदा पुंसा नक्षत्रेणेति ।

---

[1] आवृत्तिरुक्ता—A, C.

पुंनामधेयेनेत्यर्थः । यदा चन्द्रमा युक्तः स्यादित्येतन्न वक्तव्यम् । चन्द्रमसः संयोग एव नक्षत्राख्या[1] भवति । उच्यते । वक्तव्यम् । कथं प्रकर्षेण युक्ते चन्द्रमसीदं कर्म [2]स्यादाद्यन्तयोर्मा भूदिति ।। २ ।।

अथाग्निमुपसमाधाय पश्चादस्यानडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नुपविष्टायां समन्वारब्धायां 'धाता ददातु दाशुषे' (अ० सं० ७. १७. २) इति द्वाभ्यां 'राकामहम्' (ऋ० सं० २. ३२. ४) इति द्वाभ्यां 'नेजमेष:' (ऋ० खि० १०. १८४. १) इति तिसृभिः 'प्रजापते न त्वदेतान्यन्यः' (ऋ० सं० १०. १२१. १०) इति च ।। ३ ।।

अथाग्निमुपसमाधाय 'धाता ददातु दाशुषे'[3] इत्येवमादिभिर्मन्त्रैः । जुहुयादिति वाक्यशेषाध्याहारेण सूत्रसमाप्तिः । अथशब्दः कस्मात् क्रियते । अथशब्दं कुर्वन् ज्ञापयति—अन्यस्मिन् काले कर्मेदं भवतीति । कः[4] पुनरसौ काल इति । षष्ठाष्टमयोर्मासयोरित्यन्येषां च [5]वक्तव्यमित्येतदारब्धम् । कस्मात्[6] । शास्त्रान्तरे दृष्टो विधिरवश्यं प्रदर्शयितव्यः । तस्मात्[7] अथशब्देनासौ विधिरुपसंगृह्यते । अग्निमुपसमाधायेत्येवमादि समन्वारम्भणान्तं गृहप्रवेशनीयेन[8] व्याख्यातम् । यदि व्याख्यातं[9] नारब्धव्यमेतत् । प्रकृतिभूतत्वात् तस्यायमारम्भो न्याय्यः । 'धाता ददातु दाशुषे' इत्येवमादिर्मन्त्रैहोमः कर्तव्यः । प्रत्यृच जुहोतीत्युक्तः प्रकारः[10] ।। ३ ।।

अथास्यै युग्मेन शलाटुग्लप्सेन त्रेण्या च शलल्या त्रिभिश्च कुशपिञ्जूलैरूर्ध्वं व्यूहति । भूर्भुवः स्वरोमिति । त्रिश्चतुर्वा ।।४।।

---

[1] आख्यो—A, C, D. [2] स्यादित्यन्तयोः—A, C. [3] द्वाभ्याम् added in A, C, D. [4] कुतः—A, C. [5] वक्तव्यमेतद्—D. [6] तस्मात्—A, C. [7] कस्मात्—C, D. [8] गृहप्रवेशनीये—A, C. [9] व्याख्यानं—A. [10] परिहारः—C, D.

युग्मेनेति समेनेत्यर्थः । केन युग्मेन । शलाटुग्लप्सेनेति । शलाटुरित्यपक्वानां फलानामाख्या । ग्लप्सः स्तबक उच्यते पूग इति च । संघात इत्यर्थः । त्रेण्या च शलल्या । त्रेण्या, एता[1] शुक्लेत्यर्थः । त्रीण्येतानि यस्याः सेयं त्रेणी । त्रिशुक्लेत्यर्थः । त्रिभिश्च कुशपिञ्जूलैः कुशतरुणकैरित्यर्थः । एवमेतैर्द्रव्यैरूर्ध्वं सीमन्तं व्यूहति । भूर्भुवःस्वरोमिति । त्रिर्व्यूहति नाना करोति । चतुर्वा व्यूहति । व्यूहने सर्वत्र मन्त्रः ।। ४ ।।

वीणागाथिनौ संशास्ति सोमं राजानं संगायेतामिति ।।५।।

वीणागाथिनौ संशास्ति । किमिति । सोमं राजानं संगायेतामिति । वीणा च गाथा च वीणागाथे ययोः स्तः ताविमौ वीणागाथिनौ । तौ संशास्ति । अनेन प्रैषेण सोमं राजानं संगायेतामिति ।। ५ ।।

का पुनरसौ गाथेति—

'सोमो नो राजावतु मानुषीः प्रजा निविष्टचक्रा असौ' इति यां नदीमुपवसिता[2] भवन्ति ।। ६ ।।

एतां गाथां तौ गायतः । निविष्टचक्रा असावित्यस्य स्थाने पदस्यामन्त्रितया विभक्त्या नद्या नामादिशेत् यस्याः समीपे वसन्ति यथा— निविष्टचक्रा यमुने इति ।। ६ ।।

ब्राह्मण्यश्च वृद्धा जीवपत्न्यो[3] जीवप्रजा यद्यदुपदिशेयुस्तत्तत् कुर्युः ।। ७ ।।

तत्तच्च कर्तव्यम् । अत्र स्विष्टकृत्कालः प्रैषमुक्त्वा भवति ।। ७ ।।

---

[1] एनी—A, C, D. एत, meaning white, takes all the three genders. [2] असाविमा नदीमुपसिथा—A, C, D. [3] MSS. read जीवपत्यो.

ऋषभो दक्षिणा ॥ ८ ॥

ऋषभो दक्षिणा भवति । तत्र कः कर्ता । स्वयमेव । कुतः । मन्त्रलिङ्गदर्शनात् । किं लिङ्गम् । 'अस्यै मे पुत्रकामायै' (ऋ. खि. ४. १३. १) इति । ननु च[1] दक्षिणादानं नोपपद्यते । ब्रह्मणे दास्यति । ब्रह्मणोऽभावे तत्र ये ब्राह्मणाः संनिहितास्तेभ्यो भविष्यति । कर्माङ्गत्वाद् दक्षिणानाम् ॥ ८ ॥

इति प्रथमे चतुर्दशी कण्डिका

कुमारं जातं पुरान्यैरालम्भात् सर्पिर्मधुनी हिरण्यनिकाषं हिरण्येन प्राशयेत्—

'प्र ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनाम् ।
आयुष्मान् गुप्तो देवताभिः शतं जीव शरदो लोके अस्मिन्' ॥
इति ॥ १ ॥

प्र ते ददामीत्यनेन मन्त्रेण कुमारस्य जातस्यायं संस्कारो भवति । तत्र कुमारग्रहणं न कर्तव्यम् । जातमित्येव वक्तव्यम् । एवमुच्यमाने दोषः स्यात् । कुमार्या अपि प्रसज्येत । न भविष्यति । कस्मात् । वक्ष्यत्यावृतैव कुमार्यै इति । नेत्युच्यते । प्रवासादागत्य यद्विहितं तदावृद् भवति । इदं[2] तु कर्म प्राप्नुयात् । तस्मात् कुमारग्रहणं कर्तव्यं कुमारीनिवृत्त्यर्थम् । येषां पुनस्तदुभयार्थं आ एकस्मात् कर्मणः आवृता भवतीति तेषां कुमारग्रहणं किमर्थम् । अधिकारार्थम् । 'अष्टमे वर्षे ब्राह्मणमुपनयेत्' (१. १९. १) इत्यत्र कथं कुमारस्यैव स्यान्न कुमार्या इति । ननु तत्रापि पुंलिङ्गोपदेशात् कुमार्या न भविष्यति । नेत्युच्यते । लिङ्गमविवक्षितम् । जातिविवक्षायां च लिङ्गमप्रमाणम् । कस्मात् ।

---

[1] न च—C. [2] इह—A, C, D.

अविधायकत्वाल्लिङ्गस्य । तेन कुमार्या अप्युपनयनं प्रसज्येत । तन्निवृत्त्यर्थं कुमारग्रहणं कर्तव्यम् । एवं सत्यस्तु कुमारग्रहणम् । जातग्रहणं न कर्तव्यम् । न ह्यजातस्य कर्म शक्यते कर्तुम् । ब्रवीति । जातग्रहणमप्यधिकारार्थम् । वक्ष्यति । 'गोदानं षोडशे वर्षे' (१. १८. १) इति । तत्र संशयः । किमुपनयनात् प्रभृति आहोस्विज्जन्मन इति । तद्व्युदासार्थम् । कथं जन्मनः षोडशे वर्षे इत्येवमर्थं जातग्रहणं कर्तव्यम् । पुरान्यैरालम्भात् । पुरा प्रागित्यर्थः । अन्यैरालम्भात् स्पर्शनादित्यर्थः । अथेदं कर्म भवति । अन्यैरित्यन्यग्रहणं क्रियते । अनधिकृतालम्भनप्रतिषेधार्थम् । किं पुनः प्राशयति । सर्पिर्मधुनी हिरण्यनिकाषं च हिरण्येनैव प्राशयेत् । हिरण्येनेत्युच्यते पाणिना मा भूदिति । निकाषमिति निकर्षणम् । निकाषः क्व भवति । शिलायाम् । सर्पिरादीनि द्रव्याणि प्र ते ददामीत्यनेन मन्त्रेण प्राशयति ॥ १ ॥

कर्णयोरुपनिधाय मेधाजननं जपति ।
'मेधां ते देवः सविता मेधां देवी सरस्वती ।
मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजौ' ॥
इति ॥ २ ॥

कर्णयोरुपनिधाय मेधां त इत्येतन्मन्त्रं जपति । तत्रोपनिधायेति न वक्तव्यम् । कर्णयोर्जपतीत्युच्यमाने स्वयमेवोपनिधाय जपो भविष्यति । तत्रेदं प्रयोजनम् । हिरण्यमुपनिधायेति । एतदुक्तं भवति । कर्णयोर्जपतीति मुखस्याप्युपनिधानं भवति । तेनोभावप्युपनिधाय कर्णयोर्जपति । तत्र तु सकृन्मन्त्र उक्त आवर्तेत इति । सकृन्मन्त्रो भवति । कुतः । मन्त्रलिङ्गदर्शनात् । एतद् द्विवचनेन मन्त्रलिङ्गं[1] मन्त्रगतेन । पर्यायशस्तूपनिधानं भवति ॥ २ ॥

---

[1] मन्त्रलिङ्गममन्त्रकेण—A, C.

अंसावभिमृशति—

'अश्मा भव परशुर्भव हिरण्यमस्तृतं भव ।
वेदो वै पुत्रनामासि स जीव शरदःशतम् ।।'

इति । 'इन्द्र श्रेष्ठानि द्रविणानि धेहि' (ऋ० सं० २. २१. ६), **'अस्मे मघवन्नजोषिन्' इति च ।। ३ ।।**

अंसावभिमृशति अश्मा भवेत्येतैर्मन्त्रैः । तत्र संशयः । किं ते[1] प्रत्यंसमभ्यावर्तन्ते आहोस्वित् सकृदेव प्रयुक्तैरभिमर्शनं कर्तव्यमिति । तत्रैके सकृत्प्रयोगमिच्छन्ति । द्वार्याभिमर्शनवत् । यथा[2] द्वार्याभिमर्शने सकृन्मन्त्रः प्रयुज्यते । [3]पर्यायशश्चाभिमर्शो भवति तद्वदिहापि । नेत्युच्यते । तत्र सकृत्प्रयोग उपपद्यते । कस्मात् । द्विवचनसंयुक्तत्वान्मन्त्रस्य । इह त्वेकवचनसंयुक्ता मन्त्राः । तेन प्रत्यंसमभ्यावृत्त्या भवितव्यम् । उच्यते । नात्रांसावभिधीयते । किं तर्हि । कुमारोऽभिधीयते । तस्यैकत्वात् सकृदेव मन्त्रा भवन्तीति । एवमेके संप्रतिपन्नाः । अन्ये पुनर्मन्त्रविभागमिच्छन्ति । कस्मात् । आचार्यप्रवृत्तिदर्शनात् । आचार्येण विभक्तावेतौ [4]मन्त्राविति । कथम् । इतिकरणपाठात् । अन्यत्र मन्त्रमध्ये[5] न क्वचिदितिकरणं करोति । इह च करोति । तेन मन्यामहे विभक्तावेतौ मन्त्राविति । उत्तरत्र चशब्दोपदेशाच्च । एवं मन्त्रविभागमुपदिशन्ति । तेन[6] कल्पजेन मन्त्रेण दक्षिणमंसमभिमृशति । उत्तराभ्यामृग्भ्यां सव्यम्[7] । अपर आहुः । सकृदेव मन्त्रो भवति न विभागः । न च पृथगभिमर्शो भवति । तत्राशक्यत्वात् पृथगभिमर्शोऽस्तु द्वार्ययोः । इह तु शक्यत्वादंसयोर्युगपदभिमर्शः कर्तव्यः । एवमनेकधाचार्या विप्रतिपन्नाः । तत्र सम्यग् विचार्य यदभिप्रेतं तत्

[1] ते—omitted in A. [2] यथा—omitted in A, C. [3] पर्यायिश्च—A, C. [4] मन्त्रावितिकरण°—A, C. [5] मन्त्र—omitted in A. [6] एतेन—A. C. [7] उत्तरम्—A, C.

कर्तव्यम् । अस्माकं तु सकृन्मन्त्रः सकृदभिमर्शनमित्येतदभिप्रेतम् । यस्य तु त्रयाणां पक्षाणामन्यतमः पक्षोऽभिप्रेतः स्यात् [1]तस्य तथापि कुर्वतो न दोषः । सर्वेषामागमत्वात् ।। ३ ।।

नाम चास्मै दद्युः ।। ४ ।।

अस्मै कुमाराय नाम दद्युः । कुर्युरित्यर्थः ।। ४ ।।

कीदृग्लक्षणं नामेति तल्लक्षणमाचष्टे—

घोषवदाद्यन्तरन्तस्थमभिनिष्ठानान्तं द्व्यक्षरम् ।। ५ ।।

घोषवान् वर्ण आदौ कर्तव्यः । [2]अन्तरन्तस्थमिति । मध्ये अन्तस्थाः कर्तव्याः । अभिनिष्ठानान्तमिति । अभिनिष्ठानो नाम विसर्जनीयः । विसर्जनीयान्तमित्येतदुक्तं भवति । द्व्यक्षरम् । द्वे अक्षरे परिमाणमस्य[3] द्व्यक्षरं तन्नाम परिमाणतः । भवः, रुद्रः देवः, इत्येवंप्रकाराणि ।। ५ ।।

चतुरक्षरं वा ।। ६ ।।

चतुरक्षरं वा नाम कर्तव्यम् । एतैर्लक्षणैः संयुक्तम् । देवदत्तः, रुद्रदत्तः, भवनागः, इत्येवंप्रकाराणि ।। ६ ।।

द्व्यक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामः ।। ७ ।।

द्व्यक्षरं नाम प्रतिष्ठाकामस्य कर्तव्यम् । तत्र कस्यायं कामः । कुमारस्य । कः कामयते । यो नाम करोति । कस्मात् । इतरस्याशक्यत्वात् । ब्रह्मवर्चसं यः कामयते तस्य चतुरक्षरं नाम कर्तव्यम् ।। ७ ।।

---

[1] Omitted in A, C. [2] अनन्तरम्—A. [3] परिमाणं यस्य—D.

युग्मानि त्वेव पुंसाम् ॥ ८ ॥

युग्मानीति । युग्माक्षराणि समाक्षराणीत्यर्थः[1] । तेन षडक्षरमष्टाक्षरमित्येवमादीन्यपि भवन्ति । वसुशर्मरुद्रः, जनार्दनदेवघोषः, इत्येवंप्रकाराणि । एवकारः किमर्थः । अवधारणार्थः । कथं युग्मत्वमेवाश्रियेत[2] न पूर्वाणि लक्षणानीति । किं सिद्धं भवति । पुरंदरः, विष्णुशर्मा, इत्येवंप्रकाराणि तथा चन्द्रगोमध्यगः[3] इति च नामानि भवन्ति ॥ ८ ॥

अयुजानि स्त्रीणाम् ॥ ९ ॥

अयुग्माक्षराणि स्त्रीणां नामानि कर्तव्यानीति । यथा शर्मदा, विमदा, मघदा, इत्येवंप्रकाराणि ॥ ९ ॥

अभिवादनीयं च समीक्षेत । तन्मातापितरौ विद्यातामोपनयनात् ॥ १० ॥

अभिवादनीयमिति । आहूतः सन् येन नाम्ना तमभिवादयति तदभिवादनीयम् । सांव्यवहारिकमित्यर्थः । तच्च समीक्षेत[4] । कुर्युरित्यर्थः । तन्मातापितरौ 'विद्याताम्[5] ओपनयनात् । ओपनयनात् प्रवासादेत्येत्युत्तराङ्गं कुर्वन्ति । एवमेते द्वे नामनी विहिते । पूर्वं गुह्यं[6] नाम उत्तरं सांव्यवहारिकमित्येके । अपरे पुनः—नाम चास्मै दध्युः[7] धारयेयुरित्यर्थः । कस्मात् । काले नाम कर्तव्यम् । आचारतः कालः । केषांचिद् दशरात्रे । केषांचिद् द्वादशरात्रे । शतरात्रे संवत्सरे केचित्[8] । तदेतत्[9] सांव्यवहारिकं नाम । अभिवादनीयं च समीक्षेत तन्मातापितरौ विद्यातामोपनय-

[1] समानाक्षराणीत्यर्थः—A, C. [2] आश्रयेत—D. [3] भूगोमध्यगः—C; °मध्यकः—D. [4] समीक्ष्येत—A. [5] कुर्यातामित्यर्थः—added in A, C, D. [6] गृह्यं—A, C, D. [7] दद्युः—A, C. [8] केचित्—omitted in A, C. [9] तदेतत्—omitted in D.

नात् इति। अनेन नाम्नाभिवादयति। एतच्च नाम मातापितरौ विद्यातां तावद् यावदुपनयनम् इति। उपनीतस्य सतस्तन्मातापितरौ विद्याताமாचक्षाते—अनेन नाम्ना अभिवादयस्वेति। तेन पूर्वं सांव्यवहारिकम् उत्तरमभिवादनीयमिति सिद्धं भवति ॥ १० ॥

प्रवासादेत्य पुत्रस्य शिरः परिगृह्य जपति—

'अङ्गादङ्गात् संभवसि हृदयादधि जायसे।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥'

(शत० ब्रा० १४. ६. ४. ८, २६)

इति। मूर्धनि त्रिरवघ्राय[1] ॥ ११ ॥

प्रवासादागतः सन् पुत्रस्य शिरः परिगृह्य मूर्धनि त्रिरवघ्राणं[2] करोति। अवघ्राणं[2] कृत्वाथ जपति—अङ्गादङ्गादित्येतन्मन्त्रम् ॥ ११ ॥

आवृतैव कुमार्यै ॥ १२ ॥

आवृता। कुमार्या[3] आवृता कर्म कर्तव्यम्। तत्र केचिदुत्तरं कर्मोपदिशन्ति। ननु[4] चैवं सति जातकर्म समन्त्रकं प्राप्नोति। कुमारग्रहणान्न भवति। अन्ये पुनरुभयमावृतेच्छन्ति। तस्मादुभयोः शेषोऽयमावृतैव कुमार्या इति। [5]एवमुभयथा संप्रतिपन्नाः ॥ १२ ॥

इति प्रथमे पञ्चदशी कण्डिका

षष्ठे मास्यन्नप्राशनम् ॥ १ ॥

जन्मप्रभृति यः षष्ठो मासः तस्मिन् षष्ठे मास्यन्नप्राशनं कर्तव्यम् ॥ १ ॥

---

[1] आघ्राय—A. [2] आघ्राणं—A. [3] आवृता। कुमार्या—Omitted in B. [4] तत्र—B. [5] एवम्—omitted in D.

आजमन्नाद्यकामः ॥ २ ॥

अजस्येदमाजम् । तत्र आजमिति तद्धितनिर्देशात् संदेहः । अजायाः क्षीरं मांसं[1] दधि घृतमिति । तत्र मांसमित्युच्यते । कुतः । तैत्तिरेण सहोपदेशान्मन्यामहे मांसमिति ॥ २ ॥

तैत्तिरं ब्रह्मवर्चसकामः ॥ ३ ॥

[2]प्राशयेत् । तत्रोच्यते । किमनयोर्व्यञ्जनत्वेनोपदेशः आहोस्विदन्नत्वेन । किं चातः । यदि तावद् व्यञ्जनत्वेनोपदेशः अन्नत्वेनान्यत् [3]कल्पनीयमकामसंयोगेन । अथान्नत्वेन एतावदेव[4] प्राशयेत् । तत्र तु व्यञ्जनत्वेनोपदेशः । लोके[5] व्यञ्जनत्वेन दृष्टत्वात् । [6]तद्वदिहापि व्यञ्जने एते भवतः ॥ ३ ॥

घृतौदनं तेजस्कामः[7] ॥ ४ ॥

घृतौदनं तेजस्कामः प्राशयेत् । तत्र संशयः । किं घृतमिश्र ओदनो घृतौदन आहोस्विद् घृतेन संस्कृत इति । उच्यते । घृतेन संस्कृत ओदनो घृतौदन इति । कथं गम्यते । ओदनग्रहणात् । यदि घृतमिश्र ओदनोऽभिप्रेतः स्यात्, घृतं तेजस्काम इत्येवं[8] ब्रूयात् । नन्वेवं सति घृतमात्रस्यैव प्राशनं स्यात् । न भविष्यति । कस्मात् । यथा पूर्वयोर्व्यञ्जनत्वेनोपदेशः क्रियते[9] एवमिहापि व्यञ्जनत्वेनोपदेशः कल्प्येत । एवं सिद्धे यदोदनग्रहणं करोति तज्ज्ञापयति घृतेन संस्कृत ओदनो घृतौदन इति ॥ ४ ॥

---

[1] Omitted in A, C, D. [2] प्राश्नीयात्—D. [3] कल्पयितव्यम्—B. [4] एतावेव—A, C, D. [5] लोकेऽपि—D. [6] तद्वत्—omitted in A, B. [7] दध्योदनमिन्द्रियकामो मध्वोदनमायुष्कामः क्षीरौदनं पशुकामः—added in B between lines. [8] इत्येव—A, C, D. [9] कल्प्यते—A, C, D.

दधिमधुघृतमिश्रमन्नं प्राशयेत्--

'अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥'
(वाज० सं० ११. ८३) **इति ॥ ५ ॥**

अथ [1]दध्यादिभिर्द्रव्यैरकामसंयोगेन प्राशयेत् । अन्नपत इत्ययं प्राशनमन्त्रः । तत्र संशयः । किमयं प्राशनमन्त्रः अनन्तर एव प्राशने भवत्याहोस्वित् सर्वेषु प्राशनेष्विति । तत्रानन्तरविधानात् तत्रैव भवति । नेत्युच्यते । सर्वत्र भवितुमर्हति । [2]यथान्नमिह विहितं सर्वेषु भवति प्राशनेषु तद्वत् । किं पुनः कारणम् इहाम्नातः अन्यत्र भवितुमर्हतीति । नित्यमिदं प्राशनम् । पूर्वाणि कामसंयोगेन विधीयन्ते । कामसंयुक्ताश्चार्था विधीयमाना नित्यविकारिणो भवन्ति । इह च व्यञ्जनं कामसंयोगेन चोद्यमानं व्यञ्जनमेव विकरोति । यदन्यत् सर्वं नित्यमेव भवति । तेन मन्त्र ओदनश्च सर्वत्र भवतीति सिद्धम् । एवं ते ब्रुवतो दोषः । यत्र सव्यञ्जन ओदन उपदिश्यते तत्र मन्त्रो न प्राप्नोति । यथा 'घृतौदनं तेजस्कामः' इति । प्राप्नोतीत्युच्यते । कस्मात् । तुल्यत्वात् कामसंयोगस्य । तेनान्यैर्व्यञ्जनैः समधर्मो भवति स उपदेशः । अतश्च प्राप्नोति । प्राशने विहितत्वान्मन्त्रस्य। तेन यत्र प्राशनं तत्र मन्त्रः कर्तव्यः । घृतौदने च प्राशनं कामसंयोगेन दृष्टम् । तस्माद् भवति ॥ ५ ॥

आवृतैव कुमार्यै ॥ ६ ॥

कुमार्या आवृता इदं कर्म कर्तव्यम् । अमन्त्रकमित्यर्थः ॥ ६ ॥

इति प्रथमे षोडशी कण्डिका

---

[1] दध्यादिद्रव्यैः—A, C, D. [2] यथान्न—B.

तृतीये वर्षे चौलम् ॥ १ ॥

जन्मनः प्रभृति यत् तृतीयं वर्ष[1] तस्मिन् तृतीये वर्षे चौलकर्म[2] कर्तव्यम् ॥ १ ॥

यथाकुलधर्मं वा ॥ २ ॥

यस्मिन् वा काले कुलधर्मः तस्मिन्[3] काले कर्मेदं कर्तव्यम् । तेन पूर्वेण कालेन [4]सहायं विकल्प्यते । यस्यापि[5] कुलधर्मत्वेनान्यः काल उपदिष्टः तस्यापि विकल्पेन तृतीये[6] वर्षे भवति कुलधर्मोपदिष्टे वा काले । यस्य तु कुलधर्मत्वेन न कश्चित् कालश्चोदितस्तस्य तृतीय एव वर्षे भवति ॥ २ ॥

उत्तरतोऽग्नेर्व्रीहियवमाषतिलानां पृथक्[7] पूर्णशरावाणि निदधाति ॥ ३ ॥

अग्नेरुत्तरतो व्रीह्यादीनां द्रव्याणां शरावाणि पृथक् पृथक्[8] पूरयित्वा निदधाति । स्थापयतीत्यर्थः । तत्र पृथग्ग्रहणं न कर्तव्यम् । द्रव्यभेदादेव शरावभेदः सिद्धः[9] । तत्रैके दक्षिणाङ्कारिताप्रतिषेधमुपदिशन्ति । कथमुभाभ्यां पाणिभ्यां स्थापनं स्यादिति । अन्ये पुनरसंसर्गार्थमित्युपदिशन्ति । तदिदमुभयं नोपपद्यते । कः पुनरर्थः । न[10] शरावभेदार्थं[11] पृथग्ग्रहणम् । किंतु द्रव्यभेदार्थमेव । इह समासोपदेशान् मिश्रितानां पूरणं प्राप्नोति । अथवान्यतमस्य द्रव्यस्य भविष्यति । यथा—'व्रीहियवतिलैः' (१.१०.८)

---

1 यस्तृतीयो वर्षः—B. 2 चौलं—B. 3 वा—added in A, C, D. 4 सह—omitted in A, C, D. 5 अपि—omitted in A, C, D. 6 वा—added in A, C, D. 7 Repeated in B. 8 पृथक् पृथक् omitted in A, C, D. 9 भेदे सिद्धे—A, C. 10 Omitted in B. 11 शरावभेदार्थः—A, C.

इत्यत्र सत्यपि समासोपदेशे एकमेव द्रव्यं प्रसज्यते । तत्राप्ययमेव संशयः । न[1] भविष्यति । एकेन कृतार्थत्वात् । एवमिहापि एकद्रव्यं प्रसज्येत । तन्निवृत्त्यर्थं पृथग्ग्रहणम् । कथं पृथग्भूतानां सर्वेषां द्रव्याणां पृथक्[2] पूर्णशरावाणि[3] निदधीयेरन्निति ।। ३ ।।

पश्चात् कारयिष्यमाणो मातुरुपस्थ आनडुहं गोमयं नवे शरावे शमीपर्णानि[4] चोपनिहितानि भवन्ति ।। ४ ।।

पश्चादग्नेः । कोऽसौ कारयिष्यमाणः[5] । येन तत् कर्म प्रवर्तितम् । कः पुनरसौ । कुमारः । मातुरुपस्थेऽवस्थापितः[6] । आनडुहं गोमयं नवे शरावे कृत्वा शमीपर्णानि चान्यस्मिन् शरावे कृत्वा पश्चादग्नेर्निदधाति ।। ४ ।।

मातुः पिता दक्षिणत एकविंशतिकुशपिञ्जूलान्यादाय ब्रह्मा वैतानि धारयेत् ।। ५ ।।

तत्र[7] मातुर्दक्षिणतः पिता एकविंशतिकुशपिञ्जूलानि गृहीत्वास्ते । अन्ये पुनर्ब्रुवते । मातुरेव पिता दक्षिणत आस्ते । अग्नेर्दक्षिणतः[8] । मातुर्नान्यस्मिन् कर्मणि कर्ता पिता भवतीत्युपदेशः । तत्र तु[9] कुमारस्यैव पिता दक्षिणतः । अथ मातुर्ग्रहणं किमर्थम् । कथं मातुर्दक्षिणतः पिता स्यादिति । अन्यथा हि[10] अग्नेर्दक्षिणतः पिता स्यात् । [11]ब्रह्मा वैतानि धारयेत् । कानि । कुशपिञ्जूलानि कुशतरुणकानीत्यर्थः । तान्येकविंशतिर्भवन्ति । ब्रह्मणा धारयितव्यानि भवन्ति । पित्रा वेति पक्षेण ।। ५ ।।

---

[1] Omitted in A, C, D. [2] Repeated in B. [3] पूर्णं—A, C, D. [4] कुशपिञ्जूलादि—added in B. [5] करिष्यमाणः A. [6] अव° omitted in B. [7] Omitted in A, C, D. [8] This sentence is omitted in B. [9] Omitted in A, C, D. [10] तथाहि—A, C, D. [11] This sentence is omitted in B.

पश्चात् कारयिष्यमाणस्यावस्थाय शीतोष्णा अपः समानीय 'उष्णेन वाय उदकेनेहि' (अ० सं० ६. ८. १) इति ॥ ६ ॥

कारयिष्यमाणस्य पश्चिमे देशे स्थित्वा शीतोष्णा अपः समानयति । उष्णेन वाय उदकेनेहीति मन्त्रेण । तत्र समानयनं युगपदुभाभ्यां पाणिभ्याम् । ननु च दक्षिणाङ्गकारिता विहन्यत इति । नेत्युच्यते । अन्यतरेणानियमे प्राप्ते नियमार्था सा परिभाषा । तस्मादिहोभाभ्यां पाणिभ्यां युगपत् समानयनं कर्तव्यम् ॥ ६ ॥

तासां गृहीत्वा नवनीतं दधिद्रप्सान् वा प्रदक्षिणं शिरस्त्रिरुन्दति—'अदितिः केशान् वपत्वाप उन्दन्तु वर्चसे' इति ॥ ७ ॥

तासामपामेकदेशं[1] गृहीत्वा नवनीतं दधिद्रप्सान् वा। दधिद्रप्सानां च नवनीतस्य च विकल्पः। प्रदक्षिणं त्रिरुन्दति शिरः । उन्दति क्लेदयतीत्यर्थः। अदितिः केशान् वपत्वित्यनेन मन्त्रेण । तासामिति न वक्तव्यम् । कस्मात् । अधिकृतत्वात् तासामिति । नेत्युच्यते । अक्रियमाणे तासांग्रहणे तासां ग्रहणमेव न प्राप्नोति । एवं सति [2]समानयनमपार्थकं स्यात् । उत्तरार्थं समानयनं[2] क्रियते । 'शीतोष्णाभिरद्भिरबर्थं कुर्वाणः' (१. १७. १७) इति[3] । तेन तासांग्रहणमवश्यं कर्तव्यम् । एकदेशग्रहणार्थं च ॥ ७ ॥

दक्षिणे केशपक्षे त्रीणि त्रीणि कुशपिञ्जूलान्यभ्यात्माग्राणि निदधाति—'ओषधे त्रायस्वैनम्' (तै० सं० १. २. १. १) इति ॥ ८ ॥

---

[1] एकदेशं—omitted in A, C, D. [2] समवनयनम्—A, C, D.
[3] इत्यनेन मन्त्रेण—added in A, C.

दक्षिणो यः केशपक्षः तस्मिन्[1] केशपक्षे । त्रीणि त्रीणि कुशपिञ्जूलानीति वीप्सा बह्वर्था । अभ्यात्माग्राणीति । येषां कुशपिञ्जूलानामाभिमुख्येनाग्राणि [2]तानीमान्यभ्यात्माग्राणि । कस्य पुनराभिमुख्येन । कारयिष्यमाणस्य । अभ्यात्माग्राणि निदधाति । स्थापयतीत्यर्थः । ओषधे त्रायस्वैनमिति मन्त्रेण ।। ८ ।।

'स्वधिते मैनं हिंसीः' (वाज० सं० ४. १) **इति निष्पीड्य लौहेन क्षुरेण ।। ९ ।।**

स्वधिते मैनं हिंसीरिति मन्त्रेण लोहेन क्षुरेणाभिपीडयति[3] । अभिनिदधाति,[4] गाढीकरोति, घनीकरोतीत्यर्थः । अथ लौहेनेति किमर्थम् । लोके लोहत एव क्षुरः सिद्धः । तस्माल्लौहग्रहणमपार्थकम् । उच्यते । सिद्धो लौहः क्षुरः । अत्र त्वयं लोहशब्दः विशेषार्थ[5] उपदिश्यते । ताम्रमयेन कथं स्यादित्येवमर्थम् । कथं गम्यते । शास्त्रान्तरदर्शनात् । लोहशब्दस्त्वयं रजतादिष्वपि वर्तते । अत्र तु ताम्रे वर्तते । शास्त्रान्तरे विहितत्वात् ।। ९ ।।

प्रच्छिनत्ति—

'येनावपत् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ।
तेन ब्रह्माणो वपतेदमस्यायुष्मान् जरदष्टिर्यथासत्' ।।

(अ० सं० ६. ६८. ३; ८. ५. २१) **इति ।। १० ।।**

प्रशब्दो निपातः । छिनत्तीत्येतदेवोक्तं भवति । अन्ये पुनर्ब्रुवते क्षिप्रार्थमिति । येनावपदित्यनेन मन्त्रेण ।। १० ।।

---

[1] दक्षिणे—added in A, C, D. [2] तान्येतानि—A, C, D. [3] अभिवासयति—A, C. [4] अभिदधाति—A, C, D. [5] विशेषणार्थः—A, C, D.

प्रच्छिद्य प्रच्छिद्य प्रागग्राञ्छमीपर्णैः सह मात्रे प्रयच्छति । तानानडुहे गोमये निदधाति ।। ११ ।।

प्रच्छिद्य प्रच्छिद्येति वीप्सा क्रियते । कथं योऽत्र धर्म उपदिश्यते स सर्वेषु छेदनेषु स्यादिति । प्रागग्रानिति तेषां कुशपिञ्जूलानां स्थाप्यमानानामपि प्रागग्रता विधीयते । शमीपर्णैः सहेति । एकीकृत्येत्यर्थः । मात्रे प्रयच्छति । ददातीत्यर्थः । को ददाति । यः करोति । गृहीत्वासौ माता पुनरानडुहे गोमये निदधाति । स्थापयति । अत्र नियमो नास्ति प्रागग्रतायाः । तेन यथाभिप्रेतं स्थापयति ।। ११ ।।

'येन धाता बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत् ।
तेन त आयुषे वपामि सुश्लोक्याय स्वस्तये' ।।

इति द्वितीयम् ।। १२ ।।

येन धातेत्यनेन मन्त्रेण द्वितीयं छेदनं प्रच्छिनत्ति । दक्षिणे केशपक्ष इत्यनुवर्तते ।। १२ ।।

'येन भूयश्च रात्र्यां[1] ज्योक् च पश्याति[2] सूर्यम् ।
तेन त आयुषे वपामि सुश्लोक्याय स्वस्तये' ।।

इति तृतीयम् ।। १३ ।।

येन भूयश्च रात्र्यामिति तृतीयं छेदनं छिनत्ति । [3]द्वितीयं तृतीयमिति मन्त्रान्तप्रदर्शनार्थम् । ननु चेतिकरणेन मन्त्रान्त उपदिश्यते । नेत्युच्यते । इतिकारो मन्त्रमध्येऽपि विद्यते । यथा—'आसीद सदनं स्वमासीद सदनं

---

[1] चरात्र्यं—A, C. [2] पश्यति—A, C. [3] Portion from here up to तृतीयग्रहणम् missing in A, C, D.

स्वमिति मा हिंसीर्देवप्रेरित आज्येन तेजसा' (आ० श्रौ० ३. १४. १३) इति । अथवा क्रमार्थं द्वितीयतृतीयग्रहणम् ।। १३ ।।

सर्वैर्मन्त्रैश्चतुर्थम् ।। १४ ।।

चतुर्थं छेदनं छिनत्ति । चतुर्णां पूरणं चतुर्थम् । तत् सर्वैर्मन्त्रैः अधिकृतैस्त्रिभिरपि[1] छिनत्तीत्यर्थः ।। १४ ।।

एवमुत्तरतस्त्रिः ।। १५ ।।

एवमेवोत्तरतस्त्रिः प्रच्छिनत्ति । एवमिति प्रकारवाची[2] । उत्तरत इति देशो निर्दिश्यते । त्रिरिति संख्यावचनम् । तत्र संशयः । किमिदं यथा चतुर्थं छेदनं[3] तथा कर्तव्यमुत्तरतस्त्रिः । उत यथा पूर्वाणि त्रीणि[4] । तत्रानन्तरविधानाद् यच्चतुर्थं तदेव प्राप्नोति । नेत्युच्यते । एवं तर्हि योगविभागः क्रियते । कथम् । एवमुत्तरतः । एवमुक्ते सर्वो विधिः प्राप्तः यथा दक्षिणे केशपक्षे । तेनैवं कृते चतुर्थमपि छेदनं प्राप्नोति । तेन[5] त्रिरिति परिसंख्यानार्थं क्रियते । तस्माच्चतुर्थं न भविष्यति । न च संशयो योग-विभागे कृते ।। १५ ।।

क्षुरतेजो निमृजेत्[6]—

'यत् क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशान् । शुन्धि शिरो मास्यायुः प्रमोषीः' ।।

इति ।। १६ ।।

क्षुरस्य तेजः क्षुरतेजः । क्षुरधारेत्यर्थः । निमृजेत् शोधयेदित्यर्थः । ननु निमार्जनं कथं कर्तव्यम् । केचिदधोमार्जनमिच्छन्ति । केचिदूर्ध्वम् ।

---

[1] अवच्छिनत्तीत्यर्थः—A, C, D. [2] प्रकारवाचि—C. [3] यच्छेदनं—A. [4] त्रिरिति—B. [5] Omitted in B. [6] निमृजेत—B.

नीत्यनेन तूपसर्गेण अधएव मार्जनं भवति। यत् क्षुरेणेत्यनेन मन्त्रेण ॥ १६ ॥

नापितं शिष्यात्—'शीतोष्णाभिरद्भिरबर्थं कुर्वाणोऽक्षुण्वन् कुशली[1] कुरु' इति ॥ १७ ॥

नापित इति शिल्प्युपदिश्यते। शिष्यादिति उपदिशेदित्यर्थः। शीतोष्णाभिरद्भिरित्यनेन[2] प्रैषेण प्रेष्येत्। क्रियां चास्य निर्दिशेत् इदं कुर्विति ॥ १७ ॥

यथाकुलधर्मं केशवेशान्[3] कारयेत् ॥ १८ ॥

यो यस्य धर्मः कुले तादृशान् केशवेशान्[3] कारयति। कः कुलधर्मः। 'एकशिखस्त्रिशिखः पञ्चशिखः' (बौ० गृ० २. ४. १७) इत्येवमादयः[4]। पृथुकान् चीरकानित्येवमादीनित्यर्थः ॥ १८ ॥

आवृतैव कुमार्यै ॥ १९ ॥

कुमार्या आवृता चौलकर्म कर्तव्यम्। आवृतेति किमुच्यते। समन्त्रकं कर्म। कथं ज्ञायते। येनान्यत्रावृतेत्युक्त्वा तूष्णीमित्याह। क्व पुनस्तत्। 'अपरया द्वारा नित्ययावृता' इत्युक्त्वा 'तूष्णीं प्रतिसर्पन्ति' (आ० श्रौ० ५. ११. ३) इत्याह। तेन ज्ञायते समन्त्रकस्य[5] कर्मण उपदेश इति। यद्येवं स्यान्नैवोपदेशं कुर्यात्। कस्मात्[6]। अविशेषेण विधानादुभयोः प्राप्नुयात्। तदेतन्नोपपद्यते। किं कारणम्। कुमाराधिकारात्। 'कुमारं

---

[1] केशान्—added in B. [2] मन्त्रेण—added in A, C, D. [3] केशवेषान्—B. [4] एवमादि धृषकान्—A, C, D; प्रैषकान्—B. तत्र is added between आदि and धृषकान् in D. [5] सर्वस्य—B. [6] तस्मात्—A, C.

जातम् ' (१. १४. १) इति वचनात् । तेन विशेषोपदेशः । यद्येवं कुमार्याश्चेत्येवमस्तु । [1]यतस्त्वावृद्ग्रहणं करोति तेन मन्यामहे—अवश्यं विशेषेण भवितव्यमिति । किंच एवकारश्चात्र विद्यते । तस्मादावृत् तन्त्रमेव[2] भवति । न मन्त्रः[3] । यदुक्तमन्येष्वावृद्ग्रहणेषु मन्त्र इति । तन्न । विलक्षणत्वान्निर्देशस्य । तत्रावृद्ग्रहणमात्रमेव । अत्र त्वेवकारो नियमार्थ एव । तस्मात् कर्मणैव भवितव्यम् । न मन्त्रेण । एवं ते ब्रुवतो दोषः प्राप्नोति । तूष्णीं होमः स्यादिति । तत्रैके प्रतिपन्नाः । भवति होमः अमन्त्रक इति । वयं तु नैवम् । किं कारणम् । अदृष्टत्वात् । तस्मात् कर्मैव भवति न होमः । ननु च 'तूष्णीं द्वितीये उभयत्र' (१. ६. १०) इति दृष्टः । नेति । तत्र[4] समन्त्रकः प्रकृतो होमः । इह त्वमन्त्रकस्य प्रवृत्त्यैव भवितव्यमिति नोपपद्यते । तस्मादावृन्मात्रमेव भवति । न होमः प्राप्नोति ॥ १६ ॥

इति प्रथमे सप्तदशी कण्डिका

एतन गोदानं षोडशे वर्षे ॥ १ ॥

एतेन चौलकर्मणा गोदानं व्याख्यातम् । तस्मिन् गोदाने ये विशेषास्ते वक्ष्यन्ते । इदं तु कार्त्स्न्येन कर्म भवतीत्यर्थः ॥ १ ॥

केशशब्दे तु श्मश्रुशब्दान् कारयेत् ॥ २ ॥

तत्र ये केशशब्दास्तेषु श्मश्रुशब्दाः कर्तव्याः । तत्र केशशब्दः 'केशान् वपतु' (१. १७. ७), 'वप्ता वपतु केशान्' (१. १७. १६) इति च । अथ कस्माद् विलक्षणो निर्देशः एकत्रैकवचनेनान्यत्र बहुवचनेन । केशशब्दे त्वित्येकवचनं श्मश्रुशब्दानिति बहुवचनं[5] ब्रवीति । अविवक्षितमेव[6]

---

[1] यस्तावद्—B. [2] आवृन्मत्रमेव—A; आवृन्मात्रमेव—B, D.
[3] Omitted in A, C. [4] दृष्टो नेति तत्र—omitted in B. [5] करोति —added in A, C. [6] एवेदं—A, C, D.

बहुवचनम् । जातिपरत्वान्निर्देशस्य । उभयत्रापि भवतु[1] जातिपरो निर्देशः । नेत्युच्यते । लोकप्रसिद्ध एवायं शब्दः श्मश्रूणि वापयति केशान् निकृन्ततीति । द्वौ चेह केशशब्दौ [2] । विलक्षणनिर्देशं[3] कुर्वाणो दर्शयति—कथं विधिगतस्यापि केशशब्दस्य स्थाने[4] श्मश्रुशब्दः प्रतीयेतेति[5] । कः पुनरसौ विधिगतः केशशब्दः । 'दक्षिणे केशपक्षे' (१. १७. ८) इति । तेनेहापि दक्षिणे श्मश्रुपक्षे इति साधितं भवति ॥ २ ॥

श्मश्रूणीहोन्दति ॥ ३ ॥

इह तु श्मश्रूणामुन्दनं भवति । उन्दनं नाम क्लेदनम् । तत् केशानां दृष्टम् । तदिह श्मश्रूणां विधीयते । तेन नात्र समुच्चयः । इहशब्देन श्मश्रूणामेवोन्दनं भवति न केशानाम् ॥ ३ ॥

'शुन्धि शिरो मुखं मास्यायुः प्रमोषीः' इति ॥ ४ ॥

क्षुरनिमार्जनेऽयं विकारो भवति ॥ ४ ॥

'केशश्मश्रुलोमनखान्युदक्संस्थानि कुरु' इति संप्रेष्यति ॥ ५ ॥

केशश्मश्रुलोमनखान्युदक्संस्थानि कुर्वित्यस्य प्रैषस्य क्व निवेशो भवति । किमादौ मध्ये अन्ते इति । आदौ तावत् प्राप्नोति । यद्यत् पश्चादुपदिश्यते तस्यादावेव निवेशेन[6] भवितव्यम् । यथाग्नीध्रस्य तृतीयत्वे[7]

---

[1] भवति—A, C, D. [2] केशश्मश्रुशब्दौ—B. After this A and B insert a portion of the commentary on पुरस्तादम्नात उपरिष्टाद् भवति, etc. up to ऋचः संपद्यन्ते । This must be due to a misplaced folio in the original of both the MSS. [3] विलक्षणेन निर्देशं—B. [4] समाने—A, C, D. [5] प्रतीयते—B. [6] निवेशनेन—A, C. [7] तृतीये—B; तृतीयत्वेन—D.

प्राप्ते प्रतिप्रस्थातुर्भवति । एवमिहापि भवितव्यम् । तदेतन्नोपपद्यते । [1]संख्याचोदितानामेतदेवं भवति नियतस्थानानाम्[2] । एवमेतयोरभावादन्त एव निवेशो भवति । कुशली केशश्मश्रुलोमनखान्युदक्संस्थानि कुर्वित्यन्ते[3] उपदेशकः शब्दः ।। ५ ।।

आप्लुत्य वाग्यतः स्थित्वाहःशेषमाचार्यसकाशे वाचं विसृजेत 'वरं ददामि' इति ।। ६ ।।

आप्लुत्येति स्नात्वेत्यर्थः । वाग्यत इत्यमन्त्रयन्नहःशेषं तिष्ठतीति स्थानं चोद्यते । नासनम् । आचार्यसकाशे वाचं विसृजेतेति । किमिति वाग्विसर्गो भवति । वरं ददामीति ।। ६ ।।

किं पुनर्वरं ददाति—

गोमिथुनं दक्षिणा ।। ७ ।।

तां ददाति ।। ७ ।।

संवत्सरमादिशेत् ।। ८ ।।

एतत् कर्म कृत्वा संवत्सरं व्रतमादिशेत् । तत्र कस्मिन् काले व्रतादेशनं कर्तव्यम् । कुतः संशयः । रात्रिरधिकृता । रात्रौ च व्रतादेशनाभावः । कस्मात् । अविहितत्वात् । तेन व्रतादेशनं पूर्वं कृत्वा[4] संवत्सरान्त इदं कर्म कुर्वन्ति । एवमेके प्रवृत्ताः । तत्तु नैवम् । कस्मात् । संवत्सरमादिशेदित्यन्तेऽस्य कर्मणो विधानात् । तेनेह गौदानिकं कर्म कृत्वा अन्यस्मिन्नहनि व्रतादेशनं कर्तव्यम् । न प्रागुदयात्[5] ।। ८ ।।

इति प्रथमे अष्टादशी कण्डिका

---

[1] तेन—added in A, C, D. [2] नियमस्थानानां गमने—A, C, D.
[3] अन्ततः—B. [4] पूर्वमकृत्वा—A, C. [5] Omitted in A, C, D.

अष्टमे वर्षे ब्राह्मणमुपनयेत् ॥ १ ॥

जन्मप्रभृत्यष्टमे वर्षे ब्राह्मणस्योपनयनं कर्तव्यम्[1]। कथं ज्ञायते जन्मप्रभृतीति। जाताधिकारात्। कुमारस्य [2]चोपनयनं कर्तव्यम्। कुमाराधिकारः[3] कुमारीनिवृत्त्यर्थः अनुवर्तते[4]। यद्येवं नार्थोऽधिकारेण। पुंलिङ्गोपदेशात् ब्राह्मणमुपनयेदिति कुमार्या नैव प्राप्नोति। नेत्युच्यते। [5]जातिनिर्देशोऽयम्। जातिनिर्देशे च लिङ्गमविवक्षितम्। तद्यथा—'ब्राह्मणो न हन्तव्यः' इति ब्राह्मण्यपि न हन्यते। एवमिहापि ब्राह्मण्या अप्युपनयनं क्रियते यद्यधिकारो नानुवर्तते। तस्मादनुवर्तते ॥ १ ॥

गर्भाष्टमे वा ॥ २ ॥

गर्भाष्टमे वा ब्राह्मणस्योपनयनं कर्तव्यम्। स्मृतिदृष्ट एवायमर्थः यदि तत्र [6]गर्भादिसंख्या विधीयते। इह तु जन्मनोऽधिकारात् जातस्यैव संख्या प्राप्नोति। तस्मात् [7]गर्भादेरित्यारभ्यते ॥ २ ॥

एकादशे क्षत्रियम् ॥ ३ ॥

एकादशे वर्षे क्षत्रियमुपनयेत्। गर्भैकादशे वा। न च[8] वचनमस्ति न चाविकारो[9] गर्भाष्टम इति। तस्मात् गर्भैकादश इति प्राप्नोति। एवमुत्तरस्यापि विधिः साध्यते ॥ ३ ॥

द्वादशे वैश्यम् ॥ ४ ॥

---

[1] Omitted in A, B, C. [2] च—omitted in B. [3] कुमाराधिकारात्—A, C. [4] आकृष्यन्ते—A, C; अनुवर्तिष्यते—D. [5] जात्या—A, C, D. [6] गर्भादिः—A, C, D. [7] गर्भादिरि°—A, C, D. [8] च—omitted in A, C, D. [9] नन्वधिकारो—A, C, D.

द्वादशे वर्षे वैश्यस्योपनयनं कर्तव्यम् । गर्भद्वादश इत्यनुवर्तते । नियमोपदेशात् । ब्राह्मणादीनामेतेष्वेव कालेषूपनयनं कर्तव्यम् ।। ४ ।।

अथात्रापि विध्यन्तरमुपदिश्यते । तेनान्यस्मिन्नपि काले भवतीत्याह[1]—

आ षोडशाद् ब्राह्मणस्यानतीतः कालः । आ द्वाविंशात् क्षत्रियस्य । आ चतुर्विंशाद् वैश्यस्य ।। ५ ।।

तत्र संशयः[2] योऽयमाकारः किमयमभिविधावुत मर्यादायामिति । कुतः संशयः । उभयथा दृष्टत्वाल्लोकवेदयोः । आ कूपात् क्षेत्रमिति मर्यादायाम् । आ प्रयागादिति चाभिविधौ । तथा आ आहवनीयादिति मर्यादायाम् । 'आऽतो मन्द्रेण' (आ० श्रौ० १. ५. २५) इत्यभिविधौ । एवमुभयथा दृष्टत्वात् संशयः । तेन किं कर्तव्यम् । इहाप्यभिविधौ भवति । कथं गम्यते । उत्तरसूत्रनिर्देशात् ।। ५ ।।

अत ऊर्ध्वं पतितसावित्रीका भवन्ति ।। ६ ।।

अत ऊर्ध्वमिति नारब्धव्यम् । तदारभ्यते कथमयमाशब्दः अभिविध्यर्थः स्यान्न मर्यादायाम् । तस्मादारभ्यते पतितसावित्रीका भवन्तीति संज्ञा । षोडशद्वाविंशतिचतुर्विंशतिभ्य ऊर्ध्वं ये नोपनीयन्ते ते पतितसावित्रीकसंज्ञा भवन्ति । संज्ञाप्रयोजनं[3] 'पतितसावित्रीक उद्दालकव्रतं चरेत्' (वासिष्ठधर्मसू० ११. ७६) इति ।। ६ ।।

नैनानुपनयेन्नाध्यापयेन्न याजयेन्नैभिर्विवहेयुः[4] ।। ७ ।।

---

[1] भवतीत्यत आह—A, C, D; भवति आह—B. [2] Portion from here up to the next संशयः is omitted in B. [3] किं—added in B. [4] व्यवहरेयुः—A, C; व्यवहेयुः—D.

एतान् पतितसावित्रीकान् उपनयनादिसंस्कारैर्न संस्कुर्यात् अविचीर्णप्रायश्चित्तान् । तत्र किमर्थं सर्व एते पठ्यन्ते । उपनयनप्रतिषेधे सर्वाणि प्रतिषिद्धानि भवन्ति । अत्रोच्यते । कयाचिद्युक्त्या लोभादज्ञानाद्वा उपनीतस्यापि सतः अचीर्णप्रायश्चित्तस्य नैवोत्तराणि कर्माणि कर्तव्यानीत्येतदर्थं सर्वेषां पाठः क्रियते ।। ७ ।।

अलंकृतं कुमारं कुशलीकृतशिरसमहतेन वाससा संवीतमैणेयेन वाजिनेन ब्राह्मणं रौरवेण क्षत्रियमाजेन वैश्यम् ।। ८ ।।

तत्र कुमारग्रहणं पुनरुपनयनेऽलंकरणप्रतिषेधार्थम् । कुमारस्य यदलंकरणं भूषणानीत्येतदुक्तं भवति । कुशलीकृतशिरसमिति । वापितशिरसमित्यर्थः । अहतेन वाससा संवीतमिति । अहतं नवमपुराणमित्युच्यते । संवीतं प्रावृतमित्यर्थः । ऐणेयेन वाजिनेन चर्मणा प्रावृतं ब्राह्मणम् । रौरवेण चर्मणा प्रावृतं क्षत्रियम् । आजेन चर्मणा प्रावृतं वैश्यम् । एवंप्रावृतमुपनयेत्[1] । तत्रैतानि चर्माणि वासोभिः सह विकल्प्यन्ते । उभयेषां प्रावरणार्थत्वात् ।। ८ ।।

यदि वासांसि वसीरन् रक्तानि वसीरन् । काषायं ब्राह्मणो माञ्जिष्ठं क्षत्रियो हारिद्रं वैश्यः ।। ९ ।।

यदिशब्दोऽयमनित्यार्थे[2] वर्तते । एवं सति वाससां वसनमनित्यं प्राप्नोति । यदा च प्राप्नुवन्ति पक्षेण तदा रक्तान्येव प्राप्नुवन्ति न शुक्लानि । तेनान्यथा विन्यासं[3] करिष्यामः—वासांसि वसीरन्नेव । तेन वाससां [4]नियमाद् वसने यदिशब्दस्त्वयं रक्तानामनित्यत्वं ज्ञापयति । यदिशब्देन[5]

---

[1] This sentence is omitted in B. [2] अनित्येऽथ—A, C, D.
[3] न्यासं—A, C, D. [4] नियमवसने—B. [5] यदिशब्देन त्विदं—A, C, D.

दर्शयति—यदि रक्तानि काषायं ब्राह्मण एव इत्येवमादिविभागः। काषायं ब्राह्मणस्य नियम्यते। एवमुत्तरयोरपि ॥ ९ ॥

तेषां मेखलाः—मौञ्जी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्यावी वैश्यस्य ॥ १० ॥

तेषां मेखला भवन्ति। ब्राह्मणस्यैव मौञ्जी नान्यस्य। ब्राह्मणस्य तु मौञ्जी वान्या वा। एवमुत्तरयोः क्षत्रियवैश्ययोः ॥ १० ॥

तेषां दण्डाः—पालाशो ब्राह्मणस्यौदुम्बरः क्षत्रियस्य बैल्वो वैश्यस्य। केशसंमितो ब्राह्मणस्य ललाटसंमितः क्षत्रियस्य प्राणसंमितो वैश्यस्य[1] ॥ ११ ॥

तेषां दण्डा भवन्ति। दण्डनियमो मेखलाभिर्व्याख्यातः ॥ ११ ॥

इति प्रथमे एकोनविंशतितमा कण्डिका[2]

सर्वे वा सर्वेषाम् ॥ १ ॥

सर्वे[3] दण्डाः सर्वेषां विकल्पेन[4] भवन्ति पालाशो ब्राह्मणस्येत्येवमादयः ॥ १ ॥

समन्वारब्धे हुत्वोत्तरतोऽग्नेः प्राङ्मुख आचार्योऽवतिष्ठते। पुरस्तात् प्रत्यङ्मुख इतरः। अपामञ्जली पूरयित्वा 'तत्

---

[1] Portion from केशसंमितो up to here is found only in B which also adds भवत्पूर्वां ब्राह्मणो भिक्षां याचयीत, भवन्मध्यां राजन्यो, भवदन्त्यां वैश्यः। This is found nowhere else. [2] This division of कण्डिका is not shown in MSS. [3] वा—added in A, C, D. [4] Omitted in A, B, C.

सवितुर्वृणीमहे' (ऋ० सं० ५. ८२. १) इति पूर्णेनास्य पूर्णमवक्षारयति। आसिच्य 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्--हस्तं गृह्णामि–असौ' इति तस्य पाणिना पाणिं साङ्गुष्ठं गृह्णीयात् ॥ २ ॥

समन्वारब्धे जुहोति । को जुहोति । आचार्यः । कस्मात् । समानकर्तृकत्वनिर्देशात् । कश्च समन्वारभते । कुमारः । कस्मात् । अधिकृतत्वात् । हुत्वा उत्तरतोऽग्नेः प्राङ्मुखोऽवतिष्ठते आचार्यः । पुरस्तादाचार्यस्य प्रत्यङ्मुखोऽवतिष्ठते कुमारः । स्थित्वापामञ्जली पूरयति आचार्य आत्मनश्च कुमारस्य च । तत्रार्थादाचार्यस्य पूरयत्यन्यः । पूर्णेन चाञ्जलिनाचार्यः पूर्णमञ्जलिमवक्षारयति । अवसेचयतीत्यर्थः । कस्य । कुमारस्य । आसिच्य देवस्य त्वेत्यनेन मन्त्रेण तस्य कुमारस्य पाणिना पाणिं साङ्गुष्ठं गृह्णीयात् । तत्रार्थादासेचने सिद्धे किमर्थमासेचनग्रहणं पुनः क्रियते । तत्रेदं प्रयोजनम् । कथमाचार्य आसेचनं कुर्यान्न कुमार इति । असाविति सर्वनामनिर्देशः स्थानविभक्त्यर्थः ॥ २ ॥

'सविता ते हस्तमग्रभीत्--असौ' इति द्वितीयम् ॥ ३ ॥

सविता त इत्यनेन मन्त्रेण द्वितीयं पाणिं गृह्णाति ॥ ३ ॥

'अग्निराचार्यस्तव--असौ' इति तृतीयम् ॥ ४ ॥

अग्निराचार्य इत्यनेन मन्त्रेण तृतीयं पाणिं गृह्णाति ॥ ४ ॥

आदित्यमीक्षयेत-- 'देवसवितरेष ते ब्रह्मचारी। तं गोपाय। स मा मृत' इत्याचार्यः ॥ ५ ॥

आदित्यमीक्षयेत् देव सवितरित्यनेन मन्त्रेण । आचार्य इमं मन्त्रं ब्रूते । तत्रैके द्विधैनं मन्त्रं कुर्वन्ति । देव सवितरेष ते ब्रह्मचारी तं गोपाये-

त्येतावदाचार्यस्य[1] भवति । अथ स मा मृतेति ब्रह्मचारिणः । [सः] अनेन मन्त्रेणाचार्यमीक्षत इत्येके संप्रतिपन्नाः । तदेतन्नोपपद्यते । मन्त्रस्याविभक्तत्वात् । मन्त्रविभागकारणं न चास्ति । इतिना च मन्त्रविभागः स्यात् । ननु चानितिका अपि मन्त्रा भवन्ति[2] । यथा रथारोहणे चक्रयोरक्षाधिष्ठानस्य च । तत्र इतिर्नास्ति । एवमिहापि । तदेतन्नोपपद्यते । कस्मात् । अतुल्यत्वात् । तत्र स एव प्रयोक्ता उभयोर्मन्त्रयोः । इह तु कर्त्रन्तरम् । तस्मादेकमिच्छन्ति । ननु च येऽप्येकमिच्छन्ति तेषामाचार्यग्रहणमपार्थकम् । कस्मात् । आचार्यस्यैवायं मन्त्रो भविष्यति यथान्ये मन्त्राः । तत्तु क्रियते । कथम् । ज्ञापकार्थम् । अन्यत्र ईक्षितुर्मन्त्रो यथा स्यात् । यथा ' भुक्तवन्तमपामञ्जलिपूर्णमादित्यमुपस्थापयेदिति । त्वं व्रतानाम् ' (आ० श्रौ० ८. १४. ६) इत्यत्र । तस्मादिहाचार्यग्रहणं[3] कर्तव्यम् । आचार्यस्यैवायं मन्त्रो भवतीति साधितम् ।। ५ ।।

' कस्य ब्रह्मचार्यसि । प्राणस्य ब्रह्मचार्यसि । कस्त्वा कमुपनयते । काय त्वा परिददामि ' इति ।। ६ ।।

कस्य ब्रह्मचार्यसीत्ययं चाप्याचार्यस्यैव भवति मन्त्रः । कस्मात् । अधिकारात् । प्रदानसंयोगाच्च । प्रजापतयेऽसौ ब्रह्मचारी प्रदीयते । प्रजापतिना चोपनीतोऽसीत्येतदुक्तं भवति ।। ६ ।।

' युवा सुवासाः परिवीत आगात् ' (ऋ० सं० ३. ८. ४) **इत्यर्धर्चेनैनं प्रदक्षिणमावर्तयेत् ।। ७ ।।**

युवा सुवासा इत्यर्धेन ब्रह्मचारिणं प्रदक्षिणमावर्तयति । ननु[4] एनमिति[5] प्राप्नोति । कस्मात् । अधिकृतत्वात् । तत्तूच्यते । कथमावर्तयितुर्मन्त्रः स्यान्नावर्त्यमानो ब्रूयात् कुमारः ।। ७ ।।

---

[1] Portion from here up to मन्त्रा भवन्ति is omitted in B.
[2] इतिकरणा दृष्टा मन्त्रा भवन्ति—added in B. [3] अपि—added in A, C, D. [4] Omitted in A, C, D. [5] एनमित्यर्थतः—D.

तस्याध्यंसौ पाणी कृत्वा हृदयदेशमालभेतोत्तरेण ॥ ८ ॥

तस्य ब्रह्मचारिणः । अध्यंसौ । अधीत्युपरिभावे । उपरि पाणी अंसयोर्हृत्वा हृदयदेशमालभेत उत्तरेणार्धर्चेन । कस्योत्तरेण । या प्रकृता ऋक् । आलभेतेति स्पृशेदित्युक्तं भवति ॥ ८ ॥

अग्निं परिसमुह्य ब्रह्मचारी तूष्णीं समिधमादध्यात् ॥ ९ ॥

तत्र परिसमूहनविधानमपार्थकम् । कस्मात् । प्रकृतत्वादग्नेः । सर्वथा च संस्कारार्थं[1] परिसमूहनं क्रियते । संस्कृतश्चासावग्निः । तेन अग्निं परिसमुह्येति शक्यमनारब्धुम् । न त्विदमारभ्यमाणमिह प्रयोजनं भवति । अन्यार्थमारभ्यते । एवं चेत् कस्मात् तत्रैव नारभ्येत यत्र प्रयोजयति । प्रकरणमुपजीवन्निहाचार्य आरभते । प्रथमं चेदं समिदाधानम् । तस्मादिहैवारब्धव्यम् । क्व पुनः प्रयोजयति । 'सायं प्रातः समिधमादध्यात्' (१. २२. ५) इत्यत्र प्रयोजयति । इह ब्रह्मचारिग्रहणमाचार्यनिवृत्त्यर्थम् । अतश्च ज्ञापितं भवत्याचार्यस्यैव पूर्वे मन्त्रा अभूवन्निति ॥ ९ ॥

तूष्णीं वै प्राजापत्यं प्राजापत्यो ब्रह्मचारी भवतीति विज्ञायते ॥ १० ॥

विज्ञायत इति ब्राह्मणम् । यस्मात् प्राजापत्यो ब्रह्मचारी तस्मात् तूष्णीं समिधमभ्यादधाति । कथं पुनः प्राजापत्यो ब्रह्मचारी भवतीति । प्रजापतये यस्मादयं परिदत्तः 'कस्त्वा क उपनयते काय त्वा परिददामि' इत्येवं तेन[2] प्राजापत्यः संवृत्तः । सर्वत्र प्राजापत्यास्वाहुतिषु यस्मात्[3] तूष्णीमेवोपदेशः तेनोपपद्यते प्राजापत्यो ब्रह्मचारीति[4] ॥ १० ॥

इति प्रथमे विंशतितमा कण्डिका

---

[1] संस्कारार्थः—A, C, D. [2] इत्येवमन्तेन—A, C, D. [3] यस्य—A, C, D. [4] भवतीति—added in A, C, D.

मन्त्रेण हैके ।। १ ।।

एके आचार्याः समिदाधानं मन्त्रेणेच्छन्ति । तत्रायं हकारः [1]अभिमतपक्षप्रदर्शनार्थः । पूर्वस्य पक्षस्य श्रुतिसंयोगाद् बलीयस्त्वं दृष्ट्वाचार्येण हकारः प्रयुज्यते । तस्मात् तुल्यबलीयस्त्वं भवति । तुल्यबलयोश्च[2] विकल्प उपपद्यते ।। १ ।।

' अग्नये समिधमाहार्षं बृहते जातवेदसे ।
तया त्वमग्ने वर्धस्व समिधा ब्रह्मणा वयं स्वाहा ' ।।
इति ।। २ ।।

अग्नये समिधमित्यनेन मन्त्रेण समिदाधीयते ।। २ ।।

स समिधमाधायाग्निमुपस्पृश्य मुखं संमार्ष्टि त्रिः ' तेजसा मा समनज्मि ' इति ।। ३ ।।

समिधमाधाय स ब्रह्मचारी अग्निमुपस्पृशति । अग्निमुपस्पृश्य मुखं संमार्ष्टि त्रिः । तेजसा मा समनज्मीत्यनेन मन्त्रेण । तत्र स इत्यनर्थकः। कस्मात् । प्रकृतत्वात् । तत्त्वारभ्यते नियमार्थम् । कथमन्यत्र समिदाधाने संमार्जनं न प्रसज्येतेति । ' समिधौ वा जपेद्वा ' (३. ६. ७) इत्यत्र मा भूदिति । समिद्ग्रहणमपार्थकम् । प्रकृतत्वात् । तत् क्रियते । उभयोरपि पक्षयोर्यथा स्यादिति । तदेतन्नोपपद्यते । कस्मात् । तत्र समिद्ग्रहणस्य प्रत्यक्षोपदेशात् । तत्तु[3] क्रियते । कथमयं विधिः[4] कृत्स्न उभयत्र स्यादिति । आधायग्रहणं[5] किमर्थं क्रियते । ' सायं प्रातः समिधमादध्यात् ' (१. २२. ५) इत्यत्रापि यथा स्यादुत्तरतोऽपि[6] विधिरिति ।। ३ ।।

---

[1] नियतपक्ष—B. [2] तुल्यबलीयसोश्च—A, C, D. [3] तत्र—B.
[4] तत्र—added in B. [5] आधानग्रहणं—A, C, D. [6] स्यादिति उत्तरो—B.

तेजसा ह्येवात्मानं समनक्तीति विज्ञायते ।। ४ ।।

अथ श्रुत्याकर्षणं कस्मात् क्रियते । कथमग्नेरुपस्पर्शनं त्रिः क्रियेतेति ।। ४ ।।

'मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु ।
मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु ।।
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ।
यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासम् ।।
यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासम् ।
यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासम् ।।'
इत्युपस्थाय जान्वाच्योपसंगृह्य ब्रूयात् ।। ५ ।।

मयि मेधामिति मन्त्रेणोपस्थाय जानु[1] पातयित्वा उपसंग्रहणं करोति । उपसंग्रहणमित्याचार्यस्य पादौ गृह्णाति । स्पृशति वा । एतदुपसंग्रहणमित्युच्यते । एवमुपसंगृह्य ब्रूयात् ।। ५ ।।

किमिति ब्रूयात्––

'अधीहि भोः सावित्रीं भो३ अनुब्रू३हि' इति ।। ६ ।।

एवमाचार्यं ब्रूते ।। ६ ।।

तस्य वाससा पाणिभ्यां च पाणी संगृह्य सावित्रीमन्वाह पच्छोऽर्धर्चशः सर्वाम् ।। ७ ।।

तस्य ब्रह्मचारिणो वाससा पाणिभ्यां च पाणी संगृह्णाति । कतरेण वाससा पाणी संगृह्णातीत्येतत् संदिह्यते । ब्रवीति । यदुत्तरं वास

---

[1] जानुं—A, C, D.

आचार्यस्य तेन संगृह्णाति । तन्न भवति । अत एव तस्येत्यधिकारमारभ्यते । कथं ब्रह्मचारिणो यद्वासस्तेन पाणी संगृह्णीयादिति । संगृह्य सावित्रीमन्वाह पच्छोऽर्धर्चशः सर्वाम् ।। ७ ।।

यथाशक्ति वाचयीत ।। ८ ।।

तेन यथाशक्ति वाचयति । [1]पच्छः तथार्धर्चश उक्त्वा यदि न शक्नोति यथाशक्ति वाचयति[2]। तथा सर्वां वाचयति यथाशक्ति ।। ८ ।।

हृदयदेशेऽस्योर्ध्वाङ्गुलिं पाणिमुपदधाति— 'मम व्रते हृदयं ते दधामि मम चित्तमनु चित्तं ते अस्तु । मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम् ।।' इति ।। ९ ।।

वाचयित्वा हृदयदेशेऽस्य ऊर्ध्वाङ्गुलिं पाणिमुपदधाति मम व्रत इत्यनेन मन्त्रेण । हृदयदेशे हृदयसमीप[3] इत्युक्तं भवति । उपदधाति स्थापयतीत्यर्थः ।। ९ ।।

इति प्रथमे एकविंशतितमा कण्डिका

मेखलामाबध्य दण्डं प्रदाय ब्रह्मचर्यमादिशेत् । 'ब्रह्मचार्यस्यपोऽशान कर्म कुरु दिवा मा स्वाप्सीराचार्याधीनो वेदमधीष्व' इति ।। १ ।।

मेखलामाबध्य दण्डं प्रयच्छति[4] । दण्डं प्रदाय ब्रह्मचर्यमादिशेत् । कथमादिशति । ब्रह्मचार्यसि । ब्रह्मचारी त्वमसि । अपोऽशानेति ।

---

[1] यथा अर्धर्चशो वक्तुं स न शक्नोति यथाशक्ति वाचयति—B. [2] एवं पच्छोऽप्युच्यमाने B. [3] हृदयसामीप्य इति—A, C, D. [4] ददाति—B

[1]नियमप्राप्तमाचमनं कुर्वित्येतदुक्तं भवति । कर्म कुरु यच्छास्त्रविहितम् । दिवा मा स्वाप्सीः । [2]दिवाशयनप्रतिषेधः । आचार्याधीनो वेदमधीष्व । सततं शयनपानभोजनादिष्वध्ययने च नित्यमाचार्याधीनेन भवितव्यमित्येतदुक्तं भवति ॥ १ ॥

द्वादश वर्षाणि वेदब्रह्मचर्यम् ॥ २ ॥

द्वादश वर्षाणीति कालनिर्देशः[3] । द्वादश वर्षाणि वेदब्रह्मचर्यं भवति । वेदब्रह्मचर्यमिति । अथ वेदग्रहणं किमर्थं क्रियते । कथं वेदमात्रस्यैवायं[4] कालनियमः स्यादिति । तेन महानाम्न्यादीनां व्रतानामूर्ध्वं द्वादशभ्यः प्रयोगो भवति । एवं कृते उपनयनात् प्रभृति षोडशे वर्षे गोदानं[5] सिद्धं भवति । वेदग्रहणादयमर्थः साध्यते । इतरथा हि वेदग्रहणं न क्रियेत । एवं तावदेके प्रतिपन्नाः । अन्ये जन्मनः प्रभृति षोडशे वर्षे गोदानमिच्छन्ति[6] द्वादशस्वेवान्तर्भूतम् । कस्मात् । तन्मध्यपतितत्वात् । महानाम्न्यादीनां चापृथग्भावात् तदङ्गत्वाच्च वेदैकदेशत्वाच्च । तस्मात् सहैतैः काण्डव्रतैः कालनियमः । यदि चैतानि द्वादशसु न गण्यन्ते उत्तरस्याप्यसंख्यानं[7] प्राप्नोति 'त्रिरात्रं द्वादशरात्रं संवत्सरं वा' (१. २२. १७) इत्यस्य[8] । तत्र को दोषः । संवत्सरपक्षे सप्तदशे वर्षे गोदानं प्राप्नोति । एष दोषः उपनयनात् प्रभृतीच्छताम् । तेनायं पक्षो[9] नादरणीयः । जन्मनः प्रभृति षोडशे वर्षे भवति । अनियतकालक्रमत्वाच्च वेदव्रतानाम् । ननु चैवमुच्यमाने वेदग्रहणमपार्थकम् । नेत्युच्यते । वेदग्रहणं क्रियते कथमेकस्य द्वादश वर्षाणि ब्रह्मचर्यं[10] प्रसज्येत । एवं चोद्यमाने[11] द्वयोश्चतुर्विंशति-

---

[1] नियमः यतः प्राप्नोत्याचमनं—A, C, D; नियमं प्राप्नोत्याचमनं—B. [2] निशि न—B. [3] संख्यावचनम्—A, C, D. [4] वेदमन्त्रस्यैव—A, C, D. [5] गौदानिकं—B. [6] इच्छन्ति—omitted in A, C, D. [7] अपि संख्या न—B. [8] इत्यत्र—B. [9] तेन नायं पक्षः—A, C, D. [10] वेदब्रह्मचर्यं—A, C, D. [11] चोच्यमाने—A, C, D.

स्त्रयाणां षट्त्रिंशच्चतुर्णामिष्टाचत्वारिंशत् । एवं शास्त्रान्तरदृष्टो विधिर्वेदग्रहणेन प्रदर्शितो भवति । तस्मादारब्धव्यं वेदग्रहणम् ।। २ ।।

ग्रहणान्तं वा ।। ३ ।।

वेदग्रहणान्तं यावत् तावद्[1] ब्रह्मचर्यं भवति । तस्मात् प्रागूर्ध्वं च द्वादशभ्यो वर्षेभ्यः स्नानं भवति । एवंब्रुवताचार्येण त्रिविधं स्नानं प्रदर्श्यते । विद्याव्रतस्नानं विद्यास्नानं व्रतस्नानमिति । यो हि द्वादश वर्षाणि ब्रह्मचर्यव्रतं कृत्वाधीत्य विद्यास्नानं करोति असौ विद्याव्रतस्नातकः । यः प्रागेव[2] विद्यामधीत्य स्नाति[3] स विद्यास्नातकः । यः पुनर्द्वादश वर्षाणि ब्रह्मचर्यं कृत्वानधीत्य विद्यां स्नाति[4] स व्रतस्नातकः । स तु कांचिद्[5] विद्यामुत्सृज्य स्नानं करोति । ग्राम्या आरण्येति[6] उभयलक्षणा च विद्या भवति । तत्र महानाम्न्यादीनां नित्यमध्ययनम् । कस्मात्[7] । येन रहस्ये ब्रूते—यो हि नाधीते एतां[8] विद्यामन्यां वाधीयानोऽपि बह्वीं विद्यां यः स्नानं करोति नैवायं स्नातको भवतीति । तस्मादवश्यमध्ययनं महानाम्न्यादीनां कर्तव्यम्। [9]ग्राम्यां तूत्सृजति विद्यामशक्त्या ।। ३ ।।

सायं प्रातर्भिक्षेत ।। ४ ।।

सायं प्रातश्च भिक्षां चरेदाचार्यार्थे चात्मनश्चाशनार्थे[10] । यदा त्वन्यतरत् कारणं नास्ति तदा भिक्षा न गृहीतव्या[11] ।। ४ ।।

---

[1] वेदग्रहणान्तं वा—D. [2] अतः प्रागूर्ध्वं—A, C, D. [3] स्नातः—A, C, D. [4] स्नातः—A, C, D. [5] अत्र कां—A, C, D. [6] ग्राम्यामारण्यामिति—A, C, D. [7] तस्मात् यो हि रहस्ये ब्रवीति—A, C, D. The following statement is based on the *Aitareya Āraṇyaka* V. 3. 3. It is not however an exact quotation. [8] एकां—B. [9] ग्राम्यानुत्सृजति—B. [10] आत्मनश्चार्थे—A, C, D. [11] कारयितव्या—A, C, D.

सायं प्रातः समिधमादध्यात् ॥ ५ ॥

समिदाधानं च सायं प्रातश्च करोति[1]। तत्र समिदाधानधर्मा अग्निपरिसमूहनादय उपस्थानान्ता उक्ताः। तत्र च प्रदर्शितं यथा समिदाधाने [ते] भवन्तीति। इह पुनः सायंप्रातर्ग्रहणं न कर्तव्यम्। कस्मात्। प्रकृतत्वात्। तत् क्रियतेऽसंबन्धार्थम्। संबन्धे सति को दोषः। क्रमनियमः प्राप्नोति। तस्मात् क्रमनियमनिवृत्त्यर्थं पुनः सायंप्रातर्ग्रहणं क्रियते। अन्यतराक्रियायां चान्यतरा क्रिया प्राप्नोति। तेन भिक्षाग्रहणं [2]चानित्यकरणमपेक्षते। समिदाधानं नित्यम्। तस्मादवश्यं कर्तव्यं सायं-प्रातर्ग्रहणम् ॥ ५ ॥

अप्रत्याख्यायिनमग्रे भिक्षेत ॥ ६ ॥

यो हि न प्रत्याचष्टे तादृग्लक्षणं प्रथमं भिक्षेत। प्रत्याख्यानशीलः प्रत्याख्यायी तादृशं न भिक्षेत। याचेतेत्यर्थः। अग्रे प्रथममित्यर्थः। पश्चादन्यानिति। तत्र संशयः। किमेतद् भिक्षान्तरमुत याचनोपाय इति। किं चातः। यदि तावद् याचनोपायः अत्राप्रत्याख्यायिनं पूर्वं याचित्वा पश्चादन्येषामनियमः। भिक्षान्तरमिदम्। तस्मादन्येऽपि याच्यन्ते ॥ ६ ॥

अप्रत्याख्यायिनीं वा ॥ ७ ॥

अप्रत्याख्यायिनीं वा स्त्रियं याचेत। किमत्र सायंप्रातर्भैक्षस्यायं[3] विधिः। नेत्युच्यते। भिक्षान्तरमेवेदमिति गम्यते ॥ ७ ॥

[4]'भिक्षां भवान् ददातु, 'अनुप्रवचनीयम्—' इति वा ॥ ८ ॥

---

[1] सायं प्रातरेव भवति—A, C, D; [2] अनित्यं कारणम्—A, C, D. [3] भिक्षणस्य—A, C, D. [4] भवान् भिक्षां—B, D.

भिक्षां भवान् ददातु । अनुप्रवचनीयमिति वेत्ययं भिक्षां याचते[1] । अनुप्रवचनीयोपदेशाद् गम्यते अनुप्रवचनीयार्थमिदं भिक्षायाचनमिति । अथ सायं प्रातः कथं भिक्षेतेति । भवत्पूर्वामिति[2] । एवं स्मृतिप्रामाण्यात् । इदं तु भिक्षायाचनं सर्वेषां वर्णानां भवति । कस्मात् । अविशेषात् । यदा तु स्त्री याच्यते तदा भिक्षां भवती ददातु, अनुप्रवचनीयं भवती ददात्विति वा ॥ ८ ॥

तदाचार्याय वेदयित्वा[3] तिष्ठेदहःशेषम् ॥ ९ ॥

तदनुप्रवचनीयार्थमाहृतमाचार्याय[4] वेदयीत । निवेद्य तिष्ठेदहःशेषम् । शिष्टं यदहस्तावन्तं कालं स्थानं चोद्यते । आसनं न भवति ॥ ९ ॥

अस्तमिते ब्रह्मौदनम् । अनुप्रवचनीयं श्रपयित्वाचार्याय वेदयीत ॥ १० ॥

अस्तमित आदित्ये ब्रह्मौदनं श्रपयति । ब्रह्मण ओदनः ब्रह्मौदन तं श्रपयति । कः श्रपयति । ब्रह्मचारी । पाकयज्ञतन्त्रविधानेन । अथवा ब्राह्मणानामर्थायायमोदनः पच्यते । अनुप्रवचनीयमिति चास्य संज्ञा भवति । तच्छृतं स[5] आचार्याय निवेदयति[6] ब्रह्मचारी ॥ १० ॥

आचार्यः समन्वारब्धे जुहुयात् 'सदसस्पतिमद्भुतम्' (ऋ० सं० १. १८. ६) **इति ॥ ११ ॥**

---

[1] याचेतेति—B. [2] The passage found above (I. 19. 11) should belong to this place either in the *sūtra* or *bhāṣya*. [3] वेदयीत—B, D. [4] भिक्षामाहृताम् for आहृतम्—B. [5] सत्—A, C, D. [6] वेदयीत—A, C, D.

आचार्यश्च ज्ञात्वा पश्चाज्जुहोति । समन्वारब्धो ब्रह्मचारिणा सदसस्पतिमद्भुतमित्यनेन मन्त्रेण प्रथमामाहुतिं जुहोति ।। ११ ।।

सावित्र्या द्वितीयम् ।। १२ ।।

सावित्रीति[1] प्रथिता ऋक् । तया द्वितीयामाहुतिं जुहोति । अत्र द्वितीयग्रहणमपार्थकम् । उपदेशादेव द्वितीया भविष्यति । द्वितीयेत्युच्यते अधिकारार्थम् । अधिकारे सति किं प्रयोजनम् । यदि नोच्यते 'यद्यच्चात ऊर्ध्वम्' इति तृतीया प्रसज्येत । अतोऽधिकारः क्रियते । कथमनूक्तेन सावित्र्या वैकाहुतिः स्यादिति ।। १२ ।।

यद्यच्चात ऊर्ध्वमनूक्तं स्यात् ।। १३ ।।

यद्यच्चात ऊर्ध्वमिति किमुक्तं भवति । अत्रानेकधा विप्रतिपन्नाः । केचित् तावत् प्रतिमण्डलं होममिच्छन्ति । अन्ये प्रत्यृषिम् । अन्ये प्रत्यनुवाकम् । अन्ये प्रतिसूक्तम् । प्रत्यृचमपरे । सर्वथा चोपपत्तयः शक्यन्ते । अस्य तु वाक्यस्य नैवायमर्थः । किं कारणम् । अनुशब्दचोदितत्वात् । यत्र यत्रानुशब्दो भवति तत्र तत्रैवानुप्रवचनीयं प्राप्नोति । यथा 'महानाम्नीं भो३ अनुब्रूहि' इति । महाव्रतानुवचने च [2]प्राप्नोति । उपनिषदि [3]चेत्युपदेशस्तत्रापि साध्यते । अन्ये[4] पुनरनुशब्दमध्ययने वर्णयन्ति । तत्र[5] यद्यदधीते तस्य तस्यानुप्रवचनीयं भवति । तत्र पक्षाः प्रागुक्ताः ।। १३ ।।

ऋषिभ्यस्तृतीयम् ।। १४ ।।

तत्र संशयः । किमयं मन्त्रः उतोपदेशक इति । येषां मन्त्रस्तेषाम् ऋषिभ्यः स्वाहेति प्राप्नोति । येषामुपदेशकस्तेषां यावन्त ऋषयोऽनूक्तास्तेषां

---

[1] या सा—added in B. [2] प्राप्योपनिषदि—A, C, D. [3] नेत्यपदेशः—B. [4] इत्येव—B. [5] Omitted in B.

सर्वेषां प्रत्यृषि होमः प्राप्नोति । तत्रायं मन्त्र इत्युच्यते । कथं पुनर्ज्ञायते । तृतीयग्रहणात् । नेत्युच्यते तृतीयग्रहणस्येदं प्रयोजनम् । यदि नोच्येत[1] द्वितीयाधिकारे वर्तमाने अयमपि मन्त्रो द्वितीय एव स्यात् । तस्मात् तृतीयग्रहणं कर्तव्यम्[2] ।। १४ ।।

सौविष्टकृतं चतुर्थम् ।। १५ ।।

सौविष्टकृतं चतुर्थमिति संख्यावचनम् । अस्य[3] पुनः संख्यावचनस्य प्रयोजनमाज्यभागनिवृत्यर्थमुपदिशन्ति । बहुधा चात्र विप्रतिपत्तिः । आगमस्त्वेतत् ।। १५ ।।

ब्राह्मणान् भोजयित्वा वेदसमाप्तिं वाचयीत ।। १६ ।।

तस्मादेव चरोर्ब्राह्मणान् भोजयति । कस्मात् । अधिकृतत्वात् । तस्य च[4] ब्राह्मणार्थत्वात् ।। १६ ।।

अत ऊर्ध्वमक्षारलवणाशी ब्रह्मचार्यधःशायी त्रिरात्रं द्वादशरात्रं संवत्सरं वा ।। १७ ।।

अत ऊर्ध्वमेते नियमा भवन्ति । अक्षारलणाशित्वम् । ब्रह्मचारिग्रहणं किमर्थम् । आचार्यनिवृत्त्यर्थम् । कियन्तं कालम्[5] । त्रिरात्रं द्वादशरात्रं संवत्सरं वा । अत ऊर्ध्वमिति नारब्धव्यम् । कथम् । यत्तु[6] यस्मादूर्ध्वमारभ्यते तत्[7] तत्रैव भवति[8] । इदं चारभ्य प्रयोजनार्थम् । किं प्रयोजनम् । अनुप्रवचनीयेन सह संबन्धकरणार्थम् । किंचान्यत् ।

---

[1] नोच्यते तत्—B. [2] मन्त्र इति तज्ज्ञापकम्—added in A, C, D. [3] अन्ये—A, C, D. [4] चरोः—A, C, D. [5] एतानि—added in D. [6] Omitted in A, C, D. [7] तत्र—A, C, D. [8] वदन्ति—A, C, D.

कथमेतानि व्रतानि अत ऊर्ध्वमेव स्युर्न प्रागिति । किं सिद्धं भवति[1] । प्राग्भोजने अक्षारलवणाशित्वं न प्रसज्येत । भुक्तमभुक्तं वा कुमारमुपनयीतेत्यनियमः सिद्धो भवति ।। १७ ।।

चरितव्रताय मेधाजननं करोति ।। १८ ।।

योऽयं नियम उक्तस्तस्यान्ते मेधाजननं नाम कर्म करोति । चरितव्रतायेति न वक्तव्यम् । तदपि संबन्धार्थमेवोच्यते । संबन्धे सति प्रयोजनं यत्र मेधाजननं तत्र कथं व्रतचर्या स्यादिति । यत्र च व्रतचर्या तत्र चानुप्रवचनीयमित्येतत् प्रयोजनम् । क्व पुनर्मेधाजननं नास्ति । उत्तरत्र वक्ष्यति —'कृताकृतम्' (१. २२. २३) इति । तत्र व्रतचर्याया अपि कृताकृतत्वं भवति ।। १८ ।।

अनिन्दितायां दिश्येकमूलं पलाशं कुशस्तम्बं वा पलाशापचारे प्रदक्षिणमुदकुम्भेन त्रिः परिषिञ्चन्तं वाचयति—'सुश्रवः सुश्रवा असि यथा त्वं सुश्रवः सुश्रवा अस्येवं मां सुश्रवः सौश्रवसं कुरु । यथा त्वं देवानां यज्ञस्य निधिपोऽस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासम्' इति ।। १९ ।।

अनिन्दितायां दिशि । तत्र तिस्रो दिशो निन्दिताः । दक्षिणा प्राग्दक्षिणा प्रत्यग्दक्षिणेति । एकमूलं पलाशम् । एकमूलमविशाखमित्यर्थः । कुशस्तम्बं वा पलाशापचारे । पलाशाभाव इत्युक्तं भवति । पलाशाभावे कुशस्तम्बं वा परिषिञ्चति । अथ पुनः पलाशग्रहणं किमर्थं क्रियते । पुनः पलाशग्रहणं कुर्वन्नेतज्ज्ञापयति—अनेकमूलस्याप्यभावे कुशस्तम्बपरिषेचनमिति । प्रदक्षिणमुदकुम्भेन त्रिः परिषिञ्चति[2] ब्रह्मचारी । तं

---

[1] This sentence is omitted in A, C, D. [2] परिषिञ्चन्तं वाचयति—B.

ब्रह्मचारिणं[1] परिषिञ्चन्तमाचार्यस्त्रिरेव[2] वाचयति सुश्रव इत्येतन्मन्त्रम् । एतावदुपनयनं कर्म[3] ।। १९ ।।

एतेन वापनादि परिदानान्तं व्रतादेशनं व्याख्यातम् ।।२०।।

एतेनेति व्यपदेशः क्रियते । वापनादि परिदानान्तं यद् व्याख्यातं तद् व्रतादेशने कर्तव्यमित्यर्थः । वापनादिग्रहणमलंकारनिवृत्त्यर्थम् । 'काय त्वा परिददामि' (१. २०. ६) इत्येतत् परिदानम् । [4]परिदानान्तग्रहणमुत्तरकर्मनिवृत्त्यर्थम् ।। २० ।।

इत्यनुपेतपूर्वस्य ।। २१ ।।

इत्यनुपेतपूर्वस्योपनयनं भवति । किमर्थं पुनरिदमारभ्यते । उत्तरविवक्षया । ननु विशेषा उच्यमाना यस्यैवोपदिश्यन्ते तस्यैव भविष्यन्ति । तस्मादिदमनारब्धव्यम् । इदं त्वारभ्यते । वेदान्तरं उपेतपूर्वो यो[5] वेदान्तरमध्येतुमिच्छति तस्य परिसमाप्तब्रह्मचर्यस्य वेदान्तरे[6] उपनीयमानस्य कथमनुपेतपूर्ववत्[7] स्यादित्येतदर्थमारभ्यते । यस्तु ब्रह्मचर्यादनन्तरं ब्रह्मचर्यं करोति स उपेतपूर्वो भवति ।। २१ ।।

अथोपेतपूर्वस्य ।। २२ ।।

यं विशेषं वक्ष्यामः स उपेतपूर्वस्य भवति ।। २२ ।।

कृताकृतं केशवपनम् ।। २३ ।।

कृताकृतमिति । भवति वा न वेत्युक्तं भवति ।। २३ ।।

---

1 Omitted in A, C, D. 2 एवं—A, C, D. 3 एतावानुपनयनधर्मः—B. 4 परिदानग्रहणम्—A, C, D. 5 Omitted in A, C, D. 6 वेदान्तरम्—A, C, D. 7 अनुपेतपूर्वः—A, C, D.

मेधाजननं च ॥ २४ ॥

मेधाजननं च कृताकृतं भवति ॥ २४ ॥

अनिरुक्तं परिदानम् ॥ २५ ॥

न निरुच्यते अनिरुक्तम् । नाभिधीयत इत्यर्थः । तत्रैके परिदानशब्दमेवानिरुक्तमिच्छन्ति । वयं तु नैवम् । परिदीयते येन[1] स परिदानो मन्त्रः । तत् परिदानमनिरुक्तं भवति । एवं तूच्यमाने परिदानं चेत्येतावता सिद्धम् । तत्र को दोषः । कृताकृतं परिदानं प्राप्नोति । न परिदानमित्येवमस्तु । एवमुच्यमाने दोषः । को दोषः । कालश्चेत्ययं वक्ष्यति । तत्र कृताकृतत्वं कालस्य न शक्यते कर्तुम् । कस्मात् । नित्यत्वात् । कालस्याभावोऽपि तथैव । तेनावश्यं शब्दान्तरेण कालार्थमुपदेशः कर्तव्यः । तस्मादनिरुक्तमित्युच्यते । तेन परिदानमनिरुक्तं भवति । कालश्च । परिदानशब्दस्त्वयं[2] कर्मवाची । कर्मणि च प्रतिषिद्धे प्राङ्मन्त्रप्रतिषेधः कृतो भवति । तद्गुणत्वात् ॥ २५ ॥

कालश्च[3] ॥ २६ ॥

' तत् सवितुर्वृणीमहे ' इति सावित्री ॥ २७ ॥

उपेतपूर्वस्येयं सावित्री भवति । अनुपेतपूर्वस्य अन्या प्रसिद्धा[4] ॥ २७ ॥

इति प्रथमे द्वाविंशतितमा कण्डिका

---

[1] मन्त्रेण—added in B. [2] शब्दः स्वयं—A, C; शब्दश्चायं—B.
[3] This *sūtra* is left out in all MSS. But its existence is referred to in the *bhāṣya* on the previous *sūtra*. [4] अन्यापि सिद्धा—A, C, D.

ऋत्विजो वृणीतेऽन्यूनानतिरिक्ताङ्गान् 'ये मातृतः पितृतश्च' इति यथोक्तं पुरस्तात् ॥ १ ॥

ऋत्विजो वृणीते संभजते। कर्मार्थं परिग्रहं करोतीत्येतदुक्तं भवति। अन्यूनान् वृणीतेऽनतिरिक्तांश्च। किं षोडशभ्योऽन्यूनान् अनतिरिक्तांश्च। नेत्युच्यते। प्रमाणतः परिमाणतश्च। तत्र प्रमाणतो नातिदीर्घान् नातिह्रस्वान्। परिमाणतश्च [1]पञ्चाङ्गुलय इति। षडङ्गुलयस्त्र्यङ्गुलयो वा न भवन्ति। एवं शास्त्रोक्तप्रमाणात् परिमाणाच्च अन्यूनानतिरिक्ताश्च भवन्ति। 'ये मातृतः पितृतश्च' (आ० श्रौ० ९. ३. २०) इति यथाव्याख्यातं पुरस्तात्। तादृशैर्ऋत्विग्भिर्भवितव्यम् ॥ १ ॥

युवान[2] ऋत्विजो, वृणीत इत्येके ॥ २ ॥

एके आचार्या युवानो वरयितव्या इति मन्यन्ते। पञ्चधा किल वयश्चिन्त्यते[3]। बालो युवा मध्यो वृद्धः स्थविर इति। तत्र ये युवानस्तेषां वरणमिच्छन्ति। अन्ये पुनः कर्मसमर्थानां वरणमिच्छन्ति। अथर्त्विगधिकारेऽनुवर्तमाने ऋत्विग्ग्रहणं किमर्थम्। अनृत्विजां युवत्वं मा भूदिति। वरणसामान्यादनृत्विजामप्ययं गुणः[4] प्रसज्येत। तन्निवृत्त्यर्थमृत्विग्ग्रहणं क्रियते। के पुनस्ते। चमसाध्वर्यवः ॥ २ ॥

ब्रह्माणमेव प्रथमं वृणीतेऽथ होतारमथाध्वर्युमथोद्गातारम् ॥ ३ ॥

---

[1] पञ्च—omitted in B. [2] All the MSS. read the word this way although it is un-Paninian (cf. Pāṇini, vi. 4. 133) and it is corrected as यूनः in all printed editions of *AGS*. [3] वयोऽस्तीत्युच्यते—B. [4] Omitted in A, C, D.

तत्र ब्रह्मणः प्रथमवरणमुपदिश्यते । पश्चाद्धोतुरथाध्वर्योरथोद्गातुरिति । ब्रह्माणमेवेत्येवकारः किमर्थः । अवधारणार्थः । किमर्थमवधारयति । ब्रह्मणः प्रथमं वरणं यथा स्यादिति । यद्येवं नार्थ एवकारेण । उपदेशादेव ब्रह्मणः प्राथम्यं सिध्यति । एवं तर्हि नियमार्थ एवकारः ।[1] ब्रह्मण एव प्रथमं वरणं स्यादिति । एवं नियमं[2] कुर्वन् ज्ञापयति होत्रादीनामनियतः क्रमो भवतीति । तस्मादेवकारः कर्तव्यः ।। ३ ।।

सर्वान् वा येऽहीनैकाहैर्याजयन्ति ।। ४ ।।

सर्वान् वा वृणीते येऽहीनैकाहैर्याजयन्ति । तत्राहीनैकाहग्रहणमपार्थकम् । सर्वान् वेत्युच्यमाने शमित्रादीनामपि वरणं प्रसज्येत । तस्मात् कर्तव्यमेव । न प्राप्नोति । कस्मात् । ऋत्विगधिकारान्न भविष्यति । उच्यते । येषां चत्वार ऋत्विजस्तेषां भवत्येतत् प्रयोजनम् । कथम् । सर्वान् वा कर्तॄनित्यध्याहारः कर्तव्यो भवति । तस्मात् ऋत्विक्शब्दस्याध्याहारो न शक्यते कर्तुम् । कस्मात् । वरणस्याम्नातत्वात् ऋत्विजां सर्वेषाम् । तेन कर्तॄणामिति वाक्याध्याहारः[3] क्रियते । एवं सति शमित्रादीनां प्रसज्येत । तन्निवृत्त्यर्थमहीनैकाहग्रहणं कर्तव्यम् । येषां पुनरयमृत्विक्शब्दः सर्वेषु कर्तृषु वर्तते तेषामेतदतिरिच्यते[4] । उच्यते । तेषामपि तदेव प्रयोजनम् । ननु ऋत्विगधिकारान्न भविष्यतीत्युच्यते । एवमपि स्यात् । कस्मात् । अनृत्विग्वरणदर्शनात् । के पुनरनृत्विजो व्रियन्ते[5] । चमसाध्वर्यवः । उच्यते । अन्येषामविधानान्न भविष्यति । एवमपि चमसाध्वर्यूणां च वचनेनाम्नातम् । अन्येषामपि सामान्याद्वरणप्रसङ्गः स्यात् । किं सामान्यम् । 'आपो मे होत्राशंसिन्य इति होत्रकान्' (१. २३. ११) इति वचनाद् यथा होतृपुरुषेभ्योऽतिरिक्ता अशंसि-

---

[1] कथम्—added in B. [2] स्यादित्येवमनियमं—A, C, D.
[3] इत्ययं वेत्यध्याहारः कर्तव्यो भवति—A, C. [4] व्यतिरिच्यते—D.
[5] वृणीयन्ते यथा—A, C, D.

तारोऽपि प्रतिप्रस्थात्रादयो गृह्यन्ते एवमन्येषामपि शमित्रादीनामपि वरणं प्रसज्यते । तन्निवृत्त्यर्थम् । कथं पुनर्ज्ञायते प्रतिप्रस्थात्रादयो गृह्यन्त इति । उच्यते । 'मुख्यान् वा पृथग्घोत्रका उपह्वयध्वम् इतीतरान्' (आ० श्रौ० ५. ६. १७) इति वचनात्[1] । तेन यथा प्रतिप्रस्थात्रादिषु होत्रकशब्दो वर्तते एवं शमित्रादिषु होत्रकशब्दो भवति । तस्मात् शमित्रादिष्वपि सामान्याद् वरणं प्रसज्येत । तन्निवृत्त्यर्थं वचनमारभ्यते येऽहीनैकाहै-र्याजयन्तीति ।। ४ ।।

सदस्यं सप्तदशं कौषीतकिनः समामनन्ति । स कर्मणा-मुपद्रष्टा भवतीति । तदुक्तमृग्भ्याम्—'यमृत्विजो बहुधा कल्पयन्तः' (ऋ० सं० ८. ५८. १) **इति ।। ५ ।।**

सदसि भवः सदस्यः सप्तदशो भविष्यतीति कौषीतकिन आचार्या मन्यन्ते । किमसौ करोति । कर्मणामुपद्रष्टा भवति । उपद्रष्टेति यागस्य[2] वोढा समर्थः करोति । [3]असावर्थ आभ्यामृग्भ्यामभिधीयते—यमृत्विज इति । तत्र सप्तदशग्रहणं न कर्तव्यम् । उपदेशादेवायं सप्तदशो भवति । एवं सिद्धे यत् सप्तदशग्रहणं करोति तज्ज्ञापयति अयमपि ऋत्विक्सधर्मा[4] भवतीति । [5]ऋत्विक्सधर्मत्वे किं प्रयोजनम् । उपस्थानं प्रसर्पणमित्येवमादि सामान्यं कर्म प्रसिद्धं[6] भवति । अथवा सप्तदशग्रहणं नियमार्थम् । कथमेक एव सदस्यः स्यादिति । अन्येषां त्वनेके सदस्या दृष्टाः । [7]प्रैषदर्शनाच्च । 'प्र यन्तु सदस्यानाम्' (श० ब्रा० ४. २. १. २६) इति तन्निवृत्त्यर्थं सप्तदशग्रहणम् । कौषीतकिनः कल्पे समामनन्ति न श्रुतौ । कथं गम्यते । मन्त्रलिङ्गोपदेशात् । ऋग्भ्यां सदस्योऽभिष्टूयते[8] ।। ५ ।।

---

[1] वचनदर्शनात्—D. [2] योगस्य—A. C. [3] अयमर्थः—A, C. [4] ऋत्विग्धर्मो—A. C, D, [5] ऋत्विग्धर्मत्वे— A, C, D. [6] प्रतिषिद्धं—B. [7] Omitted in A, B. [8] निष्क्रियते—B.

होतारमेव प्रथमं वृणीते ॥ ६ ॥

होतारं प्रथमं वृणीते । एवकारः किमर्थः । अवधारणार्थः । किमवधारयति । होतारमेव न ब्रह्माणमिति । एवं सति ब्रह्मण उपदेशोऽपार्थकः । उच्यते । नापार्थकः । [1]विनिविष्टविषयावेतौ । यदा चतुर्णां वरणं तदा ब्रह्मण एव नान्यस्य । यदा सर्वेषां वरणं तदा होतुरेव नान्यस्येति । अथवा द्वयोरवधारितयोर्होतृब्रह्मणोर्विकल्पमिच्छन्ति ॥ ६ ॥

'अग्निर्मे होता स मे होता होतारं त्वामुं वृणे' इति होतारम् ॥ ७ ॥

अग्निर्मे होतेत्यनेन मन्त्रेण होतारं वृणीते । तत्र होतृग्रहणमपार्थकम् । कस्मात् । अधिकृतत्वात् । उच्यते । होतृग्रहणं प्रयोजनार्थं क्रियते । किं प्रयोजनम् । प्रथमं व्रियमाणे[2] होतर्ययं मन्त्र आम्नातः । यदा द्वितीयस्तदा न स्यात् । इष्यते च । तदर्थं होतृग्रहणं क्रियते ॥ ७ ॥

'चन्द्रमा मे ब्रह्मा स मे ब्रह्मा ब्रह्माणं त्वामुं वृणे' इति ब्रह्माणम् ॥ ८ ॥

चन्द्रमा मे ब्रह्मेत्ययं ब्रह्मणो वरणमन्त्रः । उत्तरेषां चानुप्रदर्शनार्थं कृत्स्नः[3] पठ्यते ॥ ८ ॥

'आदित्यो मेऽध्वर्युः—' (ष० ब्रा० २. १०) **इत्यध्वर्युम् ॥९॥**

आदित्यो मेऽध्वर्युरित्यध्वर्युं वृणीते[4] ॥ पूर्ववदनुवृत्तिर्मन्त्रस्य ॥९॥

---

1 अपिनिविष्ट—A, C, D. 2 वृणीयमाने—A, C, D. 3 Omitted in A, C, D. 4 वृणोति—D.

'पर्जन्यो म उद्गाता—' (ष० ब्रा० २. १०) **इत्युद्गातारम् ।। १० ।।**

पर्जन्यो मे इत्यनेन मन्त्रेणोद्गातारं वृणीते ।। १० ।।

'आपो मे होत्राशंसिन्यः–'[1] इति होत्रकान् ।। ११ ।।

आपो मे होत्राशंसिन्य[1] इति मन्त्रेण होत्रकान् वृणोति । अत्र [2]होत्रकग्रहणेन सर्वेऽवशिष्टा होत्रका गृह्यन्त इति । तत्र ज्ञापकम्—'होत्रका उपयह्वयध्वम्' इत्येतत् ।। ११ ।।

'रश्मयो मे चमसाध्वर्यवः—' (ष० ब्रा० २. १०) **इति चमसाध्वर्यून् ।। १२ ।।**

रश्मयो मे चमसाध्वर्यव इति मन्त्रेण चमसाध्वर्यून् वृणोति ।। १२ ।।

'आकाशो मे सदस्यः—' (ष० ब्रा० २. १०) **इति सदस्यम् ।। १३ ।।**

आकाशो मे सदस्य इति सदस्यं वृणोति ।। १३ ।।

स वृतो जपेत्—'महन्मेऽवोचो भर्गो मेऽवोचो भगो मेऽवोचो यशो मेऽवोचः स्तोमं मेऽवोचः क्लृप्तिं मेऽवोचस्तृप्तिं मेऽवोचो भुक्तिं मेऽवोचः सर्वं मेऽवोचः' इति ।। १४ ।।

स वृतो जपेत् महन्मेऽवोच इत्येवमादिमन्त्रम् । स इत्येतदतिरिच्यते । उच्यते अन्तस्यैव मा भूदिति । वृतग्रहणात् सर्वेषां भविष्यति । एवं तर्हि

---

[1] शंसिनः—A, C, D. [2] होतृग्रहणेन—A, C, D.

सग्रहणं क्रियते कथं वरणानन्तरमेव जपः स्यादिति । इतरथा हि सर्वेषां यदा वरणं कृतं स्यात् तदा जपः प्रसज्येत । कस्मात् । तथाम्नातत्वात् । तेन सग्रहणमनन्तरार्थं कर्तव्यम् ।। १४ ।।

जपित्वा 'अग्निष्टे होता स ते होता होतारं ते मानुषः' इति होता प्रतिजानीते ।। १५ ।।

जपित्वाग्निष्टे होतेत्यनेन मन्त्रेण होता प्रतिजानीते । अथ जपित्वेति ग्रहणं भूयः किमर्थं क्रियते । कथमन्यदपि जपं जपित्वा प्रतिजानीयादिति । कः पुनरन्यो जपः । 'तन्मामवतु' (१. २३. १८) इत्ययमुच्यते । यद्येवं कस्मादसौ जप इहैव न पठ्यते । अनित्यत्वादिह नोपदिश्यते । कथं पुनरसावनित्यः । तदुत्तरत्रैव ज्ञापयिष्यामः ।। १५ ।।

'चन्द्रमास्ते ब्रह्मा स ते ब्रह्मा' ।। १६ ।।

चन्द्रमास्ते स ते ब्रह्मेति ब्रह्मा प्रतिजानीते ।। १६ ।।

एवमितरे यथादेशम् ।। १७ ।।

इतरे कर्तारः अध्वर्य्वादयः यथादेशं प्रतिजानते ।। १७ ।।

'तन्मामवतु तन्मा विशतु तन्मा जिन्वतु[1] तेन भुक्षिषीय' इति च याजयिष्यन् ।। १८ ।।

तन्मामवतु तन्मा विशत्वित्येतन्मन्त्रं याजयिष्यन् जपति । अस्ति पुनः कश्चिदयाजयिष्यन् भवति यो व्रियते । अस्तीति ब्रूमः । यथाग्न्याधेये चतुर्णामेव ऋत्विजां वरणं भवति तदा अयाजयितारश्च ते भवन्ति । ननु

[1] Some of the printed editions and MSS. omit तन्मा जिन्वतु. But the tradition known to this editor has it in practice.

च तत्रापि याजयितारस्ते[1] इष्टिभिः । नेत्युच्यते । न तदङ्गं तद्वरणम् । अग्न्याधेयं चाङ्गभूतं कर्मणाम् । तेन कर्मार्थं तद्वरणं[2] न याजनार्थम् । यत्र सोमार्थं वरणं तत्रासौ याजयिष्यन् भवति । तेनायं जपस्तत्र भवति । अग्न्याधेयस्य चाङ्गभूतत्वान्न भवति सत्यपि वरणे । तस्मादयं जपोऽनित्यः । तेन पुरस्तान्न पठ्यते । अनित्यत्वात् । ईदृग्लक्षणैः ऋत्विग्भिर्भवितव्यमित्युक्तं भवति ॥ १८ ॥

अथ कीदृग्लक्षणो याजयितव्य इत्येतदुच्यते—

न्यस्तमार्त्विज्यमकार्यम् ॥ १९ ॥

न्यस्तं त्यक्तम् । यदा स्पर्धमानैर्विवादेन ऋत्विग्भिः आर्त्विज्यं त्यक्तं भवति तन्न कर्तव्यम् ॥ १९ ॥

अहीनस्य नीचदक्षिणस्य ॥ २० ॥

अहीनस्य च क्रतोरार्त्विज्यं न कर्तव्यम् । एवं सत्यहीनानामुपदेशोऽपार्थकः । तस्मात् पाठान्तरं कृत्वा वर्णयन्ति । अहीनस्य नीचदक्षिणस्येति । अल्पदक्षिणस्येत्यर्थः । तस्य न कर्तव्यमिति वर्णयन्ति । एवं वर्णयद्भिरन्येऽल्पदक्षिणा अपि कर्तव्या भवन्तीत्येतत् प्रदर्शितं भवति । ओमिति ब्रूमः । श्रुतिदर्शनाच्च । 'तस्मादाहुर्दातव्यैव यज्ञे दक्षिणा भवत्यल्पिकापीति' (ऐ० ब्रा० ६. ३५) इति । ये चाहीना यथोक्तदक्षिणास्ते च कर्तव्या इति । श्रुतौ च दर्शयति—'न पापः पुरुषो याज्यो द्वादशाहेन' (ऐ० ब्रा० ४. २५) इत्युक्त्वा, पश्चाद् ब्रूते—'ददतं वै ते तमयाजयन् तस्माद् ददद् याज्यः प्रतिगृह्णन्तो वै ते तमयाजयंस्तस्मात् प्रतिगृह्णता याज्यम्' (ऐ० ब्रा० ४. २५) इति । तेन[3] ज्ञायते यथोक्तदक्षिणा अहीनाः कर्तव्या इति ॥ २० ॥

---

[1] तेष्विति—B. [2] क्रमार्थं न तद्वरणार्थम्—A, C, D. [3] तस्मात्—A, C, D.

व्याधितस्यातुरस्य ।। २१ ।।

व्याधितस्यातुरस्य न कर्तव्यमार्त्विज्यम् । आतुर इति तल्पगतः । यस्त्वनातुरो व्याधितस्तस्यानुमोदितं भवति ।। २१ ।।

यक्ष्मगृहीतस्य ।। २२ ।।

यक्ष्मगृहीतस्य च न कर्तव्यम् ।। २२ ।।

अनुदेश्याभिशस्तस्य ।। २३ ।।

अनुदेश्याभिशस्तस्य न कर्तव्यम् । अनुदेश्याभिशस्त इति समानदेशिना[1] योऽभिशस्यते देशान्तरगतस्तस्य न कर्तव्यमित्येके । अन्ये पुनरनुदेश्याभिशस्त इति श्राद्धे यः प्रतिषिद्धस्तस्य च न कर्तव्यम् ।। २३ ।।

क्षिप्तयोनेरिति चैतेषाम् ।। २४ ।।

यस्य माता स्वस्य भर्तरि नावतिष्ठते तस्य च न कर्तव्यम् । एतेषा-मिति । अन्येषामेवंप्रकाराणामिति ।। २४ ।।

सोमप्रवाकं परिपृच्छेत् को यज्ञः क ऋत्विजः का दक्षिणेति ।। २५ ।।

सोमं यः प्रथमं प्रवदति असौ सोमप्रवाक इत्युच्यते । तं परि-पृच्छेत् । किमिति । को यज्ञः, के ऋत्विजः, का दक्षिणा इत्येवं पृच्छेत् ।। २५ ।।

कल्याणैः सह संप्रयोगः ।। २६ ।।

---

[1] सहृदेशिना—B.

पृष्ट्वा कल्याणैः सह संप्रयोगं कुर्यात् । कल्याणो यज्ञः कर्तव्यः । अप्रतिषिद्ध इत्यर्थः । तथा कल्याणैः ऋत्विग्भिः सह कर्म कर्तव्यम् । शास्त्रचोदितैरित्युक्तं भवति । तथा दक्षिणा अपि कल्याणा यथा स्युरिति । न षण्डा न कुलटा न कुब्जा न वृद्धाः । एतेऽत्र अकल्याणा भवन्ति ।। २६ ।।

न मांसमश्नीयुर्न स्त्रियमुपेयुरा ऋतोरपवर्गात् ।। २७ ।।

ऋत्वादौ प्रकृत्य आ [1]अपवर्गान्नियमा भवन्ति । अथ वरणादौ कस्मान्नियमा न भवन्ति । वरणादौ कल्प्यमाने दोषः । यदा मध्यमाया-मुपसदि वरणं भवति तदा प्रागनियमः प्राप्नोति । तच्च नेष्यते । तस्मात् ऋत्वादौ नियमा अध्यवसीयन्ते ।। २७ ।।

'एतेनाग्ने ब्रह्मणा वावृधस्व' (ऋ० सं० १. ३१. १८) **इति दक्षिणाग्नावाज्याहुतिं हुत्वा यथार्थं प्रव्रजेत् ।। २८ ।।**

एतेनाग्न इत्यनयर्चा दक्षिणाग्नावाज्याहुतिं जुहोति[2] । हुत्वा यथार्थं प्रव्रजेत् [3]गच्छेदित्यर्थः । तेनादावाज्याहुतिर्भवतीत्येके । अपरे पुनरन्ते एतामाहुतिमिच्छन्ति । कस्मात् । तथोपदेशात् । शास्त्रान्तरदर्शनाच्च । मन्त्रलिङ्गाच्च[4] । एवं सति[5] यथार्थं प्रव्रजेदिति किमुक्तं भवति । अनियमो भवतीत्युपदिशन्ति । आहुत्यनन्तरकालं नियमाः परिसमाप्ता भवन्ति । येषां [6]विप्रकृष्टेऽध्वनि गृहास्तेषामागतानां हुतायामाहुतौ नियमपरि-समाप्तिः । ये पुनरादाविच्छन्ति तेषां यथार्थवचनमपार्थकम् । शास्त्रा-न्तरैश्च सह विधिर्न संगच्छते । प्रव्रजेदिति तु उभयत्रापि साधयितव्यम् ।। २८ ।।

---

[1] आपवर्गं—B. [2] जुहोति—Omitted in A, B. [3] गच्छेत्—Omitted in A, C, D. [4] मन्त्रलिङ्गदर्शनाच्च—A, C. [5] एतेन—A, C, D. [6] विकृष्टे—B; पृष्टे—A, C; प्रकृष्टे—D.

एवमनाहिताग्निर्गृह्ये 'इमामग्ने शरणिं मीमृषो नः' (ऋ० सं० १. ३१. १६) इत्येतयर्चा ॥ २६ ॥

एतयर्चा अनाहिताग्निर्गृह्ये आज्याहुतिं जुहोति। इमामग्न इत्यनया। अथ कस्मादेतदृग्विधानमिहाम्नातमस्मिन् प्रकरणे। मधुपर्कविवक्षया तत्समीपे आचार्येणाम्नातः। कस्यासौ देय इति। तदर्त्विजामप्यसौ दातव्य इति ऋत्विज उपदिष्टाः। तेषां च वरणमाम्नातं यादृशैश्च ऋत्विग्भिर्भवितव्यमिति। तस्मात् प्रकरणमुपजीवताचार्येणेहाम्नातम्[1] ॥ २६ ॥

इति प्रथमे त्रयोविंशतितमा कण्डिका

ऋत्विजो वृत्वा मधुपर्कमाहरेत् ॥ १ ॥

अतस्तान् वृत्वा मधुपर्कमाहरेत्। आहरतिरत्र [2]दानकर्मा। दद्यादित्युक्तं भवति ॥ १ ॥

स्नातकायोपस्थिताय ॥ २ ॥

स्नातकाय गृहानभ्यागताय मधुपर्को देय इति ॥ २ ॥

राज्ञे च ॥ ३ ॥

गृहानभ्यागताय देयः ॥ ३ ॥

आचार्यश्वशुरपितृव्यमातुलानां च ॥ ४ ॥

एतेषां च मधुपर्को देयः। अथ पूर्वयोः पृथगुपदेशः कस्मात् क्रियते। [3]समासेनैव पाठः कर्तव्यः। यथोत्तरेषाम्। उच्यते। अतुल्यत्वात् पृथ-

---

[1] आम्नानं कृतम्—D; तेषां च वरणमाम्नातम्—A, C. [2] आदानकर्मा—A, C. [3] ननु—added in A, C, D.

गुपदेशः क्रियते । कथं पुनरतुल्यत्वमिति चेत् स्नातकाय तावत् तदहरेवाभ्यागताय देयः । कथं गम्यते । उपस्थितवचनात् । ‘यत्रैनं पूजयिष्यन्तो भवन्ति’ (३.८.२४) इति शास्त्रोपदेशाच्च मधुपर्को दातव्य इत्येतच्चोदितं भवति । राज्ञे पुनरहरहरुपस्थिताय देयः । आचार्यादीनां प्रतिसंवत्सरोपेतानां[1] देय इति । कथं पुनरेतद् गम्यते यथा एते विशेषा भवन्तीति । स्नातकाय तावत् गम्यते तस्मिन्नेवाहन्यागताय देय इति यदाचार्यादीनां पुनर्ग्रहणं करोति । स्नातकवचनेनात्र सिद्धानामविशेषाच्च राज्ञोऽहरहर्दानं भवति । आचार्यादीनां च शास्त्रान्तरदर्शनात् प्रतिसंवत्सरं भवति ।। ४ ।।

तत्राप्रतीतपदार्थत्वाल्लोके मधुपर्कस्य स्वयमेव विदधाति—

दधनि मध्वानीय ।। ५ ।।

दधनि मधु आनयति । आनयतिरत्र सेचनकर्मा । निषिञ्चतीत्येतदुक्तं भवति ।। ५ ।।

सर्पिर्वा मध्वलाभे ।। ६ ।।

सर्पिर्वा निषिञ्चति मध्वलाभे । सर्पिर्वेति सिद्धे मध्वलाभवचनमपार्थकम् । मध्वलाभवचनं क्रियते । कथमलाभे[2] वाचनिकः प्रतिनिधिः स्यादिति । इतरथा हि सामान्यात् प्रतिनिधिरिति कृत्वान्यत् किंचित् प्रतिनिधीयेत[3] । तन्निवृत्त्यर्थं वचनमारभ्यते । तत्र मधुपर्कस्य दानं वक्तव्यम् । प्रतिग्रहश्च[4] । तत्र दानं प्रथमं[5] विधीयते । क्रमप्रवृत्तत्वात् । युगपच्चाशक्यत्वादल्पत्वाच्चाधिकृतत्वाच्च दानस्य । कल्पतुल्यत्वाच्च ।। ६ ।।

---

[1] प्रतिसंवत्सरोषितानां—A, C, D. [2] एव—added in B. [3] विधीयेत—A, C, D. [4] प्रतिग्रहणं च—B. [5] प्रथमं—omitted in A, C.

तत्त्वाह—

विष्टरः पाद्यमर्घ्यमाचमनीयं मधुपर्को गौरित्येतेषां त्रिस्त्रिरेकैकं वेदयन्ते ॥ ७ ॥

तत्र विष्टर इत्यासनमुच्यते। पाद्यमिति। पादार्थमुदकं पाद्यम्। तथार्घार्थमुदकमर्घ्यम्। एवमाचमनार्थमुदकमाचमनीयम्। मधुपर्क उक्तः प्राक्। गौरिति पशुद्रव्यं किंचिन्निर्दिश्यते[1]। तेषां विष्टरादीनामेकैकस्य द्रव्यस्य त्रिस्त्रिर्निवेदनं कर्तव्यम्। तत्रैतेषामिति न वक्तव्यम्। कस्मात्। अधिकृतत्वात्। उच्यते। नियमार्थमारभ्यते। इतरथा ह्येवमादीनां निवेदनं क्रियते। तत्र दोषः स्यात्। भोजनादीनामपि त्रिनिवेदनं प्राप्नोति। तन्निवृत्त्यर्थं नियम आरभ्यते। अस्ति[2] पुनर्भोजनप्रवृत्तिः। अस्तीति ब्रूमः। तदुत्तरत्र वक्ष्यामः। 'नामांसो मधुपर्कः' (१. २४. २८) इत्येतस्मिन् प्रदेशे ॥ ७ ॥

'अहं वर्ष्म सजातानां विद्युतामिव सूर्यः।
इदं तदधितिष्ठामि यो मा कश्चाभिदासति ॥'
इत्युदगग्रे विष्टर उपविशेत् ॥ ८ ॥

अहं वर्ष्म सजातानामित्यनेन मन्त्रेणोदगग्रे विष्टर उपविशेत् ॥ ८ ॥

आक्रम्य वा ॥ ९ ॥

पद्भ्यामाक्रमणं करोति। तेनाक्रमणस्यासनस्य च विकल्पः ॥ ९ ॥

पादौ प्रक्षालापयीत[3] ॥ १० ॥

---

[1] एकवशवर्तित्वात्—B; वाच:—D. [2] उच्यते—A, C. [3] प्रक्षालयीत—A, C, D.

पादयोः प्रक्षालनं विधीयते ।। १० ।।

कथं पुनस्तत्—

दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत् ।। ११ ।।

यदा ब्राह्मणः प्रक्षालयिता भवति तदा दक्षिणमग्रे प्रयच्छति ।।११।।

सव्यं शूद्राय ।। १२ ।।

यदा शूद्रः तदा सव्यमग्रे प्रयच्छति । तत्र संशयः । किं प्रक्षालयिता यो नियम्यते आहोस्वित् क्रम[1] इति । किंचातः । यदि तावत् प्रक्षालयितुर्नियमः क्षत्रियवैश्ययोरप्रसङ्गः[2] । अथ पुनः पादयोः क्रमो नियम्यते ब्राह्मणशूद्रौ प्रतीतौ, क्षत्रियवैश्ययोरप्रवृत्तिः । अनियमश्च । किं पुनरत्र न्याय्यं स्यात् । क्रमो नियम्यते । कथमेतद् गम्यते । अग्रग्रहणात् । अत्राग्रग्रहणं न कर्तव्यम् । उपदेशादेव य उच्यते सोऽग्रे भवति । अग्रे प्रयच्छेदित्युक्ते ज्ञापितं भवति पश्चात् सव्यमिति । तस्मात् पादयोः क्रम इत्येतत् सिद्धं भवति ।। १२ ।।

प्रक्षालितपादोऽर्घ्यमञ्जलिना प्रतिगृह्य । अथाचमनीयेनाचामति[3] 'अमृतोपस्तरणमसि' (तै० आ० १०. ३२. १) **इति ।। १३ ।।**

पादौ प्रक्षाल्यार्घ्यमञ्जलिना प्रतिगृह्णाति । प्रतिगृह्याचमनीयेनाचामति[3] अमृतोपस्तरणमसीत्यनेन मन्त्रेण । तत्र प्रक्षालितपादग्रहणं न कर्तव्यम् । कस्मात् । क्रमसिद्धत्वात् । तत्तु क्रियते आनन्तयर्थिम्[4] ।

---

[1] क्रमनियमः—A, C, D. [2] प्रसङ्गः—A, C, D. [3] अन्वाचामति—A, C, D. [4] अनन्तरार्थम्—A, C, D.

कथं पादप्रक्षालनादनन्तरमेवार्घ्यप्रतिग्रहणं कुर्यात् नान्यदिति । किं पुनरन्यत् प्राप्नोति । अन्यान्यप्यर्हणीयानि द्रव्याणि प्राप्नुवन्ति गन्धमाल्यादीनि। तन्निवृत्त्यर्थमिदमारभ्यते । अथशब्दश्च तदर्थमेव । कथमर्घ्यप्रतिग्रहणादनन्तरमेवाचमनीयं स्यादिति । तस्मादुभयत्राप्यर्घ्यप्रतिग्रहस्य गन्धमाल्यादीनां प्रतिषेधः । तेन परिसमाप्ते कर्मणि दातव्यानि । आचमनीयेनाचामतीत्याचमनानन्तरमेवेदम् । तत्रान्यच्छौचार्थमाचमनं प्रवर्तते । अन्ये पुनरत्र शौचार्थमाचमनं नेच्छन्ति । कस्मात् । स्मृतिदर्शनात् । 'सोमे प्राणाहुतिषु मधुपर्के च नोच्छिष्टा भवन्तीति' (?) इह च दर्शनात् । यत्रान्यदाचमनमभिप्रेतं तत्र वचनं विदधाति । यथा 'आचान्तोदकाय' (१. २४. २५) इति । तदेतन्नोपपद्यते । कस्मात्[1] । सोमेऽनुच्छिष्टविधानात्[2] । तेनेह वचनाभावात् शौचार्थमाचमनं प्राप्नोति । यत्राचमनं[3] न प्रतिषेधति तत्र शौचार्थमाचमनं प्रसज्येतेति । ननु चैवं सति 'आचान्तोदकाय' इति वचनमपार्थकम् । नेत्युच्यते । अन्यार्थं तत् ।। १३ ।।

मधुपर्कमाह्रियमाणमीक्षते 'मित्रस्य त्वा चक्षुषा प्रतीक्षे' (तै० सं० १. १. ४. १) इति ।। १४ ।।

मधुपर्कमाह्रियमाणमीक्षते मित्रस्य त्वेत्यनेन मन्त्रेण । आह्रियमाणमानीयमानमित्यर्थः । ईक्षते पश्यतीत्यर्थः ।। १४ ।।

'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि' (तै० सं० २. ६. ८. ६) **इति तदञ्जलिना प्रतिगृह्य**

---

[1] Omitted in B. [2] सोमेनोछिष्टाभावो वचनेनोपदिश्यते (-लभ्यते—D) न सोमेनोच्छिष्टा भवन्तीति—A, C. D. In B one folio is missing. Thus the *bhāṣya* from तेनेह up to विशेष उपलभ्यते in the comm. on the 15th *sūtra* is lost. [3] स्मार्तमाचमनं—A, C.

'मधु वाता ऋतायते' (ऋ० सं० १. ९०. ६) इति तृचेनावेक्ष्यानामिकया चाङ्गुष्ठेन च त्रिः प्रदक्षिणमालोड्य 'वसवस्त्वा गायत्रेण छन्दसा भक्षयन्तु' इति पुरस्तान्निमार्ष्टि ।। १५ ।।

देवस्य त्वेत्यनेन मन्त्रेणाञ्जलिना प्रतिगृह्णाति । तं मधुपर्कमाहृतं सन्तं[1] प्रतिगृह्य मधुवाता इत्यनेन तृचेनावेक्षते । अवलोकयतीत्यर्थः । तत्र 'सव्ये पाणौ कृत्वा' इति केचित् पठन्ति । तेषां सव्य एव पाणौ स्थापयित्वोत्तरं कर्म भवति । ये पुनर्न पठन्ति तेषां भूमौ स्थापनं सव्ये पाणौ वेत्येवमनियमः[2] । अवेक्ष्यानामिकया चाङ्गुष्ठेन च त्रिः प्रदक्षिणमालोडयति । तत्र अनामिकायां विवदन्ते । केचिन्मध्यमां मन्यन्ते केचिदुपकनिष्ठिकाम् । ननु चोभयोरपि नामनी विद्येते । तत्र[3] ये मध्यमामनामिकां मन्यन्ते ते ब्रुवते[4] देशेनास्याः समाख्यानमिति सा अनामिकेति । ये ब्रुवते उपकनिष्ठिकेति कनिष्ठिकाया अस्याः समाख्यानमिति कृत्वा । तस्मात् तस्या अनामिकेति । आगमात्तु विशेष[5] उपलभ्यते । उभयथोपपत्तेः । आलोड्य वसवस्त्वेत्यनेन मन्त्रेण पुरस्तान्निमार्ष्टि । लेपमपनयतीत्यर्थः । एवमुत्तरैर्मन्त्रैः ।। १५ ।।

'रुद्रास्त्वा त्रैष्टुभेन छन्दसा भक्षयन्तु' इति दक्षिणतः । 'आदित्यास्त्वा जागतेन छन्दसा भक्षयन्तु' इति पश्चात् । 'विश्वे त्वा देवा आनुष्टुभेन छन्दसा भक्षयन्तु' इत्युत्तरतः । 'भूतेभ्यस्त्वा' इति मध्यात् त्रिरुद्गृह्य ।। १६ ।।

[6]प्रतिदिशं लेपमपनयति । भूतेभ्यस्त्वेति मध्यात् त्रिरुद्गृह्णाति । ऊर्ध्वमुत्क्षिपत्यनेन मन्त्रेण ।। १६ ।।

---

[1] सम्यक्—B. [2] एवमेव नियमः—A, C. [3] तेन—A, C. [4] कथं—A, C. [5] Here begins the next folio in D, after the missing folio. [6] प्रादेशलेपानपनयति—A, C, D.

'विराजो दोहोऽसि' इति प्रथमं प्राश्नीयात् । 'विराजो दोहमशीय' इति द्वितीयम् । 'मयि दोहः पद्यायै विराजः' इति तृतीयम् ॥ १७ ॥

प्रथमग्रहणमपार्थकम् । एवमपार्थकं दृष्ट्वा अन्यथा वर्णयन्ति । त्रिरुद्गृह्य प्रथममुद्ग्राहं प्राश्नीयात्[1] । अथ द्वितीयमुद्ग्रहणं विराजो दोहमशीयेति प्राश्नीयात् । मयि दोह इति तृतीयमुद्ग्राहं प्राश्नीयात् इत्येवमेके । एतस्मिन्नपि पक्षे तृतीयग्रहणमपार्थकम् । तस्मात् पूर्व एव पक्षः । ननु च प्रथमग्रहणमपार्थकम् । प्रवृत्तिराचार्यस्य । अन्यत्रापि[2] करोति । 'आयुषे त्वा' (आ० श्रौ० २. ४. ७) इत्यत्र । तस्मात् पूर्व एव पक्षः मन्त्राश्च[3] प्राशनं चोक्तम्[4] ॥ १७ ॥

न सर्वम् ॥ १८ ॥

न सर्वं मधुपर्कं प्राश्नीयात् ॥ १८ ॥

न तृप्तिं गच्छेत् ॥ १९ ॥

न च तृप्तिं गच्छेत् ॥ १९ ॥

ब्राह्मणायोदङ्ङुच्छिष्टं प्रयच्छेत् ॥ २० ॥

दद्यादित्यर्थः ॥ २० ॥

अलाभेऽप्सु ॥ २१ ॥

ब्राह्मणस्यालाभे अप्सु निषिञ्चेत् ॥ २१ ॥

---

[1] Portion from here up to एवमेके is omitted in A, C, D by haplography. [2] अथापि—A, C, D. [3] मन्त्रश्च—A, C, D [4] उक्तः—B.

सर्वं वा ॥ २२ ॥

सर्वं वा प्राश्नीयात् ॥ २२ ॥

अथाचमनीयेनान्वाचामति 'अमृतापिधानमसि' (तै० आ० १०. ३५. १) **इति ॥ २३ ॥**

अथाचमनीयेनान्वाचामति अमृतापिधानमसीत्यनेन मन्त्रेण ॥ २३ ॥

'सत्यं यशः श्रीर्मयि श्रीः श्रयताम्' इति द्वितीयम् ॥ २४ ॥

सत्यं यश इत्यनेन मन्त्रेण द्वितीयमाचामति ॥ २४ ॥

आचान्तोदकाय गां वेदयन्ते ॥ २५ ॥

तत्राचान्तोदकवचनमपार्थकम् । कस्मात् । आचमनस्य प्राप्तत्वात् । उच्यते । नेदं शौचार्थमाचमनं चोद्यते । किं[1] तर्हि । [2]कर्माङ्गमाचमनं चोद्यते । यथा दर्शपूर्णमासयोरग्निहोत्रे च । अथोदकवचनमपार्थकम् । कस्मात् । आचमनं ह्युदकेनैव भवति । उदकवचनं क्रियते अत्राचमनीयनिवृत्त्यर्थम् । गां वेदयन्ते आख्यापयन्ते ॥ २५ ॥

'हतो मे पाप्मा पाप्मा मे हतः' इति जपित्वा 'ओं कुरुत' इति कारयिष्यन् ॥ २६ ॥

हतो मे पाप्मा इति जपित्वा कारयिष्यन् यदि भवति ओं कुरुतेति प्रैषं ब्रूते । पश्चादालब्धव्या सा गौः ॥ २६ ॥

'माता रुद्राणां दुहिता वसूनाम्' (ऋ० सं० ८. १०१. १५) **इति जपित्वा 'ओम् उत्सृजत' इत्युत्स्रक्ष्यन् ॥ २७ ॥**

---

[1] कथं—A, C, D. [2] कर्मार्थम्—A.

माता रुद्राणामित्येतामृचं जपति यदि तां गामुत्स्रक्ष्यन् भवति । ओम् उत्सृजतेत्येवं प्रैषं ब्रूते[1] ।। २७ ।।

*इहागत्य स्मृतम् ।[2] मयि दोहः पद्यायै विराज इत्यत्र संशयः । किं चतुर्थी उत षष्ठीति । कुतः संशयः । तुल्यत्वात् संधेः । तत्र चतुर्थीमेके मन्यन्ते । कस्मात् । [3]पूर्वं पद्यायै इति चतुर्थीदर्शनात् । अन्ये पुनः षष्ठीं मन्यन्ते । कस्मात् । तादर्थ्यात्[4] । पूर्वयोश्च दर्शनात् । कः पुनरत्र निर्णयः । षष्ठीति । ये चतुर्थीमुपदिशन्ति ते षष्ठीमेव विपरिणमयन्ति । तत्रोभयथापि शक्यते[5] कल्पयितुम् । आगमस्तु षष्ठीति ।।

नामांसो मधुपर्को भवति भवति ।। २८ ।।

अमांसो मधुपर्को न भवति । तत्रोच्यते किं मधुपर्के मांसं देयमिति । नेत्युच्यते । इह मधुपर्के भोजनममांसं न भवतीत्यर्थः । तस्मादत्रानेनाभ्युपायेन भोजनमुपदिश्यते नामांसो मधुपर्को भवतीति ।। २८ ।।

इति प्रथमे चतुर्विंशतितमा कण्डिका

इति देवस्वामिकृते आश्वलायनगृह्यभाष्ये
प्रथमोऽध्यायः[6]

---

* As is clear from these words the following portion of the *bhāṣya*, up to षष्ठीति, is an after-thought of the author. It actually belongs to the *sūtra* I. 24. 17 above. All the MSS. have this portion in this place.

[1] ब्रूयात्—A, C, D. [2] विस्मृतो ग्रन्थः लिख्यते—A, C. [3] पूर्ववदेव चतुर्थीदर्शनात् पद्यायै इति—C. [4] अर्थात्—A, C. [5] विरुध्यते—A, C. [6] समाप्तः—added in C. B reads: इत्याश्वलायनगृह्यव्याख्यायां प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः[1]

श्रावण्यां पौर्णमास्यां श्रवणाकर्म ।। १ ।।

श्रावण्याम् । श्रवणेन युक्ता[2] पौर्णमासी श्रावणी । तस्यां श्रावण्यां पौर्णमास्यां श्रवणाकर्म भवति । तत्र संशयः । यदा पौर्णमासी श्रवणेन न[3] युज्यते तदा कर्मेदं कर्तव्यं न कर्तव्यमिति । उच्यते[4] । पौर्णमास्यां कर्तव्यम् । कस्मात् । नक्षत्रस्योपसर्जनभूतत्वात् । तत्र नक्षत्रविप्रयोगेऽपि पौर्णमास्यां कर्मेदं कर्तव्यम् ।। १ ।।

अक्षतसक्तूनां नवं कलशं पूरयित्वा दर्वीं च बलिहरणीं नवे शिक्ये निदधाति ।। २ ।।

अत्र अक्षतानां सक्तवः कर्तव्याः । अखण्डितानां यवानां सक्तवः तेषां नवं कलशं पूरयित्वा सक्तूनां दर्वीं च बलिहरणीं नवे शिक्ये निदधाति[5] । स्थापयतीत्यर्थः ।

तत्र केचिदिदमपि श्रवणाकर्मेति मन्यन्ते । किं कारणम् । तन्मध्यपतितत्वात्[6] । अन्ये पुनर्ब्रुवते कर्मान्तरमिदमिति । सर्पबलिः कर्मान्तरम् । [7]किमर्थं चेदमधिकारे चोदितमिति चेत् तुल्यकालत्वाच्चोदना । तस्मात् कर्मान्तरमिति ।। २ ।।

अक्षतधानाः कृत्वा सर्पिषार्धा[8] अनक्ति ।। ३ ।।

---

[1] आश्वलानगृह्यसूत्रभाष्ये द्वितीयः—अथ द्वितीयोऽध्यायः प्रारभ्यते—A. [2] श्रवणयुक्ता—A, C. [3] न—omitted in A, C, D. [4] उच्यते—omitted in A, C, D. [5] Gap of 3–4 words in A, C. [6] तस्य पतितत्वात्—A, C. [7] तदर्थं—A, C, D. [8] सर्पिषार्धम्—B.

अक्षतानां यवानां धानाः करोति। कृत्वा अर्धाः सर्पिषानक्ति। सर्पिषेत्यसंस्कृतेनेत्यर्थः। इदमप्यह्न्येव भवति ॥ ३ ॥

अस्तमिते स्थालीपाकं श्रपयित्वैककपालं च पुरोडाशम् 'अग्ने नय सुपथा राये अस्मान्' (ऋ० सं० १. १७६. १-४) इति चतसृभिः प्रत्यृचं हुत्वा पाणिनैककपालमच्युताय भौमाय स्वाहेति ॥ ४ ॥

अस्तमित आदित्ये स्थालीपाकं श्रपयित्वा अग्ने नयेति चतसृभिः प्रत्यृचं जुहोति। एककपालं च पुरोडाशं श्रपयित्वा पाणिना जुहोति अच्युतायेत्यनेन मन्त्रेण। अथ श्रपयित्वेति वचनमपार्थकम्, कस्मात्, प्राप्तत्वाच्छ्रपणस्य। तत्र प्रयोजनमेके ब्रुवते। इह श्रपयित्वेति यद् ब्रूते तज्ज्ञापयति, अन्यत्र सिद्धानां द्रव्याणामुपादानं भवतीति। क्व पुनस्तत्। 'अस्तमिते पायसस्य जुहुयुः' (२. ३. ३) इत्येवमादि। [1]ओदनकृसरपायसानां चैवमेके। ननु चैवं सति दोषः। को दोषः। 'प्राजापत्यस्य स्थालीपाकस्य' (१. १३. ८) इत्यत्रापि श्रपणं न प्राप्नोति। स्थालीपाकवचनात् भविष्यतीति प्रतिजानते[2]। अन्ये पुनः सर्वत्र श्रपणमिच्छन्ति। यद्येवमिह श्रपयित्वेति वचनमपार्थकम्। कस्मात्। [3]तन्त्रप्राप्तेः। उच्यते। न स्थालीपाकार्थमत्र श्रपणम्। किं तर्हि। पुरोडाशार्थम्। स्थालीपाकश्रपणस्य विहितत्वात् पुरोडाशे न प्राप्नोति। तदर्थं वचनमिति[4]। नेत्युच्यते। तन्मध्यपातित्वात् पुरोडाशस्यापि श्रपणं भवति[5], तस्मान्नैव कर्तव्यम्। उच्यते[6]। सिद्धे विधिरारभ्यमाणो नियमार्थः। कः पुनर्नियमः कथं पुरोडाशस्यैव धर्मवच्छ्रपणं स्यात्, नान्यस्येति। तेन किं सिद्धं भवति।

---

[1] ओदनं—A, C, D. [2] जानीते—A, C, D. [3] तत्र—A, C, D. [4] इति—omitted in A, C, D. [5] भविष्यति—B, D. [6] उच्यते—omitted in A, C, D.

धानासक्तुलाजानां धर्मवच्छ्रपणं न भवतीत्येतत् साधितं भवति । उच्यते । यत्रान्यद् द्रव्यं नास्ति तत्रापि श्रपणं विधीयते । तद्यथा—‘मध्येऽगारस्य स्थालीपाकं श्रपयित्वा’ (२. ६. ८) इति । तत्रान्यत्[1] प्रयोजनमुच्यते । पाणिनैककपालमित्यत्यत्र संशयः। एककपालस्य उपस्तरणाभिघारणे भवतो न भवत इति । कुतः पुनः संशयः । दक्षिणपाणिकारितत्वात् द्व्यवदाननिवृत्तेश्च[2] । उच्यते । नेदं तुल्यम् । द्व्यवदानमत्रार्थलुप्तम् । कस्मात् । सर्वहुतत्वात् । कथं पुनरस्य सर्वहुतत्वमिति ज्ञायते । [3]द्वितीयोपदेशात् । एककपालमित्युच्यते । सर्वहुतत्वे नेदं भवति कारणम् । कस्मात् । द्वितीयोपदेशेऽपि शेषभावो दृश्यते । यथा ‘दधिसक्तून् जुहोति’ (३. ५. ५) इति द्वितीययोपदिश्य ‘दधिसक्तून् [4]प्राश्य’ (३. ५. ८) इति शेषभावं दर्शयति । तेन सर्वहुतत्वे यत् कारणमुक्तं तदसमर्थमित्यत उच्यते । अन्यदस्ति सर्वहुतत्वे कारणम् । ‘एनमाशयेनाभिजुहोति’ (२. १. ७) इति । तेन[5] सर्वहुतत्वम् । अन्यथा ह्येनमाशयेनाभिजुहोतीति न ब्रवीति । तेन द्व्यवदानमर्थलुप्तम् । उपस्तरणाभिघारणयोस्तु प्रवृत्तिरित्युच्यते । ननु तत्रापि दक्षिणाङ्गकारितत्वात् तयोर्निवृत्तिः प्राप्नोति । नेत्युच्यते । नासौ परिभाषा प्रापिका । द्वयोः प्राप्तयोर्नियामिकेति । तेन दक्षिणस्य व्यापृतत्वात् सव्येनैवोपस्तरणाभिघारणे कर्तव्ये इत्ययं पक्षः ।। ४ ।।

अवप्लुतः स्यात् ।। ५ ।।

आज्येनावप्लुतो भवति । निमग्न इत्यर्थः ।। ५ ।।

आविःपृष्ठो वा ।। ६ ।।

प्रकाशपृष्ठो वायं भवति । तत्र विकल्पः अवप्लुतेन वा भवितव्यं प्रकाशपृष्ठेन वेति ।। ६ ।।

---

[1] अन्यत्—omitted in A, C. [2] निमित्तैश्च—B. [3] द्वितीयोपदेशविशेषाभावो—A, C, D. [4] प्रति—A, C, D. [5] एतेन—A, C.

'मा नो अग्नेऽवसृजो अघाय' (ऋ० सं० १. १८९. ५) **इत्येनमाशयेनाभिजुहोति ।। ७ ।।**

एनं पुरोडाशमाशयेन स्वेनाज्येनाभिजुहोति । एनमिति ब्रुवन् दर्शयति—अखण्डितस्यास्य होमो भवतीति ।। ७ ।।

'शं नो भवन्तु वाजिनो हवेषु' (ऋ० सं० ७. ३८. ७) **इत्यक्ता धाना अञ्जलिना ।। ८ ।।**

'शं नो भवन्तु' इत्यनेन मन्त्रेण अक्ता धाना जुहोत्यञ्जलिना । अत्राञ्जलिनेत्युक्तेरुभयोर्व्यापृतत्वादुपस्तरणाभिघारणमन्यः करोति । अवदानधर्मत्वं च । अक्तग्रहणं क्रियतेऽनक्तानां मा भूदिति ।। ८ ।।

अमात्येभ्य इतरा दद्यात् ।। ९ ।।

इतरा अनक्ता अमात्येभ्यो ददाति । तत्र ये [1]एककर्मत्वमिच्छन्ति ते एतस्मिन्[2] काले स्विष्टकृतं न कुर्वन्ति । कारणं च ब्रुवते नैनमन्तरा व्यवेयुरिति[3] । ये पुनः[4] पृथक् कर्मेच्छन्ति ते एतस्मिन् काले स्विष्टकृतं कुर्वन्ति ।। ९ ।।

कलशात् सक्तूनां दर्वीं पूरयित्वा प्रागुपनिष्क्रम्य शुचौ देशेऽपोऽवनिनीय सर्पदेवजनेभ्यः स्वाहेति ।। १० ।।

तस्मात् नवात् कलशात् सक्तूनां दर्वीं पूरयित्वा प्राङुपनिष्क्रामति । निष्क्रम्य शुचौ देशे अपोऽवनिनयति[5] । अपोऽवनिनीय[6] सर्पदेवजनेभ्यः

[1] एककर्म—A, C. [2] उपरिष्टात् कुर्वन्ति—B, D. [3] उपेयुरिति—A, C. [4] पुनः—omitted in A, C. [5] अपो निनयति—B. [6] अपो निनीय—B.

स्वाहेति जुहोति । शुचौ देश इति वचनमपार्थकम् । कस्मात् । प्राप्तत्वात् शुचौ देशे होमस्य[1] । तत्र केचिदुपदिशन्ति स्वभावतः शुचौ देशे कथमिदं भवतीति । अरण्ये कर्तव्यमिति । तस्मात् शुचौ देशे इत्युच्यते इति । अन्ये पुनर्गृहेष्वेवेच्छन्ति । तेषां शुचौ देशे इति किं प्रयोजनम् । हुत्वेति वचनादग्निः प्रसज्येत । तन्निवृत्त्यर्थं वचनमारभ्यते ॥ १० ॥

हुत्वा नमस्करोति । 'ये सर्पाः पार्थिवा य आन्तरिक्ष्या ये दिव्या ये दिश्यास्तेभ्य इमं बलिमाहार्षं तेभ्य इदं बलिमुपाकरोमि' इति ॥ ११ ॥

ये सर्पा इत्यनेन मन्त्रेण नमति प्रणामं करोतीत्येतदुक्तं भवति ॥ ११ ॥

प्रदक्षिणं परीत्य पश्चाद् बलेरुपविश्य 'सर्पोऽसि सर्पतां सर्पाणामधिपतिरस्यन्नेन मनुष्यांस्त्रायसेऽपूपेन सर्पान् यज्ञेन देवांस्त्वयि मा सन्तं त्वयि सन्तः सर्पा मा हिंसिषुः' ॥ १२ ॥

तं बलिं प्रदक्षिणं कृत्वा पश्चाद् बलेरुपविशति । उपविश्य सर्पोऽसि सर्पतामित्येतं मन्त्रं जपति । पश्चाद् बलेरुपविश्येति बलिग्रहणमपार्थकम् । कस्मात् । अधिकृतत्वात् । बलिग्रहणं क्रियते निःसंशयार्थम् । पश्चाच्छब्देनोच्यमाने संशयः स्यात् किं काल उच्यते उत दिगुच्यते इति । तत्र काले उच्यमाने दोषः । पूर्वाहुतिरवस्थितस्य प्राप्नोति । तेन कथं दिग्वाची स्यादित्यतो बलिग्रहणं क्रियते ॥ १२ ॥

ध्रुवामुं[2] ते परिददामीति । ध्रुवामुं ते ध्रुवामुं त इत्यमात्याननुपूर्वम् । ध्रुव मां ते परिददामीत्यात्मानमन्ततः ॥ १३ ॥

---

[1] होमश्च—A, C. [2] MSS. read ध्रुवान्ते.

ध्रुव देवदत्तं परिददामि ध्रुव यज्ञदत्तमित्येवममात्याननुपूर्वं परिददाति निर्दिशतीत्युच्यते । ध्रुव मां ते परिददामीत्यात्मानमन्ततः परिददाति । तत्रार्थात् स्वयंकर्तृकमेतत् कर्म भवति । यदा पुनरन्यः करोति तदा प्रतिनिधिभूतत्वात् तस्य कर्तुर्गृहिण एवान्ततः परिदानं करोति ॥१३॥

नैनमन्तरा व्यवेयुरा परिदानात् ॥ १४ ॥

अन्तरा न व्यवेयुर्न गच्छेयुरित्यर्थः । अग्निना सह व्यवायः प्रतिषिध्यते । एवमेके । अन्ये पुनर्बलिना सह व्यवायप्रतिषेधमिच्छन्ति ॥१४॥

सर्पदेवजनेभ्यः स्वाहेति सायंप्रातर्बलिं हरेदा प्रत्यवरोहणात् ॥ १५ ॥

सायंप्रातर्बलिहरणं कर्तव्यमा प्रत्यवरोहणात् । अथ मन्त्रोपदेशोऽपार्थकः । कथम् । बलिहरणे सिद्धत्वात् । बलिहरणचोदनायां मन्त्रः प्राप्नोति । उच्यते । मन्त्रोपदेशो नियमार्थः । कथं मन्त्र एव स्यात् सायंप्रातर्नान्यो [1]विधिरित्युच्यते । यद्येवं दर्व्या अपि निवृत्तिः प्राप्नोति । न भविष्यति । किं कारणम् । विशेषोपदेशात्[2] दर्वीं च बलिहरणीमिति (२. १. २) । तत्र वलिहरणीमिति न वक्तव्यम्। तत्त्वेतदर्थमेव क्रियते । तस्मादनिवृत्तिः । एवं तर्हि सक्तूनां निवृत्तिः प्राप्नोति । कस्मात्[3] । अयत्नकरणात्[4] । उच्यते । बलिहरणं हि[5] सक्तुभिरेव क्रियते[6] । कस्मात् । प्राधान्यात् । तस्मादनिवृत्तिः ॥ १५ ॥

प्रसंख्याय हैके तावतो बलींस्तदहरेवोपहरन्ति ॥ १६ ॥

एके आचार्याः प्रसंख्याय परिगणयित्वेत्यर्थः । आ प्रत्यवरोहणाद्यावत्य आहुतयो भवन्ति सायं प्रातश्च तावतीः[7] परिगणयित्वा तदहरे-

---

[1] बलिविधिः—B. [2] दर्व्याम्—added in B. [3] अत्र—A, C, D. [4] करणानि—A, C. [5] तु—D. [6] दीयते—D. [7] Omitted in A, C.

वोपहरन्ति । तत्र तु कालपरिगणनं ज्ञेयम् । कालस्तु कदाचिद् वर्धते कदाचिद् ह्रसते । अधिकमास उपजायते । अहानि च ह्रसन्ति । तत् परिगणयित्वा आहुतयो यावत्यो भवन्ति तावत्यस्तस्मिन्नेवाहनि होतव्या इत्ययमर्थः ।। १६ ।।

इति द्वितीये प्रथमा कण्डिका

आश्वयुज्यामाश्वयुजीकर्म ।। १ ।।

अश्वयुजा युक्ता आश्वयुजी । तस्यामाश्वयुजीकर्म भवति ।। १ ।।

निवेशनमलंकृत्य स्नाताः शुचिवाससः पशुपतये स्थालीपाकं निरुप्य जुहुयुः । 'पशुपतये शिवाय शंकराय पृषातकाय स्वाहा' इति ।। २ ।।

निवेशनं गृहमित्युच्यते । अलंकृत्य[1] निवेशनमलंकरणैरुपलेपनादिभिः । स्नाताः शुचिवाससः सर्वे शुद्धवासस[2] इत्यर्थः । पशुपतये निरुप्य स्थालीपाकं जुहुयुः । पशुपतये शिवायेत्यनेन मन्त्रेण । निरुप्यग्रहणमपार्थकम् । सिद्धत्वात् । निरुप्यग्रहणं विकारोपदेशार्थम् । पशुपतय एव कथं निर्वापः स्यादिति । इतरथा हि न प्राप्नोति । आदिष्टमन्त्रत्वात् । एवं ब्रुवन् ज्ञापयति—आदिष्टमन्त्रेषु पाकयज्ञेषु मन्त्रनिर्वापणं नहि भवतीति । जुहुयुरिति बहुवचनं किमर्थम् । यदि सर्वे जुहुयुः सर्वेषां मन्त्रो भवति । नेत्युच्यते । गृही तं मन्त्रं ब्रूते । अन्ये उपासते ।। २ ।।

पृषातकमञ्जलिना जुहुयात् ।। ३ ।।

---

[1] अलंकारमुपलेपनादिभिः—B. [2] शुक्लवाससः—A, C, D.

पृषातकमिति किमुक्तं भवति । पयस्याज्यमोप्यते तत् पृषातकमित्युच्यते । तत् पृषातकं भवति लोके च प्रसिद्धम् । तदञ्जलिना जुहोति । धानाभिर्होमो व्याख्यातः ।। ३ ।।

'ऊनं मे पूर्यतां पूर्णं मे मोपसदत् पृषातकाय स्वाहा' इति ।। ४ ।।

ऊनं मे पूर्यतामित्यनेन मन्त्रेण ।। ४ ।।

'सजूर्ऋतुभिः सजूर्विधाभिः सजूरिन्द्राग्निभ्यां स्वाहा' । 'सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वेभ्यो देवेभ्यः स्वाहा' । 'सजर्ऋतुभिः सजूर्विधाभिः सजूर्द्यावापृथिवीभ्यां स्वाहा' । इत्याहिताग्नेराग्रयणस्थालीपाकः ।। ५ ।।

सजूर्ऋतुभिरित्येवमादयो मन्त्राः । एतैराहिताग्नेराग्रयणस्थालीपाको भवति । आहिताग्निवचनं किमर्थम् । अविशेषादाहिताग्नेरनाहिताग्नेश्च भवति यथा श्रवणाकर्मादि । उच्यते । यद्याहिताग्निर्न विधीयेत आहिताग्नेरयमाग्रयणस्थालीपाको न स्यात् । कस्मात् । आहिताग्नेराग्रयणस्य त्रेतायां विहितत्वात् । अथ क्वायं स्थालीपाको भवत्याहिताग्नेः । त्रेतायामिति वर्णयन्ति । तन्न प्राप्नोति । कस्मात् । एकाग्निप्रकरणे विहितत्वात् । उच्यते । प्रकरणमपि बाधित्वा[1] त्रेतायामेव[2] भवति । किं कारणम् । अनाहिताग्नेरपि शालाग्नाविति नियमोपदेशात् शास्त्रान्तरदर्शनाच्च । 'गार्हपत्ये स्थालीपाकं श्रपयित्वाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्य आवहनीये जुहुयात्' (आप. श्रौ. ६. ३०. १६) इति । तस्मात् त्रेतायामेव भवति । यदि त्रेतायामभिप्रेतस्तत्रैव वक्तव्यम् । इह विधानस्यैतत् प्रयोजनं पाकयज्ञधर्मप्राप्त्यर्थम् ।। ५ ।।

---

[1] बाधयित्वा—A, C, D. [2] अपि for एव—A.

अनाहिताग्नेरपि शालाग्नौ ।। ६ ।।

अनाहिताग्नेरपि शालाग्नावाग्रयणस्थालीपाको भवति । अथ शालाग्निग्रहणमपार्थकम् । अनाहिताग्नेः कर्मणां प्राप्तत्वात् शालाग्नावेव शालाग्निरिति गृह्य एवोच्यते । एवं सिद्धे शालाग्निग्रहणं कुर्वन्नेतज्ज्ञापयति, पूर्वविधानं शालाग्नौ न भवतीति त्रेतायां सिद्धं भवति । तेन सर्व एव पक्षा अग्निहोत्रहोमादयः आग्रयणस्थालीपाकान्ता आहिताग्नेर्विकल्प्यन्ते, अनाहिताग्नेराग्रयणस्थालीपाको गृह्य एव सिद्धः ।। ६ ।।

इति द्वितीये द्वितीया कण्डिका

मार्गशीर्ष्यां प्रत्यवरोहणं चतुर्दश्याम् ।। १ ।।

मृगशिरसा युक्ता पौर्णमासी मार्गशीर्षी । सा यस्मिन् मासि भवति स मार्गशीर्षो मासः । तस्मिन् भवा मार्गशीर्षी । का । चतुर्दशी । तस्यां चतुर्दश्यां प्रत्यवरोहणं कर्तव्यम् । यद्येवं द्विः कर्म प्राप्नोति चतुर्दशीद्वित्वात् । उच्यते । एकस्यामेव । सकृत् कृते कृतः शास्त्रार्थ इति । किंच यदा पौर्णमास्यां तदा सकृत् प्रयोगः, चतुर्दश्यां द्विर्भविष्यतीति तन्नोपपद्यते । तेन चतुर्दश्यामपि सकृदेव प्रयोगः । एवमप्यनियमः प्राप्नोति । कृष्णचतुर्दश्यां शुक्लचतुर्दश्यां वेति । यस्मात् पौर्णमास्या सह विकल्पः तस्माच्छुक्लचतुर्दश्यामेव भवति नेतरस्यामिति ।। १ ।।

पौर्णमास्यां वा ।। २ ।।

पौर्णमास्यां वा मार्गशीर्ष्यामेव तत् कर्म भवति ।। २ ।।

निवेशनं पुनर्नवीकृत्य लेपनस्तरणोपस्तरणैरस्तमिते पायसस्य जुहुयुः ।

'अप श्वेत पदा जहि पूर्वेण चापरेण च ।
सप्त च वारुणीरिमाः सर्वाश्च राजबान्धवीः' स्वाहा ।।
'न वै श्वेतश्चाभ्यागारेऽहिर्जघान किंचन । श्वेताय वैदार्वाय नमः' स्वाहेति ।। ३ ।।

निवेशनं गृहमित्युच्यते । तन्नवीकृत्य नवमिव करोति। केन । लेपनेन । तत्र लेपनं कुड्यानाम् । स्तरणं छदिष्कानाम् । उपस्तरणं भमेः । एवमेतैः प्रकारैः वर्षासु विषमीकृतान् गृहान् विशीर्णांश्च समीकुर्वन्ति । गृहान् भूमीश्च पूरयन्ति । विषमीकृतान् कुड्यांल्लेपयन्ति । शीर्णानां छदिष्कानां छिद्रानास्तरन्ति । एवं नवीकुर्वन्ति । अस्तमिते पायसस्य जुहुयुः । अस्तमित अदित्ये पायसस्य जुहुयुः । अपश्वेतेत्येताभ्यां मन्त्राभ्याम् । जुहुयुरिति बहुवचनम् । एको जुहोति गृही । तमन्ये गृह्याः समन्वारभन्ते । तेन पूर्ववदेव प्रयोजनम् ।। ३ ।।

नात्र सौविष्टकृत् ।। ४ ।।

नात्र स्विष्टकृदित्यर्थः । न स्विष्टकृदितीत्येव वक्तव्यं न स्विष्टकृतमिति वाप्रयोगेन निर्देशो द्रष्टव्यः । अयं त्वर्थः । न स्विष्टकृदित्यत्र पुनरत्रेति ग्रहणमपार्थकम् । तत्रात्रग्रहणमेके वर्णयन्ति। एतस्मिन् प्रदेशे स्विष्टकृन्न भवति । न कर्मणि प्रतिषिध्यत इति तेनान्ते स्विष्टकृद् भवतीति । यदिह कर्मणि स्विष्टकृत् प्रतिषिध्येतात्रग्रहणं न कुर्यात् । एवमेके वर्णयन्ति । अत्र पुनरन्ये कर्मान्ते स्विष्टकृतं सर्वत्रेच्छन्ति । तेनान्ते स्विष्टकृतः प्राप्तस्य नैव प्रधानाहुतिभ्योऽनन्तरं स्विष्टकृद् भवतीति । तेन कर्मणि स्विष्टकृत्प्रतिषेधः । यथा पुनरन्ते स्विष्टकृद् भवतीति तथा ज्ञापकं उत्तरत्र वक्ष्यामः । 'सौविष्टकृतं हुत्वा' (३. ५. ८) इत्यस्मिन् प्रदेशे । एवं सत्यत्रग्रहणमपार्थकम् । अत्रग्रहणं नियमविशेषार्थम् । अत्र यत्स्विष्टकृदिति । इतरथापि प्रधानाहुतिभ्योऽनन्तरं स्विष्टकृत् प्रतिषिद्धमिति

कृत्वान्यत्रापि प्रधानाहुतिभ्योऽनन्तरं स्विष्टकृत् स्यात् । ननु च ज्ञापकान्न भविष्यतीति । एवं तर्ह्युभयथा ज्ञापकं संपद्यते । अन्यत्र विकल्पः स्यात् । प्रधानाहुतिभ्योऽनन्तरं कर्मणो वान्त इति मा भूदस्य ज्ञापकत्वमित्यत्र-ग्रहणं क्रियते ।। ४ ।।

'अभयं नः प्राजापत्येभ्यो भूयात्' इत्यग्निमीक्षमाणो जपति ।। ५ ।।

अभयं नः प्राजापत्येभ्यो भूयादित्येतं मन्त्रमग्निमीक्षमाणो जपति ।। ५ ।।

'शिवो नः सुमना भव' (तै० सं० ४. ५. १. ४) **इति ।। हेमन्तं मनसा ध्यायेत् ।। ६ ।।**

शिवो न इत्येतं मन्त्रमुक्त्वा हेमन्तं मनसा ध्यायेदिति । तत्र मनसो ग्रहणं शक्यमकर्तुम् । कस्मात्। ध्यानस्य मनोवृत्तित्वात् । तेन ध्यानं मनसैव भविष्यति । यन्मनोग्रहणं क्रियते कथं गौणं ध्यानं स्यात् । न मुख्यमिति । किं पुनर्मुख्यं किं पुनर्गौणम् । अर्थध्यानं मुख्यं शब्दध्यानं गौणम् । तेन शब्दध्यानं कथं स्यान्न ऋतोरिति । उच्यते । नैव ऋतोर्ध्यानं भविष्यति । कस्मात् । अमूर्तत्वात् । उच्यते । गुणानां ध्यानं स्यात् । तेन शब्दध्यानं स्यादित्यतो यत्नः क्रियते । आमन्त्रितया विभक्त्या हेमन्तेति ।। ६ ।।

पश्चादग्नेः स्वस्तरः स्वास्तीर्णस्तस्मिन्नुपविश्य 'स्योना पृथिवि भव' (ऋ० सं० १. २२. १५) **इति जपित्वा संविशेत् सामात्यः प्राक्शिरा उदङ्मुखः ।। ७ ।।**

पश्चिमस्यां[1] दिशि स्वस्तरः स्वस्तीर्णः[2] । स्वास्तीर्णः शोभन आस्तीर्ण इत्युक्तं भवति । ये पुनः स्वस्तीर्ण इति पठन्ति तेषां स्वस्तर

---

[1] पश्चिमायां—A, C, D. [2] Omitted in A, C, D.

इत्युक्तं भवति । आत्मार्थः स्वस्तरो भवतीति । तस्मिन् स्वस्तरे उपविश्य स्योना पृथिवीत्येतं मन्त्रं जपति । जपित्वा संविशति सहामात्यैः । अत्र अमात्या अपत्यादयः । तैः सह शयीत । कथम् । प्राक्शिरा उदङ्मुखः । कः शयीत । गृही ।। ७ ।।

यथावकाशमितरे ।। ८ ।।

अमात्या यथावकाशं शेरते ।। ८ ।।

ज्यायान् ज्यायान् वानन्तरः ।। ९ ।।

अथवा यो यो ज्यायान् यो यो ज्येष्ठः स वा गृहिणोऽनन्तरो भवति । प्राक्शिरा उदङ्मुखः । एवं सर्वे यथाज्येष्टम् ।। ९ ।।

मन्त्रविदो मन्त्रान् जपेयुः ।। १० ।।

ये मन्त्रविदः ते मन्त्रान् जपन्ति । के पुनस्ते मन्त्राः । 'स्योना पृथिवि भव' इत्येतदारभ्य यावत् सौर्यस्वस्त्ययनान्तमिति ।। १० ।।

संहाय 'अतो देवा अवन्तु नः' (ऋ० सं० १. २२. १६) **इति त्रिः ।। ११ ।।**

एतां दक्षिणामुखाः प्रत्यङ्मुखा उदङ्मुखाश्चतुर्थम् ।।१२।।

एतामृचं दक्षिणामुखा जपन्ति । संहाय उत्थायेत्यर्थः । प्रत्यङ्मुखा उदङ्मुखाश्चतुर्थम् । तत्रार्धर्चशः प्रविभागो भवति । एकमर्धर्चं प्रत्यङ्मुखा जपन्ति । एकं चोदङ्मुखाः । अथास्यामृचि जपं प्रत्यनेका विप्रतिपत्तयः । बहुधा विप्रतिपन्नाः । एतस्मिंस्तु पक्षे एतामिति ग्रहणमपार्थकम् । तस्मात् पक्षान्तरं प्रतिपन्नाः । प्राङ्मुखा एतामृचं त्रिर्जपन्ति । दक्षिणामुखाः प्रत्यङ्मुखा उदङ्मुखा इति पच्छो जपन्तीत्यानन्तर्येण च योगः । एवमेतामिति

परिहृतं भवति । चतुर्थमिति निर्देशमस्या ऋचः कृत्वा एतामित्यनुपदेश उपपद्येत । बहुविधा इति कृत्वोपपद्यते सर्वम् । अयं तूद्देशः । एतस्मिंस्तु पक्षे चतुर्थग्रहणमेतामिति चोभयं परिहृतं द्रष्टव्यम् । एवमन्तं प्रत्यवरोहणम् । पश्चाद्यथावकाशं शेरते । अन्ये पुनरेतत् कृत्वा यथाशय्यं गच्छन्तीति ॥ १२ ॥

संहाय सौर्याणि स्वस्त्ययनानि च जपित्वान्नं संस्कृत्य ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीत ॥ १३ ॥

संहाय [1]समागम्येत्यर्थः । तत्र संहायग्रहणं कुर्वन्नेतज्ज्ञापयति—यथास्थानेषु ते[2] शयितार इति । सौर्याणि व्याख्यातानि । स्वस्त्ययनानि चानोभद्रीयादीनि[3] । कालश्चोदितः । उदित आदित्ये तानि जपित्वान्नं संस्कुर्वन्ति । संस्कृत्य च ब्राह्मणान् भोजयन्ति । अन्नसंस्कारवचनं चरोर्भोजनं मा भूदिति । अन्यत्र च संस्कारवचनानुपदेशाच्चरोरेव भोजनं कर्तव्यम् । क्व पुनस्तत् । अनुप्रवचनीये 'ब्राह्मणान् भोजयित्वा वेदसमाप्तिं वाचयीत' (१. २२. १६) इति तस्यैव चरोर्भोजनं भवतीति । कस्मात् । प्रकृतत्वादन्नसंस्कारानुपदेशाच्च ॥ १३ ॥

इति द्वितीये तृतीया कण्डिका

हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः ॥१॥

हेमन्तशिशिरयोर्ऋत्वोश्चतुर्णामपरपक्षाणां या अष्टम्यस्तास्वष्टका नाम कर्म भवति । अष्टकेति कर्मणो नामधेयम् । अपरपक्षा इति कृष्णपक्षा उच्यन्ते । शुक्लादयश्च मासा[4] भवन्ति । तत् कथं गम्यते ।

[1] सहागम्य—A, C; सहागत्य—D. [2] ते—omitted in A, C.
[3] भद्रादीनि—A, C, D. [4] शुक्लादयश्चेमाः—A, C, D.

एवं कालज्ञा[1] उपदिशन्ति । वाक्यशेषाच्च ज्ञायते यथा शुक्लपक्षः पूर्वं इत्युच्यते कृष्णपक्षश्चापर इति । कः पुनर्वाक्यशेषः । 'ते पूर्वपक्षाः पूर्वेऽदीक्षन्त' इत्यारभ्य 'अपरपक्षा अपरेऽदीक्षन्त' (ऐ० ब्रा० ४. २५) इत्याह । तत्र चापरपक्षाणां तमोरूपत्वं दर्शयति । तेन ज्ञायते—अपरपक्षशब्देन कृष्णपक्षो गृह्यत इति । तत्र चतुर्ग्रहणमतिरिच्यते । कस्मात् । अपरपक्षाश्चत्वार एव ते ननु भवन्ति हेमन्तशिशिरयोः । पुनः नियमार्थं क्रियते[2] भूयस्यो मा भूवन्निति । कथं वा भूयसीनां प्रसङ्ग इति चेत् अधिकमासोपजनने[3] पञ्चानां प्रसङ्गः । तन्निवृत्त्यर्थं चतुर्ग्रहणम् । अथवा [4]बहुवचनोपदेशादाद्यबहुत्वविज्ञानं[5] प्रसज्येत[6]। न्याय्यत्वाच्छास्त्रान्तरदर्शनाच्च। 'ऊर्ध्वमाग्रहायण्यास्तिस्त्रोऽष्टकाः' (शाङ्खा० गृ० ३. १२. १) इति शास्त्रान्तरे[7] । तन्निवृत्त्यर्थं वचनमारभ्यते ।। १ ।।

एकस्यां वा पूर्वेद्युः पितृभ्यो दद्यात् ।। २ ।।

एकस्यां वा पूर्वेद्युः पितृभ्यो दद्यात् । एवं सति सूत्रभेदे पूर्वेद्युः कर्मणो विकल्प[8] उपदिष्टो भवति । एकस्यां वा पूर्वेद्युर्ददाति सर्वासु वेति । एवमेके । अत्र त्वेकस्यां वेति सप्तमीनिर्देशो नोपपद्यते । पञ्चम्या भवितव्यम् । एकस्या वेति। तस्माद् [9]विभक्तिसंयोगस्यानुपपत्तेर्मन्यामहे नायमर्थ इति । एकस्यां वा अष्टम्यामष्टकाः[10] कार्याश्चतुर्षु वेति। पूर्वेद्युः[11] पूर्वस्मिन्नहनि सप्तम्यामित्यर्थः । पितृभ्यो दद्यात् प्रयच्छेदित्युक्तं भवति । तत्र पितरः के गृहीतव्याः पितृपितामहप्रपितामहाः । अत्र संशयो भवति । अप्रत्यक्षत्वात्

---

[1] कालज्ञानिनः—B. [2] नियमार्थमाश्रियते—A, C; नियमाय क्रियते—D. [3] अधिमासो जायते—A, C. [4] बहुवचनेन—A, C, D. [5] विज्ञानः—B. [6] प्रसज्यते तन्न्यायत्वात्—A, C, D. [7] शास्त्रान्तरनिवृत्त्यर्थं—A, C, D. [8] कर्मविकल्पः—A, C, D. [9] विभक्तियोगस्योपपत्तेः—A, C, D. [10] अष्टका कर्तव्या—A, C, D. [11] हुत्वा—added in B; अष्टकाभिर्हुत्वा in A, C, D.

पितॄणां कथं दातव्यमिति । [1]अत्राभ्युपायोऽनेकधा दृष्टः पितृभ्यो दद्यादित्यस्यां चोदनायाम् । स्मृतौ तावद् दृष्टम्[2] 'अपरपक्ष ऊर्ध्वं चतुर्थ्याः पितृभ्यो दद्यात्' (वसिष्ठधर्मसू. ११. १६) इत्येवमुक्त्वा ब्राह्मणभोजनं विदधाति । इह च पूर्वासु पितृभ्यो दद्यादित्युक्ते पिण्डदानं श्रूयते । एवमन्यतरत्[3] प्राप्नोति । उभयं वा चोद्यते । इत्येवमनेकधा संशयः । तत्र यदा पिण्डदानमभ्युपगम्यते तदा पिण्डपितृयज्ञकल्पः प्रवर्तते । यदा ब्राह्मणभोजनं तदा स्वेन कल्पेन । एवमुभयमपीति । पिण्डदानं तावन्न प्राप्नोति । कस्मात् । अप्रकृतत्वात्[4] । पिण्डपितृयज्ञकल्पस्य[5] प्रकरणान्तरे च विधानात् । पाकयज्ञतन्त्रं चेह प्राप्नोति । हुतत्वादस्य पाकयज्ञस्य । पिण्डदानाभ्युपायाभावाच्च पिण्डदानं न भवति । यत्र चासावभिप्रेतः कल्पो भवति [6]तत्र वचनाद् व्याचष्टे । 'पिण्डपितृयज्ञ-कल्पेन हुत्वा' (२. ५. ४) इति। [7]इह वचनं नास्ति । तस्मात् पिण्डदानं न प्राप्नोति । [8]अथ मतं सामर्थ्यात् स कल्पो[9] भविष्यति तुल्यत्वाच्चोदनाया इति । एवं तर्हि तत्र तत्र [10]विधानमपार्थकं भवति । एवं पिण्डदाने कल्प्यमानेऽनेकदोषप्रसङ्गः । तस्मात् ब्राह्मणभोजनं कर्तव्य-मित्युपपद्यते ।। [11]एतेषां च स्थालीपाकानां पार्वणवच्छ्रपणं प्राप्नोति । अन्ये पुनः स्थालीपाकानां प्रसिद्धोपादानमिच्छन्ति । अथ पुनरन्येऽपि पिण्डदानं चोदितं मन्यन्ते । ननु चोक्ता दोषाः । अदोषास्ते । कथम् । स्वशास्त्रे पितृभ्यो दद्यादित्यस्यां चोदनायां यस्मात् पिण्डदानं दृष्टं तस्माच्चोदनासामान्यादिहापि स एवार्थोऽध्यवसीयते । ननु च स्मृता-वन्यस्यां चोदनायां ब्राह्मणभोजनं श्रूयत इति । एवं हि वैलक्षण्यं संपद्येत । एकत्र ब्राह्मणभोजनमेकत्र पिण्डदानमित्यपन्यायः । तस्मादिहापि

---

[1] तत्र—B. [2] अष्टका—A, C, D. [3] अन्यतरः—A, C, D. [4] अप्रकृतित्वात्—B. [5] यज्ञस्य—B [6] इति—A, C. [7] इह—omitted in A, C, D. [8] वर्ततेऽथ—A, C. [9] स्वकल्पो—A, C. [10] वचनम्—A, C, D. [11] एषां—B.

पिण्डदानम् । अपि च तत्रापि पिण्डदानं स्मृतौ च भवति । तेनेहापि पिण्डदानं पिण्डपितृयज्ञकल्पेन भवति । ननु शास्त्रान्तरविधानान्न प्राप्नोति । संबन्धकरणादेकशास्त्रत्वं पुरस्तादुक्तम् । तस्मादिह प्राप्नोति । पाकयज्ञतन्त्रस्य चाप्राप्तिः । समुच्चयस्याशक्यत्वात् । ननु च पिण्डपितृयज्ञग्रहणं तत्रानर्थकमिति । नानर्थकम् । कस्मात् । अन्यार्थत्वाद्वचनस्य । कः पुनस्तत्रार्थः । तत्रैव प्रयोजनं वक्तव्यमित्युपपद्यते । इदं [1]त्वपरिहृतमिति कृत्वास्य प्रयोजनमिहैवोच्यते । अधिकारार्थं पिण्डपितृयज्ञकल्पग्रहणं[2] क्रियते । अधिकारे पुनः किं प्रयोजनम् । उभयोर्विध्योरत्रोपदेशः क्रियते । पितॄणां स्त्रीणां च पिण्डदानम् । तत्र दृष्टं पितॄणां पिण्डदानम् । स्त्रीणां तु न दृष्टं पिण्डदानम् । तत्[3] कथमनेन कल्पेन तासां च पिण्डदानं स्यादित्येतदर्थं तत्र कल्पग्रहणमधिक्रियते । अथवा ब्राह्मणभोजनमत्रानुषङ्गिकं[4] भवति । तदुत्तरत्र ज्ञापयिष्यामः । एवं पितृभ्यो दद्यादित्यस्यां चोदनायां पिण्डदानं सिद्धं भवति ।। २ ।।

ओदनं कृसरं पायसम् ।। ३ ।।

चतुःशरावस्य वापूपान्[5] ।। ४ ।।

ओदनकृसरपायसानां समुच्चयः । कस्मात् । अन्यत्र समुच्चयदर्शनात् । एतेषां त्रयाणामपूपानां च विकल्पः । अन्ये पुनः सर्वेषां विकल्पमिच्छन्ति । अपरे चतुर्णामेतेषां द्रव्याणां चतुर्ष्वहःसु यथासंख्यमिच्छन्ति । एवमनेकधा विप्रतिपन्नाः । तेन [6]सुपरीक्ष्यावधारणं कर्तव्यम् ।। ३-४ ।।

'उदीरतामवर उत्परासः' (ऋ० सं० १०. १५. १) **इत्यष्टाभिर्जुहोति । यावतीभिर्वा कामयीत ।। ५ ।।**

---

[1] इदं तु परि°—A, C, D. [2] यज्ञग्रहणं—A, C, D. [3] तत्—omitted in A. C. [4] अत्र omitted in A. C. [5] This *sūtra* is missing in MSS. [6] संपरीक्ष्य—A, C, D.

कामयीतेति किं काम उपदिश्यते[1] । नेत्युच्यते । यावत्योऽभिप्रेता अष्टाभ्य[2] ऊर्ध्वमिच्छन्ति तावतीभिर्जुहोति । तत्र ये प्रत्यादेशं होमं वर्णयन्ति तेषामष्टाभिर्वा भूयसीभिर्वा एका आहुतिः । ये तु प्रत्यृचं वर्णयन्ति तेषामुक्तः परिहारः । तेनात्राष्टावाहुतयो भवन्ति भूयस्यो वा ॥ ५ ॥

अथ श्वोभूतेऽष्टकाः पशुना स्थालीपाकेन च[3] ॥ ६ ॥

अथशब्दोऽनन्तरार्थः । श्वोभूत इति कस्य श्वोभूते । सप्तम्याः । पूर्वेद्युः कर्माधिकृतम् । तत्र श्वोभूतेऽष्टमी भवति । तस्यामष्टम्यां तत् कर्म कर्तव्यम् । अष्टकेति कर्मोपदिश्यते । पशुना कर्तव्यं स्थालीपाकेन वा । तत्र श्वोभूतग्रहणं न कर्तव्यम् । कस्मात् । अष्टमीष्वष्टका इति वचनात् । तेन श्वोभूत एव भविष्यति । उच्यते । नियमार्थं क्रियते । कथं श्वोभूत एवाष्टका स्यादिति । इह नियमं कुर्वन्नेतमर्थं दर्शयति—अन्यत्र नियतकालानां कर्मणां केनचित् कारणेनोत्कर्षो भवति । तद्यथा पार्वणस्य पर्वणि विहितस्याशक्त्यासंभवाद्वा कालातिक्रमे प्रायश्चित्तं हुत्वा कालान्तरे क्रिया भवति । एवमिहापि कालान्तरे क्रिया स्यात् । तन्निवृत्त्यर्थं श्वोभूतग्रहणं क्रियते । अथात्र संशयः । किं स्थालीपाकः पश्वङ्गभूतश्चोद्यते आहोस्वित् स्थालीपाकान्तरमिति । उच्यते । पश्वङ्गभूतश्चोद्यते । यदि पश्वङ्गभूतो न चोदयितव्यः, कस्मात् पश्वङ्गभूतत्वादेव प्राप्नोति । किं कारणम् । पशुनेति वचनात् पशुद्रव्येणैव क्रिया प्राप्नोति नान्येन । एवं निवृत्तः स्थालीपाकः पुनश्चोद्यते इत्येवमेके वर्णयन्ति । तत्तु नोपपद्यते । किं कारणम् । यद्यनेन प्राप्नोति पशुनेत्यन्येनापि भविष्यति[4] । पशुकल्पेनेति कल्पवचनात् स्थालीपाकस्तदङ्गं[5] भविष्यति । एवं सिद्धे यत् स्थालीपाकं

---

[1] उपदिश्यः— A, C, D. [2] अष्टकाभ्यः—A, C, D. [3] वा—B.
[4] यद्यन्येन न प्राप्नोति पशुनेति अन्येन भविष्यतीति—B. [5] तदङ्गे—A, C, D.

पुनश्चोदयति तेन स्थालीपाकान्तरमिदमिति सिद्धं भवति । अथापरः संशयः—किं पशुस्थालीपाकयोः समुच्चयो विकल्पो वेति । तत्र विकल्पं वर्णयन्ति । ननु चशब्दकरणात् समुच्चय इति । नेत्युच्यते । वाशब्दस्य स्थाने [1]चशब्दो द्रष्टव्यः । कल्पान्तरदर्शनाच्च मन्यामहे विकल्प इति । तत्र पशोरभावे स्थालीपाकः प्रवर्तत इति ।। ६ ।।

अप्यनडुहो यवसमाहरेत् ।। ७ ।।

यदि पशुर्वा स्थालीपाको वा न संपद्यते तेन कथं कर्तव्यमिति । अनडुहो यवसाहरणं कर्तव्यमिति ।। ७ ।।

यो हि तस्याप्यसमर्थः स किं करोति—

अग्निना वा कक्षमुपोषयेत्[2] ।। ८ ।।

अग्निना कक्षं दहेदित्यर्थः ।। ८ ।।

उभयोरनयोः पक्षयोः यवसाहरणकक्षोपदहनयोः—

एषा मेऽष्टकेति ।। ९ ।।

ब्रूते । तत्र केचिज्जपमिच्छन्ति[3] । अन्ये मनसा प्रयोगम् । तत्र मनसा प्रयोगः कर्तव्य इतीच्छन्ति तेन संकल्पमात्रमेवेदं न मन्त्रः । एते चत्वारः पक्षाः अतुल्याः[4] । पूर्वालाभे उत्तरोत्तरः कल्पः[5] प्रवर्तते । पूर्वपूर्वो[6] गरीयान् उत्तरोत्तरो ह्रसीयान् ।। ९ ।।

न त्वेवानष्टकः स्यात् ।। १० ।।

---

[1] चकारो—B. [2] All MSS. read so. [3] Portion up to the next इच्छन्ति is missing in A, C, D. [4] एते न चत्वारः पक्षास्तुल्याः—A, C, D. [5] पक्षः—A, C, D. [6] पूर्वः पूर्वो—B.

अनष्टकेन न भवितव्यमित्यर्थः । किमर्थमिदमारभ्यते । तत्रैके यवसाहरणं वा कक्षोपदहनं वा कृत्वा पुनरप्यष्टका पशुना स्थालीपाकेन वा कर्तव्येति मन्यन्ते । अन्ये पुनर्नैवम् । कस्मात् । सर्व एतेऽष्टकाविकल्पाः । यद्येवं किमर्थमिदमारभ्यते । उच्यते । उत्तरयोः [1]पक्षयोरशक्तिविषयदर्शनार्थम् । एवमपि कुर्यात् न त्वनष्टकः स्यादिति । तस्मादारब्धव्यम् ।। १० ।।

तां हैके वैश्वदेवीं ब्रुवते ।। ११ ।।

तामष्टकामेके आचार्या वैश्वदेवीं मन्यन्ते ।। ११ ।।

आग्नेयीमेके सौर्यमेके प्राजापत्यामेके रात्रिदेवतामेके नक्षत्रदेवतामेक ऋतुदेवतामेके पितृदेवतामेके पशुदेवतामेके ।। १२ ।।

आग्नेयीमेके आचार्या मन्यन्ते । एवमाद्या अष्टौ देवता उपदिश्यन्ते । तत्र संशयः । किं देवताविकल्पः आहोस्विद् देवताविप्रतिपत्तय इति । तत्रैके देवताविकल्पं मन्यन्ते । तेषां किं सिद्धं भवति । यदा वैश्वदेवी क्रियते तदा विश्वेभ्यो देवेभ्यः स्वाहेति[2] होमः प्राप्नोति । ननु च मन्त्रोपदेशान्न प्राप्नोति । पक्षे मन्त्रोपदेशः कृतार्थः स्यात् यदा[3] न काचिद् देवता भवति । [4]एवमुत्तरास्वपि देवतासु[5] । तत्त्विदं नोपपद्यते । कस्मात् । मन्त्राणां [6]नित्यत्वोपदेशात् । [7]तस्मान्मन्त्रैर्होमो नित्यः । कथं गम्यते । ज्ञापकमुत्तरत्र वक्ष्यामः । तस्माद् देवताविप्रतिपत्तिमात्रमेवेदमिति । विकल्पोपदेशे सत्युपदेशोऽपार्थकः । किं कारणम् । अहोमत्वात् । तस्मात्[8] विप्रतिपत्तिमात्रमेवेदमिति । आचार्याभिप्राया एक इति ।। १२ ।।

---

[1] पक्षयोरविषये प्रयोगदर्शनार्थम्—A, C, D. [2] स्वाहेति—omitted in A, C, D. [3] यदा—omitted in A, C, D. [4] तदेवम्—A, C, D. [5] परिहारो भवति—added in A, C, D. [6] नित्यत्वेन—B. [7] तस्मात् —omitted in B, D. [8] तस्माद्धि—A.

पशुकल्पेन पशुं संज्ञप्य प्रोक्षणोपाकरणवर्जं वपामुत्खिद्य जुहुयात्——

'वह वपां जातवेदः पितृभ्यो
यत्रैनान् वेत्थ निहितान् पराके ।
मेदसः कुल्या उपैनान् स्त्रवन्तु
सत्या एता आशिषः सन्तु सर्वाः ॥'

(वा० सं० ३५. २०) **स्वाहेति ॥ १३ ॥**

वह वपामिति मन्त्रान्ते सूत्रच्छेदः । पूर्वोक्तेन पशुकल्पेन पशुं संज्ञपयति । प्रोक्षणोपाकरणवर्जमिति एते द्वे कर्मणी न भवत इत्युक्तम् । संज्ञप्य वपामुत्खिद्य उत्पाटच जुहुयात् वह वपामित्यनेन मन्त्रेण । अथात्र कल्पग्रहणं न कर्तव्यम् । कस्मात् । पशुचोदनायां कल्पस्य प्राप्तत्वात् । तत्रैके कल्पग्रहणप्रयोजनं वर्णयन्ति । संज्ञपन एव कल्पो भवति नोर्ध्वमिति । कथं गम्यते [1]यथायमर्थ इति । उत्खिद्येत्यधिकवचनात् । तेन 'एकैकस्यावदानस्य' (१. ११. १४) इत्ययं धर्मो न प्राप्नोति । अशृतायाश्चात्र वपाया होमः । एवं प्रतिपन्नाः । अन्ये तु नैवम्[2] । सर्वत्र पशुकल्पो भवतीति ॥ कस्मात् । प्राप्तत्वात् पशुचोदनायाः । यद्येवं कल्पवचने प्रयोजनं वक्तव्यम् । उच्यते । अधिकारार्थं कल्पवचनम् । अधिकारे को धर्मलाभ इति । उच्यते । इह प्रोक्षणं प्रतिषिध्यते । तदिदं[3] प्रतिषिध्यमानं कृत्स्ने कर्मणि प्रोक्षणं प्रतिषिध्येत। तत्र को दोषः।यथैव पाशुकं प्रोक्षणं न भवति एवं स्थालीपाकस्यापि प्रोक्षणं न स्यात् । कस्मात् । प्रतिषेधाविशेषात् । अतः पुनरधिकारार्थं कल्पग्रहणं क्रियते । कथं पाशुकस्य[4] प्रोक्षणस्य प्रतिषेधः स्यान्न स्थालीपाकविहितस्येति । तस्मात् कल्पग्रहणमेवमर्थं क्रियते । अथोत्खिद्येति

[1] अथ——A. [2] तत्रैवं——A, C. [3] तदिष्टं——A, C. [4] पशुकल्पस्य——A.

कस्मात् । न ह्यनुत्पाट्य वपाया होमः शक्यते कर्तुम् । तत्र प्रयोजनम्—कथं सर्वत्रानेनैव मन्त्रेणोत्खिद्य जुहुयात् इति । कथं वा न स्यात् । पितृलिङ्गत्वान्मन्त्रस्य[1] पितृदेवत्यायामेवायं मन्त्रः प्रसज्येत । कस्मात् । लिङ्गात्[2] । तेन [3]कथमयं मन्त्रः सर्वत्र नित्यः स्यादित्यत उत्खिद्यवचनम्[4] । न भवतीत्यपरे । उत्तरत्र प्रयोगदर्शनात् । [5]अथावदानानां स्थालीपाकस्य चेति । कल्पग्रहणस्य प्रयोजनम्—मधुपर्कादिषु गौरालभ्यते । अथापि ब्राह्मणाय वा राजन्याय वाभ्यागताय महोक्षाणं महाजं वा पचेदिति देवताचोदनं न स्यात् । ब्राह्मणवचनात् । तत्रानेन पशुकल्पेन संज्ञपनं स्यादिति नियमार्थं कल्पग्रहणं क्रियत इति ब्रुवते । 'हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणिहुताः' (१.१.३) इति जातिवाचकम् । तस्माच्छास्त्रान्तरेण गम्यते । तस्मान्नियमार्थमेवेदं कल्पग्रहणम् ॥ १३ ॥

अथावदानानां स्थालीपाकस्य च ॥ १४ ॥

[6]होतव्यमुत्तरैर्मन्त्रैः । तत्र स्थालीपाकस्य चेति स्थालीपाकविकल्पेऽपि एतैर्मन्त्रैर्होतव्यमिति । तस्मात् स्थालीपाकस्य चेति ॥ १४ ॥

'अग्ने नय सुपथा राये अस्मान्'

(ऋ० सं० १.१८९.१) इति द्वे ।

'ग्रीष्मो हेमन्त ऋतवः शिवा नो
वर्षाः शिवा अभया शरन्नः ।
संवत्सरोऽधिपतिः प्राणदो नो
ऽहोरात्रे कृणुतां दीर्घमायुः' स्वाहा ॥

---

[1] अपितृदेवत्यायामष्टका न प्राप्नुयात्—B. [2] कल्पाल्लिङ्गात्—B.
[3] कथम्—omitted in B. [4] उच्यते—added in B. [5] Portion from here up to the end of the *bhāṣya* on this *sūtra* is omitted in B.
[6] अवदानानां स्थालीपाकस्य च मन्त्रा भवन्ति—B.

'शान्ता पृथिवी शिवमन्तरिक्षं
द्यौर्नो देव्यभयं नो अस्तु ।
शिवा दिशः प्रदिश उद्दिशो न
आपो विद्युतः परि पान्तु सर्वतः' स्वाहा ॥

'आपो मरीचीः प्रवहन्तु नो धियो
धाता समुद्रो ऽवहन्तु पापम् ।
भूतं भविष्यदभयं विश्वमस्तु मे
ब्रह्माधिगुप्तः स्वाराक्षराणि' स्वाहा ॥

'विश्व आदित्या वसवश्च देवा
रुद्रा गोप्तारो मरुतः सदन्तु ।
ऊर्जं प्रजाममृतं पिन्वमानः
प्रजापतिर्मयि परमेष्ठी दधातु' स्वाहा ॥

'प्रजापते न त्वदेतान्यन्यः' (ऋ० सं० १०. १२१. १०) **॥ १५ ॥**

अग्ने नय सुपथेत्येवमादयो होममन्त्राः[1] ॥ १५ ॥

सौविष्टकृत्यष्टमी ॥ १६ ॥

स्विष्टकृदष्टमो होमः स्यात् । स्थालीपाकस्य चाष्टम एव भवति । तत्रैतन्न वक्तव्यं सौविष्टकृतीति । कस्मात् । प्राप्तत्वात् । संख्यातश्चाष्टमी भविष्यति । तस्मादुभयं न वक्तव्यम् । तत्रैके प्रयोजनं ब्रुवते । योऽयं पशुमध्यगतः स्थालीपाकस्तस्य विकल्प आम्नातः । किमिति[2] । पृथग् वा

[1] अग्ने नय सुपथेति सप्तभिर्होतव्यः—A, C, D. [2] Omitted in B.

होमो भवतीति । 'अवदानैर्वा सह' (१. ११. १३) इति स विकल्पः प्राप्तः । अतोऽष्टमीग्रहणं क्रियते । कथं सहहोम एव स्यान्न पृथग्घोमः स्यात् स्थालीपाकस्येत्येवमेके । अन्ये पुनर्नैवम् । अत्रापि विकल्पमेवेच्छन्ति । यद्येवं वचनमपार्थकम् । वचनप्रयोजनमिदम्—कथं सर्वत्र सौविष्टकृती आहुतिरष्टमी स्यादिति । तेन किं सिद्धं भवति । सर्वपक्षेषु एतेषां होममन्त्राणां प्रयोगः सिद्धो भवति । कथं वा न स्यात् । इह यदा वैश्वदेवी अष्टका स्यात् तदा वैश्वदेवो मन्त्रः प्रसज्येत होमे । कस्मात् । लिङ्गसंयोगात् । एवमन्येष्वपि मन्त्रेषु । तन्निवृत्त्यर्थमष्टमीग्रहणं क्रियते । एवं परार्थवाक्ये अष्टमीग्रहणं कुर्वन्नेतज्ज्ञापयति— यदा पृथग्घोमो भवति स्थालीपाकस्य चावदानानां च तदा उभयत्रापि सौविष्टकृत्यष्टमी भवतीति । तेन यत् पुरस्तादुक्तं पृथग्घोमे स्विष्टकृद् भिद्यत इति सोऽयं स्विष्टकृद्भेदः प्रदर्शितो भवति ।। १६ ।।

ब्राह्मणान् भोजयेदित्युक्तम् ।। १७ ।।

[1]ब्राह्मणान् भोजयेदित्युक्तं प्रत्येतव्यमित्यर्थः । क्व उक्तम् । पुरस्तादिति । 'ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीत' (२. ३. १२) इति । तत्र कस्माद् ब्राह्मणभोजनं विधीयते । उच्यते । विधानार्थम् । अन्यथा ब्राह्मणभोजनं न स्यात् । कस्मात् । अविधानात् । तस्मात् वक्तव्यम् । तत्रोक्तोपदेशे प्रयोजनं पूर्वोक्तस्य विधेराकर्षणार्थम् । तद्यथा 'उक्तं गृहप्रपदनम्' (२. १०. १) इति पूर्वोक्तस्य विधेः सधर्मकस्याकर्षणं क्रियते । अथानुषङ्गिकं ब्राह्मणभोजनं कस्मान्न भवति । पूर्वेद्युर्वत् । उच्यते ।

---

[1] B reads: किमुक्तं भवति । ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीतेति चोदितं तत्र । तत्र तदङ्गत्वादिह तु ब्राह्मणान् भोजयेदिति किमुक्तं भवति । इह तु पितृसंयुक्तकर्मत्वात् अधिकारे यदुक्तं नवावरान् भोजयेत् अयुजो वेति अन्वष्टक्य उक्तग्रहणात् पूर्वेद्युश्चापि भवितव्यम् ।

प्राप्नोति । किं त्विहान्यत् प्रयोजनम्—ब्राह्मणभोजनमात्रमेव यथा स्यात् पूर्वन्यायेन । पूर्वेद्युरधिकमपि भवति ।। १७ ।।

इति द्वितीये चतुर्थी कण्डिका

अपरेद्युरन्वष्टक्यम् ।। १ ।।

अपरेद्युर्नवमी भवति । नवम्यां कर्तव्यमित्यर्थः । अन्वष्टक्यमिति कर्मणो नामधेयम् । अष्टकाया अनुकृतत्वात् अन्वष्टक्यं स्यात् ।। १ ।।

तस्यैव मांसस्य प्रकल्प्य ।। २ ।।

अष्टकाया मांसशेषेण भोजयेदित्युक्तं भवति । तस्यैव मांसस्य, योऽयं पशुरष्टकायां कृतस्तस्यैकदेशं कल्पयति । संस्करोतीत्यर्थः । किमर्थम् । ब्राह्मणार्थम् । कथं गम्यते । उपदेशात् । इतरथा ह्युपदेशोऽपार्थकः । कस्मात् । होमाभावात् । तस्माद् ब्राह्मणभोजनार्थं मांसं संस्कृतमिति सिद्धं भवति ।। २ ।।

दक्षिणाप्रवणेऽग्निमुपसमाधाय परिश्रित्योत्तरतः परिश्रितस्य द्वारं कृत्वा समूलं बर्हिस्त्रिरपसलैरविधून्वन् परिस्तीर्य हवींष्यासादयेदोदनं कृसरं पायसं दधिमन्थान् मधुमन्थांश्च ।। ३ ।।

दक्षिणाप्रवणदेशे उपसमाधानं करोति[1] । दक्षिणाप्रवणग्रहणं[2] प्राक्प्रवणनिवृत्त्यर्थम् । दक्षिणाप्रवणमुत्तरोच्छ्रितम् । दक्षिणाप्रवणं भवति स्थण्डिलम्, तस्मिन् स्थण्डिले अग्न्युपसमाधानं कृत्वा । उपसमाधानग्रहणमुक्तप्रयोजनम्[3] । उपसमाधाय परिश्रयणं करोति । गुप्तीकरण-

---

[1] This sentence is omitted in A [2] कृत्वा—added in A.
[3] ग्रहण°—omitted in A, C; स्यात्—added in B; भवति—added in D; ओदनादीनि भवन्ति—added in A; पिण्डपितृयज्ञकल्पः सर्वत्र वर्तते—B; पात्रासादनादीनि सर्वत्र—B.

माच्छादनमित्यर्थः । परिश्रित्योत्तरपक्षे द्वारं करोति । अथ परिश्रयणग्रहणं पुनः किमर्थं क्रियते । परिश्रयणस्यानित्यत्वं दर्शयति । यदा परिश्रयति तदोत्तरतो द्वारं करोति । समूलं बर्हिः । बर्हिरत्र समूलं भवति । मूलेन सह गृहीतं बर्हिर्भवति । त्रिरपसलैरविधून्वन् परिस्तृणाति । त्रिरपसलैः प्रसव्यमित्यर्थः । आवृत्यावृत्य त्रिः परिस्तरणं स्यात् । अविधून्वन्नित्यधस्ताद्भूतानि अकम्पयन्नित्यर्थः । हवींषि भवन्ति परिस्तीर्य तस्मिन् परिस्तरणे हवींष्यासादयेत् । हवींष्येतान्योदनादीनि भवन्ति । ओदनं कृसरं पायसमिति । तिलमिश्रस्थालीपाकः कृसरम् । पयसि शृतं पायसम् । दधिमन्था मधुमन्थाः सक्तुमिश्रा भवन्ति । ओदनादीन्यासादयेत् । तत्रौदनादीनां प्रसिद्धानां कुर्वन्ति । किं कारणम् । प्रसिद्धवदुपदेशात् । ननु च पिण्डपितृयज्ञकल्पेनेति वचनात् तत्रैव श्रपणं भवति । न भविष्यति । कस्मात् । उत्तरत्रोपदेशात् । तेनोत्तरत्रैवासौ कल्पो भवति । न प्राक् । तेनातिप्रणीतं च लेखाश्च पात्रासादनं न कुर्वन्ति । एवमेके । तत्तु नैवं भवति । कस्मात् तेनैव पिण्डपितृयज्ञकल्पवचनेन सर्वत्र प्रवर्तितो भवति । वचनात् । तेन पात्रासादनादि सर्वं कर्म भवतीति सिद्धम् ।। ३ ।।

पिण्डपितृयज्ञकल्पेन हुत्वा मधुमन्थवर्जं पितृभ्यो दद्यात् ।। ४ ।।

पिण्डपितृयज्ञकल्पेन हुत्वा मधुमन्थं वर्जयित्वा । पिण्डदानं करोति मधुमन्थेन सह कथं ज्ञायते । इह विहितत्वान्मधुमन्थस्य । तेन ज्ञायते पिण्डदानं [1]मधुमन्थेनावश्यं भवितव्यमिति । तत्र पिण्डपितृयज्ञकल्पेनेति कल्पग्रहणं कथं स्यात् । पिण्डपितृयज्ञेन हुत्वेति सिद्धे कल्पग्रहणमपार्थकम् । 'अथाग्नौ जुहोति यथोक्तं पुरस्तात्' (४. ७. १६) इत्यत्र पिण्डपितृयज्ञकल्पेन होतव्यम् । नियमार्थं कल्पग्रहणं ज्ञापकं भवति । पितृभ्यो दद्यादिति

---

[1] मधु°—omitted in A.

पिण्डदानं कर्तव्यमित्युक्तं भवति । पिण्डपितृयज्ञकल्पेन हुत्वा मधुमन्थवर्जं पितृभ्यो दद्यादिति । [1]अत्र पिण्डपितृयज्ञग्रहणं न कर्तव्यम् । कस्मात् । पितृदानचोदनायां प्राप्तत्वात् । पूर्वेद्युःकर्मवत् अर्थप्रसिद्धेः । यथा पूर्वेद्युः कर्मण्ययं कल्पो भवत्यर्थप्राप्तेरेवमिहापि भविष्यति । तस्माद् वचनमपार्थकम् । नापार्थकम् । किमर्थमारभ्यते । अधिकारार्थम् । अधिकारे पुनः किं प्रयोजनम् । इह पितृदाने सिध्यत्ययं कल्पः । तथा दृष्टत्वात् स्त्रीदाने तु न प्राप्नोति । कस्मात् । अनधिकारात् । तस्मादधिकारः क्रियते । स्त्रीदानेऽप्ययं विधिः कथं स्यादिति । तस्मात् कल्पवचनं पिण्डपितृप्रापणार्थमर्थप्राप्तिविधानार्थं च ॥ ४ ॥

स्त्रीभ्यश्च[2] । ॥ ५ ॥

स्त्रीभ्यश्च दद्यात् । अथ कथं स्त्रीणां दानं भवति । पितृवत् । तत्र विशेषान् वक्ष्यामः । लेखे तावद् द्वे भवतः । ऊहश्च[3] क्वचित् क्वचित् भवति यथा तावदुदकनिनयने [4]शुन्धन्तां पितर इत्यत्र शुन्धन्तां मातरः शुन्धन्तां पितामह्यः शुन्धन्तां प्रपितामह्यः इत्येवम् । तथा पिण्डनिपरणे एतत्ते असौ ये च त्वामत्रान्वित्यत्र द्वयोर्मात्रोर्द्विवद् भवति । एतद्वां यज्ञदारुद्रवे ये च युवामत्रानु इति । बहुषु तद्वत् एतद्वः कुमारदारुद्रदापतिदाः ये च युष्मानत्रानु इति । अनुमन्त्रणं सकृदेव भवति । कस्मात् । संभवित्वात् । कुमारदे अभ्यङ्क्ष्व[5] । कुमारदारुद्रदे अभ्यञ्जाथाम्[6] । कुमारदारुद्रदाविष्णुदा अभ्यङ्ध्वम्[7] इति । एवमञ्जनेऽपि[8] । वासोदाने मन्त्रो भिद्यते । असंसर्गित्वात् । ऊहश्च भवति । एतद्वो मातरो वास इति । उपस्थानं तु सकृदेव

---

[1] B begins the comm. on this *sūtra* here. [2] B reads the next three *sūtra-s* together here. [3] लिङ्गविशेषात् सर्वे यथार्थं वर्णयन्ति । कश्चोहश्च—added in A, C, D. [4] उदकदाने—B. [5] अङ्क्ष्व—A, C, D. [6] अञ्जाथाम्—A, C, D. [7] अङ्ध्वम्—A, C, D. [8] एवमभ्यञ्जनेऽपि—A, C, D.

भवति । कस्मात् । संभवित्वात् । एवं स्त्रीणां दानं भवति । तत्र पिण्डदानं मधुमन्थसहितानां पञ्चानां द्रव्याणां भवति । यदि पिण्डदानेऽपि मधुमन्थस्य ग्रहणं न स्यात् उपदेशोऽपार्थकः स्यात् । ननु स्त्रीणामर्थायोपदेशः कृतः स्यात् । नेत्युच्यते । कथं गम्यते । येन स्त्रीणां नित्यान्येतानि[1] द्रव्याणि प्रकृत्य सुरायाश्चाचामस्य चाधिकमुपदिशति तेन ज्ञायते पिण्डदाने मधुमन्थेनावश्यं भवितव्यम् ॥ ५ ॥

[2]सुरा चाचाममित्यधिकम् ॥ ६ ॥

स्त्रीणां त्वयं[3] विशेषः । सुरा चाचामश्चाधिको [4]भवति पिण्डदाने तत्रैते द्रव्ये लोकतः प्रसिद्धे गृह्येते । कस्मात् । शास्त्रेऽनुपदेशात् ॥ ६ ॥

कर्षूष्वेके द्वयोः षट्सु वा ॥ ७ ॥

एके आचार्याः कर्षूषु [5]पिण्डनिपरणमिच्छन्ति । न लेखायाम् । [6]कर्ष्व इत्यवटा उच्यन्ते । तत्र कर्ष्वौ च कर्ष्वश्च कर्ष्वः । तासु कर्षूषु । तत्र यदा द्वे कर्ष्वौ तदा आयते करोति । यदा षट्, तिस्रः पितॄणां तिस्रश्च स्त्रीणां तदा पृथक्करोति परिमण्डलाश्च ता भवन्ति कर्ष्वः ॥ ७ ॥

पूर्वासु पितृभ्यो दद्यात् ॥ ८ ॥

तत्र पूर्वास्विति । पूर्वा च लेखा पूर्वा च कर्षूः पूर्वाश्च कर्ष्वस्तासु पूर्वासु पितृभ्यः पिण्डान् निपृणीयात् ॥ ८ ॥

अपरासु स्त्रीभ्यः ॥ ९ ॥

---

[1] एतानि—omitted in A. [2] सुरामाचाममित्यधिकौ—A, C.
[3] चायं—D. [4] क्व—added in A, C. [5] पिण्डदानम्—B.
[6] तत्र—added in B.

अपरा च लेखा अपरा च कर्षूः अपराश्च कर्ष्वः ताः अपरास्तासु अपरासु स्त्रीभ्यः पिण्डान् निपृणीयात्। एवमुद्देशेन [1]विधयो विचारिताः। तथापि तु परीक्ष्य कर्तव्यः प्रयोगः ॥ ९ ॥

एतेन माध्यावर्षं प्रोष्ठपद्या[2] ॥ १० ॥

एतेन विधानेन[3] प्रोष्ठपद्यां माध्यावर्षं नाम कर्म[4] भवति। किमेतेनेति[5] प्रतिनिर्दिश्यते। उच्यते। अनन्तरत्वादन्वष्टक्यम्। तन्नोपपद्यते। कस्मात्। कर्मैकदेशत्वात्। तेनाष्टकाकर्म निर्दिश्यते। कस्मात्। प्राधान्यात्। तेन पूर्वेद्युःकर्मादि सर्वं कर्म भवति। कालश्च ॥ १० ॥

अपरपक्षे मासि मासि चैवम् ॥ ११ ॥

पितृभ्यो दद्यात्। तत्रापरपक्षग्रहणं पूर्वप्राप्तस्य कालस्य निवृत्त्यर्थम्। एवमिति किं प्रतिनिर्दिश्यते। अन्वष्टक्यम्। ननु च कर्मैकदेशत्वात् न प्राप्नोति। संनिकर्षाद् भविष्यति। ननु पूर्ववदतिदेशः प्राप्नोति। उच्यते। अन्वष्टक्यमेव भवति। कस्मात्। पुनरतिदेशात्। यदि [6]त्वष्टकाकर्माभिप्रेतं स्यात् मासि मासि [7]चेत्येतावदेव उपदिशेत्। अपरपक्षे मासि मासि चेत्येवं सिद्धे यत् पुनरेवमिति निर्दिशति तज्ज्ञापयति अन्वष्टक्यं प्रतिनिर्दिश्यत इति। एवमेके। अन्ये त्वन्यथा। कथम्। एतेन मध्यावर्षं प्रोष्ठपद्या[8] अपरपक्षे। तेषामेतेनेत्यन्वष्टक्यं प्रतिनिर्दिश्यते। कस्मात्। प्रकृतत्वात्। प्रोष्ठपद्याः पौर्णमास्याः संनिधावपरपक्षग्रहणप्रयोजनमुक्तम्। मासि मासि चैवं पितृभ्यो दद्यात्। कथम्। यथा माध्यावर्षमित्युच्यते। यदा[9] उभयत्रा-

---

[1] विधेयो विचारितः—A, C. [2] प्रोष्ठपद्याम्—D. [3] विधानेन—omitted in A, C. [4] कर्म—omitted in A, C. [5] एतेनेति किं—B, D.
[6] ह्यष्टका—B, D. [7] मासिचेत्येवं—D. [8] प्रोष्ठपद्याम्—B, D.
[9] यदा—omitted in B.

प्ययं विधिरुपदिश्यते[1] पृथगुपदेशोऽनर्थकः। अपरपक्षे मासि मासि चैवमिति सिद्धत्वात्। उच्यते। पृथगुपदेशप्रयोजनं संज्ञाकरणार्थम्। प्रोष्ठपद्यां यत् क्रियते तन्माध्यावर्षं नाम भवति। संज्ञायाः पुनः किं प्रयोजनम्। संविज्ञानार्थं संज्ञाकरणम्। यथा आश्वयुजीकर्मेति। यथा प्रत्यवरोहणमिति। नित्यार्थं च। कथम्। माध्यावर्षं नित्यमनेन[2] विधिना स्यात्। कथं वा न स्यात्। विध्यन्तरोपदेशात्। 'अथातः पार्वणे' (४. ७. १) इतीदमपि मासि मासि विधीयते। उभयोस्तुल्यकालत्वात् समानार्थत्वाच्च[3] विकल्पो भवति। तेन यथैवान्येषु मासेषु विकल्पो भवति एवं प्रोष्ठपद्यामपि विकल्पः स्यात्। स मा भूदिति कृत्वातो नियमार्थः पृथगुपदेशः क्रियते। अन्यथाप्युपपादयितुं शक्यते। आगमात्त्वयं नियम आस्थीयते[4]॥ ११॥

पितृभ्योऽयुक्षु प्रतिष्ठापयेत्॥ १२॥

पितृभ्यो यत् कर्म[5] चोदितं तदयुक्षु कर्तव्यम्[6]। तद्यथा—गन्धमाल्यादीनां सकृद्वा त्रिर्वा पञ्च वा दानमित्येवमाद्युदाहरणम्। गन्धमाल्यादि यत्किंचिद् दीयते उपकल्प्यते च तत् सर्वमयुग् भवति॥ १२॥

नवावरान् भोजयेत्॥ १३॥

पितृभ्यो यत्र दानं चोदितं तत्र नवावरा ब्राह्मणा भोजयितव्याः। तत्रायुक्ष्विति वचनात्[7] ननु[8] नवावराः सिद्धाः। न सिध्यन्ति। अयुजो भोजयितव्या इत्यनियमः[9] प्राप्नोति। तत्रानियमप्राप्तौ[10] नवावरग्रहणं नियमार्थमिष्टकल्पपरिग्रहार्थं च। अपरे पुनर्नवावरग्रहणमन्वष्टक्य एव निवेशयन्ति[11]॥ १३॥

---

[1] अतिदिश्यते—A, C. [2] नियमेन—A, C. [3] समार्थत्वाच्च—A, C.
[4] आश्रीयते—A, C [5] कर्म—omitted in A, C; कार्यं—D.
[6] भवति—added in D. [7] वचनात्—omitted in A, C, D. [8] ननु—omitted in A, C. [9] इति नियमः—A, C. [10] नियमप्राप्तौ—A, C.
[11] अवशेषयन्ति—B.

अयुजो वा ।। १४ ।।

तत्र नवावरा एव प्राप्नुवन्ति । उपरिष्टाच्चायुजः प्रसज्यन्ते । नवावरग्रहणात् । तत्र प्रागपि नवभ्यः कथं स्युरित्येवमर्थमिदमारभ्यते । अशक्तौ तु त्रयः पञ्च सप्त वेत्येतत् सिद्धं भवति ।। १४ ।।

युग्मान् वृद्धिपूर्तेषु ।। १५ ।।

युग्माः समा इत्यर्थः । वृद्धिपूर्तेषु भोजयेत् । वृद्धिपूर्ता इति चाभ्युदयिका उच्यन्ते । कल्याणेष्वित्यर्थः ।। १५ ।।

अयुग्मानितरेषु ।। १६ ।।

इतरेष्वयुग्मान् भोजयेत् । केष्वितरेषु । उक्तेभ्योऽन्येषु एकोद्दिष्टेष्वित्यर्थः । कथं पुनर्बहुवचनम्[1] । एकोद्दिष्टानेकप्रयोगमभिसमीक्ष्य बहुवचनमुपपद्यते[2] । अथवा अविवक्षितं बहुवचनं[3] यथा जातवेदस्यानाम् ।। १६ ।।

प्रदक्षिणमुपचारः ।। १७ ।।

उपचारः प्रदक्षिणं भवति । क्व । एकोद्दिष्टेषु । नेत्युच्यते । वृद्धिपूर्तेषूपचारक्रिया या या सा प्रदक्षिणं भवति । ननु चैकोद्दिष्टाधिकारात् प्रादक्षिण्यं भवति । नेत्युच्यते । न प्रसङ्गः प्रकृतमतिवर्तते । ननु चान्य एव प्रसक्तो मासि मासि चैवमिति । तत्तु न भवति । कस्मात् । अन्वष्टक्यव्यपदेशात् । तेन वृद्धिपूर्तानामेव प्रदक्षिणमुपचार उपपद्यते । एवं सत्ययं किमर्थमारभ्यते । अन्यत्राप्रादक्षिण्यप्रदर्शनार्थः । कुतः पुनस्तदप्रादक्षिण्यं गृहीतव्यम् । शास्त्रान्तराल्लोकतो वा ।। १७ ।।

---

1 कथं पुनरेकोद्दिष्टे बहुवचनप्रयोगः—B. 2 उपदिश्यते—B 3 Two words omitted in A, C.

यवैस्तिलार्थः ।। १८ ।।

यस्तिलार्थःस यवैः कर्तव्य उच्यते । अत्र तिलैरर्थो न कश्चिच्चोदित इति । ब्रवीति । यत्र तिलैरर्थश्चोदितः स विधिरत्र गृहीतव्यः । तत्प्रदर्शनार्थं यवैस्तिलार्थ इत्युपदिश्यते । अत्र पुनः संशयः– यदा यवैरर्थः प्रवर्तते तदा ऊहः कर्तव्यो नेति । भवतीत्ययं[1] कृतान्तः । स तूपपादयितव्यो यत्नतः ।। १८ ।।

इति द्वितीये पञ्चमी कण्डिका

रथमारोक्ष्यन् ।। १ ।।

आरोढुमिच्छन् आरोक्ष्यन् भवति । यदा रथमारोढुमिच्छति तदोत्तरं कर्म करोति यद् वक्ष्यामः । तत्र रथग्रहणेन कस्य ग्रहणं भवति । सोऽयं यथा लोके[2] प्रसिद्धः बहुयुग्यः[3] मण्डलाकृतिः । तत्रारोहणाभ्यावृत्तौ कर्मावृत्तिः । यत्र तु देशान्तरं गच्छति रथेन तत्र तस्माद् देशात् सकृदेवेदं कर्म भवति । तत्र तदर्थत्वादारोहणस्य । अन्तरालेषु तस्य यदारोहण-मवरोहणं च तदर्थप्राप्तम् । अर्थप्राप्ते च न भवति । तत्र त्रयाणामपि वर्णानामयं विधिर्भवति ।। १ ।।

नाना पाणिभ्यां चक्रे अभिमृशेत् । 'अहं ते पूर्वपादावारभे बृहद्रथन्तरे ते चक्रे' ।। २ ।।

अहं ते पूर्वेत्यनेन मन्त्रेण द्वाभ्यां पाणिभ्यां द्वे चक्रे अभिमृशति । स्पृशतीत्येतदुक्तं भवति । अथ नानाग्रहणं किमर्थं क्रियते । कथं दक्षिणेन

---

[1] कर्तव्यो भवति न भवतीत्ययं—A, C, D. [2] यो यो रथो लोके—A, C, D. [3] बहुयुग्युद्धरथः—A.

दक्षिणं सव्येन सव्यमभिमृशेदिति । इतरथा हि पाणिभ्यामित्युपदेशे क्रियमाणे उभाभ्यां पाणिभ्यां द्वे चक्रे अभिमृशतीत्येतदुक्तम् एकैकस्याभिमर्शनं स्यादिति । अतो नानाग्रहणं क्रियते । नैतदस्ति प्रयोजनम् । कस्मात् । द्वयोश्चक्रयोर्द्वाभ्यां पाणिभ्यामभिमर्शनं चोद्यते । तत्रानन्तर्ययोगात् सिद्धम् । तत्रैकैकेन पाणिना एकैकस्य चक्रस्याभिमर्शनं सिद्धम् । सिद्धं चेन्नानाग्रहणमपार्थकम् । तत्रान्यत् प्रयोजनमुपदिशन्ति । कथं चक्रयोर्युगपदभिमर्शनं न स्यादित्येवमर्थं नानाग्रहणं क्रियत इति ।। २ ।।

वामदेव्यमक्ष [1]इत्यक्षाधिष्ठाने ।। ३ ।।

वामदेव्यमित्यनेन मन्त्रेणाक्षाधिष्ठाने अभिमृशति । के पुनस्ते अक्षाधिष्ठाने । नाभ्यौ । तत्रासौ अक्षस्तिष्ठति । तेन तयोर्नाभ्योरभिमर्श उक्तो[2] भवति ।। ३ ।।

दक्षिणपूर्वाभ्यामारोहेत् ।। ४ ।।

दक्षिणः पूर्वो ययोस्ताविमौ दक्षिणपूर्वौ । ताभ्यां दक्षिणपूर्वाभ्याम् । काभ्याम् । पादाभ्यामित्ययमर्थः । ननु च पाण्योरधिकार इत्युच्यते । अधिकृतयोरपि पाण्योः पादयोः संप्रत्ययो भवति । कस्मात् । आरोहणकर्मत्वात् । आरोहणं हि पाणिभ्यां न शक्यते कर्तुम् । सत्यप्यारूढे पाणौ एतावतासौ नारूढो भवति यावत् पादावनारूढाविति । तस्माद् दक्षिणपूर्वाभ्यामिति पादाभ्यामारोहणं विधीयते । तेन दक्षिणं पादं पूर्वं[3] प्रथममारोहयतीत्युक्तं भवति ।। ४ ।।

'वायोष्ट्वा वीर्येणारोहामीन्द्रस्यौजसाधिपत्येन' इति ।। रश्मीन् संमृशेत् ।। ५ ।।

---

[1] इत्यनड्डुहोधिष्ठाने—B. [2] अभिमर्शनमुक्तं—A, C, D.
[3] पूर्वं—omitted in A, C, D; पादं—omitted in B.

वायोष्ट्वा वीर्येत्यनेन मन्त्रेण । रश्मीन् संमृशेत् । रश्मयः के । प्रग्रहा इत्युच्यन्ते । तान् संमृशेत् । उत्तरेण मन्त्रेणाभिमृशेत्[1] ॥ ५ ॥

अरश्मिकान् वा दण्डेन । 'ब्रह्मणो वस्तेजसा संगृह्णामि सत्येन वस्तेजसा संगृह्णामि' इति ॥ ६ ॥

ये अरश्मयोऽश्वाः रश्मयो येषां न सन्ति त इमेऽरश्मिकास्तानभिमृशेत् । केन । दण्डेन । तत्र [2]बहुवचनोपदेशाद् मन्यामहे बहुयुग एवात्र [3]रथोऽभिप्रेत इति । ब्रह्मणो वस्तेजसेत्यनेन मन्त्रेणाभिमृशति ॥ ६ ॥

अभिप्रवर्तमानेषु जपेत् । 'सहस्रसनिं वाजमभिवर्तस्व रथ देव प्रवह', 'वनस्पते वीड्वङ्गो हि भूयाः' (ऋ० सं० ६. ४७. २६) **इति ॥ ७ ॥**

अभिप्रवर्तमानेषु जपेत् सहस्रसनिमित्येतं मन्त्रम् । अभिप्रवर्तन्ते यदा चोदिताः सन्तः अश्वा इष्टं देशमभिगच्छन्ति तदा मन्त्रमिमं जपति । वनस्पते वीड्वङ्गो हि भूया इति च जपति ॥ ७ ॥

एतयान्यान्यपि वानस्पत्यानि ॥ ८ ॥[4]

[5]अन्यान्यपि वानस्पत्यानि संस्पृशेत् । एतयेति किमर्थम् । योगविभागार्थम् । अन्यान्यपि वानस्पत्यानीत्येवमुच्यमाने बृस्यादीनां प्रसङ्गः । एवमतिप्रसङ्गं दृष्ट्वान्यथा सूत्रच्छेदं कुर्वन्ति । एतयान्यान्यपि वानस्पत्यानि । स्थिरौ गावौ भवतां वीडुरक्ष इति रथाङ्गमभिमृशेत् । तत्र

---

1 अभिमृशति—B. 2 बहुवचनोपयोगात्—added in A, C.
3 रथशब्दः—A. C. 4 MSS. read the next *sūtra* alongwith this *sūtra*. 5 From here the portion up to अभिमृशेत् is missing in A, C, D.

वानस्पत्यग्रहणेन शकटानां प्रसङ्गो भवति। तेन रथाङ्गवचनात् बृस्यादीनामप्रसङ्गः। एवं वर्ण्यमाने अनुद्दिष्टाया ऋचः एतयेति निर्देशो नोपपद्यते। अत्राप्येष दोषः। तस्मात् पूर्व एव सूत्रच्छेदः। ननु च तत्रापि बृस्यादीनां प्रसङ्ग इत्येष दोषः। न भविष्यति। कस्मात्। रथाधिकारात्। तेन तज्जातीयान्येवान्यानि वानस्पत्यानि प्रतीयन्ते। तेन शकटादीनामेव प्रसङ्गो भवति। तस्माददोषः॥ ८॥

'स्थिरौ गावौ भवतां वीळुरक्षः' (ऋ० सं० ३. ५३. १७) **इति रथाङ्गमभिमृशेत्॥ ९॥**

रथाङ्गमिति यद्यदङ्गमस्यामृचि दृष्टं तत्तदभिमृशेत्॥ ९॥

'सुत्रामाणं पृथिवीं द्यामनेहसम्' (ऋ० सं० १०. ६३. १०) **इति नावम्॥ १०॥**

सुत्रामाणमित्यनयर्चा नावमारोहेत्। ननु चाभिमृशेदिति वर्तते नेत्युच्यते। प्रासङ्गिकमिदमभिमर्शनम्। आरोहेदित्येतदेवात्र प्राधान्येन वर्तते। न च प्रसङ्गः प्रकृतमतिवर्तते इत्येष हि कृतान्तः॥ १०॥

नवरथेन यशस्विनं वृक्षं ह्रदं वाविदासिनं प्रदक्षिणं कृत्वा फलवतीः शाखा आहरेत्॥ ११॥

नवरथऽयं विशेषः। अनुपयुक्तो रथो नवरथ इत्युच्यते। तेन यशस्विनं वृक्षम्। प्रकाशो यः स यशस्वीत्युच्यते। तं यशस्विनम्। ह्रदं वा अविदासिनम्। अविशोष्यविदासीत्युच्यते।[1]तं वा प्रदक्षिणं कृत्वा फलवतीः शाखा आहरेत्। फलवत्यो याः शाखास्ता आहरति। आनयेत्। या गृहोपयोग्याः शाखास्ता आहरेत्॥ ११॥

---

[1] तं यशस्विनं ... up to उच्यते is omitted in B.

अन्यद्वा कौटुम्बम् ।। १२ ।।

अन्यद्वा द्रव्यं[1] कुटुम्बार्थमाहरेत् यदुपकारं कुटुम्बे गच्छति । तत्रानियमो द्रव्याणाम् । अर्थप्रसिद्धं त्वाहरति ।। १२ ।।

संसदमुपयायात् ।। १३ ।।

तत्रैके रथारोहणशेषमिदं मन्यन्ते । संसदिति गृह उच्यते । तमागच्छेदित्युक्तं भवति ।। १३ ।।

आगतः सन् किं करोति—

'अस्माकमुत्तमं कृधि' (ऋ० सं० ४. ३१. १५) **इत्यादित्यमीक्षमाणो जपित्वावरोहेत् ।। १४ ।।**

अस्माकमुत्तमं कृधीत्येतामृचं जपित्वा आदित्यमीक्षमाणोऽवरोहेत् । नवाद् रथाद् अवरोहति ।। १४ ।।

'ऋषभं मा समानानाम्' (ऋ० सं० १०. १६१. १) **इत्यभिक्रामन् ।। १५ ।।**

ऋषभमित्येतं मन्त्रं जपित्वाभिक्रामति । प्रतिपद्यते गृहान् । अन्ये तु नैवम् । रथारोहणकर्म वृक्षशाखाहरणान्तं भवतीत्युपदिशन्ति । इदं तु कर्मान्तरम् । तत्र संसदित्यधिकरणमुच्यते । व्यवहारार्थी यः संसदमागच्छति स 'अस्माकमुत्तमम्' इत्येतामृचं जपित्वा आदित्यमीक्षमाणोऽवरोहेत् । अवरोहेदिति प्रतिपद्येतेत्यर्थः । अन्यत्राप्येतस्मिन्नर्थे दृष्टम् । तद्यथा—'सदा सुगः पितुमां अस्तु पन्था इति पन्थानमवरुह्य' (आ. श्रौ. २. ५. ६) इत्यत्र प्रपद्येत्यर्थः । तस्मादिहाप्येतस्मिन्नर्थे भवति ।

[1] अन्नाद्यं—A, C.

तस्माददोषः । 'ऋषभं मेत्यभिक्रामन्'—प्रत्यर्थिनं प्रति यदा अभिक्रामति तदा जपति ॥ १५ ॥

'वयमद्येन्द्रस्य प्रेष्ठाः' (ऋ० सं० १. १६७. १०) **इत्यस्तं यात्यादित्ये ॥ १६ ॥**

वयमद्येत्येतं मन्त्रं जपति आदित्य अस्तं याति आ व्यवहारपरिसमाप्तेः ॥ १६ ॥

'तद्वो दिवो दुहितरो विभातीः' (ऋ० सं० ४. ५१. ११) **इति व्युष्टायाम् ॥ १७ ॥**

तद्वो दिव इत्येतामृचं जपति व्युष्टायाम् । आ व्यवहारसमाप्तेरेव । अन्ये तु संध्योपासनमुपदिष्टं मन्यन्ते सायं प्रातश्चेति । अस्माकं तूपाध्याया नैवमुपदिशन्ति ॥ १७ ॥

इति द्वितीये षष्ठी कण्डिका

अथातो वास्तुपरीक्षा ॥ १ ॥

अथशब्दोऽधिकारार्थः । अतः अस्मात् संसदुपगमनादूर्ध्वम् । अथवा अतःशब्दो हेतूपदेशार्थः । अतः अस्मात् कारणात् यस्मात् तन्निमित्ते समृद्धिव्यृद्धी अतो वास्तुनः परीक्षा वर्तिष्यते । वास्त्विवति गृहमुच्यते । उत्तरत्र यानि लक्षणानि वक्ष्यन्ते तैः संपन्नं वास्तु कर्तव्यमिति ॥ १ ॥

कानि पुनस्तानि—

अनूषरमविवदिष्णु भूम ॥ २ ॥

अनूषरम् ऊषरं यत्र नास्ति तद्वास्तु समृद्धं भवति । विवदनशीलं विवदिष्णु । न विवदिष्णु अविवदिष्णु तत् । भूमशब्दोऽयं भूमिशब्दस्य स्थाने

द्रष्टव्यः । अन्यत्राप्ययमस्मिन्नर्थे दृष्टः । यथा 'यवं न वृष्टिर्व्युनत्ति भूम' (ऋ० सं० ५. ८५. ३) इति । भूमिमित्यर्थः । तदिदमविवदिष्णु भूम वास्तु समृद्धं भवति ।। २ ।।

ओषधिवनस्पतिवत् ।। ३ ।।

ओषधयश्च वनस्पतयश्च यस्मिन् [1]भवन्ति तदिदमोषधिवनस्पतिवत् । ओषधिवनस्पतिमदिति प्राप्ते छान्दसोऽयं प्रयोगो द्रष्टव्यः । तद्वास्तु समृद्धं भवति ।। ३ ।।

यस्मिन् कुशवीरणं[2] प्रभूतम् ।। ४ ।।

यस्मिन् वास्तुनि कुशवीरणं[3] प्रभूतं भवति । [4]वीरणमित्युशीरमित्यर्थः । तद्वास्तु समृद्धं भवति ।। ४ ।।

कण्टकिक्षीरिणस्तु समूलान् परिखायोद्वासयेत् ।। ५ ।।

कण्टकिनः क्षीरिणश्च ये वृक्षास्तान् सह मूलैः[5] परिखायोद्वासयेत् । अपनयेदित्यर्थः । परि सर्वतः खात्वा । अत्र संशयः—किमयं कर्मधारयः समासः आहोस्विद् द्वन्द्व[6] इति । किंचातः । यदि तावत् कर्मधारयः ये पुनः कण्टकिनो वृक्षाः क्षीरिणः तेषामुत्सादनम्[7] । के पुनस्ते । स्नुहिकण्टकादयः । अथ पुनर्द्वन्द्वः कण्टकिनः क्षीरिणश्चेत्यनेनार्थेन भवितव्यम् । तत्र वटोदुम्बरादीनां सक्षीराणामुत्सादनं कण्टकिनां[8] खदिरखर्जूरादीनाम्[9] । द्वन्द्वोऽयं समास इति प्रतिज्ञा । कथं ज्ञायते ।

---

[1] संभवन्ति—A, C, D. [2,3] वीरिणं—A, C, D. B reads बीरिणं in all the three places. [4] वीरिणं—A, C, D. [5] समूलान्—added in A, C, D. [6] द्वन्द्वसमासः—A, C. [7] परिखायोत्सादनम्—A, C. [8] Omitted in A, C, D. [9] बिल्वादीनाम्—B.

सूत्रविन्यासात् । यदि कर्मधारयः समासः स्यात् कण्टकक्षीरिण इत्युपदिशेत् । तेन ज्ञायते द्वन्द्वः समास इति ॥ ५ ॥

अपामार्गः शाकस्तिल्वकः परिव्याध इति चैतानि ॥ ६ ॥

अपामार्गादयश्च परिखायोत्सादयितव्याः[1] । किमर्थं विलक्षण-निर्देशः क्रियते । पुंलिङ्गेन निर्देशः[2] कर्तव्यः । कस्मात् । अपामार्गादीनां पुंलिङ्गत्वात् । एवं प्राप्ते यन्नपुंसकेन निर्देशं[3] करोति तज्ज्ञापयति—अन्यान्यप्येवंप्रकाराणि शास्त्रान्तरदृष्टान्युद्वासयितव्यानि ॥ ६ ॥

यत्र सर्वत आपो मध्यं समेत्य प्रदक्षिणं शयनीयं परीत्य प्राच्यः स्यन्देरन्नप्रपतत्यस्तत्[4] सर्वसमृद्धम्[5] ॥ ७ ॥

यत्र यस्मिन् देशे आपो मध्यं समागच्छन्ति[6] । समेत्य च प्रदक्षिणं शयनीयं परियन्ति । परीत्य च प्राच्यः स्यन्देरन्निति । प्राच्यां दिशि गच्छेरन् । अप्रपतत्यः[7] न प्रपतन्त्यः अप्रपतन्त्य इति प्राप्ते । एवं ब्रुवता किं प्रदर्शितं[8] भवति । मध्यतो निम्नं प्राक्प्रवणं शयनीयं प्राच्यां दिशि गृहिणो भवति चेत् तत् सर्वसमृद्धमिति प्रदर्शितं भवति । तदेवंलक्षणं वास्तु समृद्धं भवति । सर्वाः समृद्धयस्तत्र भवन्तीति ॥ ७ ॥

समवस्रवे भक्तशरणं कारयेत् ॥ ८ ॥

तत्र समवस्रव इति क उच्यते । येन पथा आपः प्रस्रवन्ति स देशः समवस्रव इत्युच्यते । प्राच्यां दिशीत्येतदुक्तं भवति । तस्मिन् देशे भक्तशरणं कारयेत् ॥ ८ ॥

---

[1] उद्वासयितव्यः—B. [2] पुंलिङ्गनिर्देशः—A, C. [3] नपुंसकनिर्देशं—A, C. [4] अप्रवदत्यः—A, C; अप्रवरं प्रतत्यः—B. [5] सर्वं समृद्धम्—A, C. [6] समागच्छन्त्यः—A, C. [7] अप्रपत्यः—A, C. [8] प्रयोजनं—B.

ननु च[1] सर्वेषां प्राग्दक्षिणस्यां दिशि भक्तशरणं भवतीत्येतद् दृष्टम्[2]। एवं दृष्ट्वात आचार्यः स्तुतिं प्रयुङ्क्ते—

बह्वन्नं भवति[3] ॥ ९ ॥

एतस्मिन् प्रदेशे[4] क्रियमाणं बह्वन्नं भवति । ऋद्धिमद् भवतीत्येतदुक्तं भवति ॥ ९ ॥

दक्षिणाप्रवणे सभां मापयेत् । साद्यूता ह[5] भवति ॥ १० ॥

दक्षिणाप्रवणे देशे सभा मापयितव्या । अथ कस्यां दिशि मापयितव्या । उदीच्याम् । तस्यां दिशि क्रियमाणायां दक्षिणाप्रवणो देशः संपद्यते । तस्मादुदीच्यां दिशि कर्तव्या । एतस्मिन् देशे क्रियमाणा अद्यूता भवति । द्यूतं न भवतीत्येष[6] गुणः संपद्यते ॥ १० ॥

युवानस्तस्यां कितवाः कलहिनः प्रमायुका भवन्ति ॥ ११ ॥

तस्यां सभायामेते दोषा भवन्ति—युवानः सन्तः प्रमायुका भवन्ति । कितवाश्च कलहिनश्च भवन्ति । तत्र कितवत्वं नोपपद्यते । कस्मात् । अद्यूतेति[7] द्यूतप्रतिषेधात् सभायाः । उच्यते । नायं कितवशब्दो द्यूते वर्तते । क्व तर्हि । [8]दम्भिकाकृतिकेषु । दम्भिनो भवन्ति अकृतिकाश्चेत्येतदुक्तं भवति । दोषबहुत्वान्नैषा सभा कर्तव्या । विधाय[9] प्रतिषेधः कस्मात् । शास्त्रान्तरे विहितत्वात् ॥ ११ ॥

---

[1] ननु च—Omitted in A, C. [2] भवति—added in A. C, D.
[3] भवतीति—B. [4] देशे—A, C, D. [5] ह—omitted in B.
[6] एवं—A, C, D. [7] Omitted in A,C. [8] Corrupt in A, C, D.
[9] विधायक°—A, C, D.

यत्र सर्वत आपः प्रस्यन्देरन् सा स्वस्त्ययन्यद्यूता च ।। १२ ।

यत्र यस्मिन् देशे[1] सर्वतः आपः सर्वासु दिक्षु आपः प्रस्यन्देरन्, [2]आगच्छेरन्नित्यर्थः । तत्र सभा कर्तव्या । कस्मिन् देशे । मध्ये वास्तुनः । तत्र ह्यापः संगच्छन्ते[3] । तस्मादेतस्मिन् देशे मीयते[4] । सा स्वस्त्ययनी भवति अद्यूता च । तस्मादेतस्मिन् देशे सभा कर्तव्या । एवं कृता सती गुणसंपन्ना[5] भवति ।। १२ ।।

इति द्वितीये सप्तमी कण्डिका

अथैतैर्वास्तु परीक्षेत ।। १ ।।

अथ एतैरुत्तरैर्लक्षणैः वास्तु परीक्षेत । अथशब्दो विशेषप्रक्रियार्थः । कथमेतानि लक्षणानि विशिष्टानि स्युरिति । बलाबलत्वे कथमुत्तरेषां बलीयस्त्वं स्यादिति । वास्त्वधिकारे पुनर्वास्तुग्रहणं किमर्थम् । सभानिवृत्त्यर्थम् । अन्यथा हि सभायां क्रियमाणायामेतैर्लक्षणैः परीक्षणं क्रियेत तस्माद् वास्तुग्रहणं कर्तव्यम् ।। १ ।।

जानुमात्रं गर्तं खात्वा[6] तैरेव पांसुभिः प्रतिपूरयेत्[7] ।। २ ।।

जानुमात्रं जानुप्रमाणं गर्तं खातयेत्[8] । गर्तमित्यवटमुच्यते । तं खात्वा तैरेव पांसुभिः तत उद्धृताभिः प्रतिपूरयेत्[9] ।। २ ।।

अधिके प्रशस्तम् ।। ३ ।।

अधिके तस्मिन् पांशुराशौ प्रशस्तं वास्तु भवति । ऋद्धिमद् भवतीत्युच्यते ।। ३ ।।

---

[1] प्रदेशे—B. [2] गच्छेरन्—A, C, D. [3] संगच्छन्ति—A, C, D.
[4] विधीयते—B. [5] गुणसंपादना—B. [6] कृत्वा—D. [7] प्रपूरयेत्—D.
[8] खात्वा—A, C, D. [9] परिपूरयेत्—A. C.

समे वार्त्तम् ॥ ४ ॥

यदासौ समो भवति तदा तस्मिन् समे वार्त्तं वास्तु भवति । [1]वृत्तिमदित्युक्तं भवति ॥ ४ ॥

न्यूने गर्हितम् ॥ ५ ॥

न्यूने तस्मिन् स्थाने गर्हितं भवति । कुत्सितं वास्तु भवतीति । तत्र न कर्तव्यम् ॥ ५ ॥ ।

अस्तमितेऽपां सुपर्णं[2] परिवासयेत् ॥ ६ ॥

अस्तमित आदित्ये अपां पूरयति । तच्च तत्र परिवासयति । परिपूरयित्वा तां रात्रिं वासयति ॥ ६ ॥

सोदके प्रशस्तम् ॥ ७ ॥

सोदके तस्मिन् खाते प्रशस्तं वास्तु भवति ॥ ७ ॥

आर्द्रे वार्त्तम् ॥ ८ ॥

तस्मिन् खाते आर्द्रे वार्त्तं वास्तु भवति ॥ ८ ॥

शुष्के गर्हितम् ॥ ९ ॥

शुष्के खाते गर्हितं वास्तु भवति ॥ ९ ॥

श्वेतं मधुरास्वादं सिकतोत्तरं ब्राह्मणस्य ॥ १० ॥

श्वेतं वास्तु मधुरास्वादं सिकतोत्तरं सिकताबहुलम् एतैर्लक्षणैः संयुक्तं ब्राह्मणस्य वास्तु भवति । ब्राह्मणग्रहणमुत्तरविवक्षया ॥ १० ॥

---

[1] प्रवृत्तम्—A, C. [2] पूर्णं—B, D.

लोहितं क्षत्रियस्य ।। ११ ।।

लोहितं मधुरास्वादं सिकतोत्तरं च वास्तु क्षत्रियस्य ।। ११ ।।

पीतं वैश्यस्य ।। १२ ।।

वैश्यस्य वास्तु पीतं मधुरास्वादं सिकतोत्तरं भवति ।। १२ ।।

तत् सहस्रसीतं कृत्वा यथादिक्समचतुरश्रं मापयेत्।। १३ ।।

तद्वास्तु सहस्रसीतं करोति । अपरिमितमित्यर्थः । अयं सहस्रशब्दो बह्वर्थे वर्तते अपरिमाणत्वे च । यथादिक्समचतुरश्रं सर्वासु दिक्षु समं मापयेत्[1] ।। १३ ।।

आयतचतुरश्रं वा ।। १४ ।।

वास्तु मापयेत् ।। १४ ।।

तच्छमीशाखयोदुम्बरशाखया च[2] शन्तातीयेन त्रिः प्रदक्षिणं परिव्रजन् प्रोक्षति ।। १५ ।।

तद्वास्तु शमीशाखयोदुम्बरशाखया च शन्तातीयेन सूक्तेन त्रिः प्रदक्षिणम् । तत्र कतमच्छन्तातीयं सूक्तम् । यत्र शन्तातीयशब्दोऽस्ति । क्वचास्ति । ईळेद्यावीये[3] (ऋ. सं. १. ११२), 'इदंह नूनमेषाम्' (ऋ० सं० ८. १८) इत्यत्र, 'उत देवा अवहितम्' (ऋ० सं० १०. १३७)इत्यत्र । एतेषु त्रिष्वयं शन्तातीयशब्दोऽस्ति । अत्र तु शंन इन्द्राग्नीयमुपदिशन्ति । कस्मात् । प्रसिद्धत्वात् । तेन शन्तातीयेन त्रिः परिव्रजन् प्रोक्षति । तत्र संशयः । किं शन्तातीयं परिव्रजने उपदिश्यते[4] आहोस्वित्[5] प्रोक्षण इति ।

---

1 समापयेत्—D. 2 वा—A, C. 3 तावत्—added in B, D.
4 उद्दिश्यते—B. 5 उत—A, C.

उच्यते । परिव्रजने । कस्मात् । अनन्तरत्वात् । तेन परिव्रजनाभ्यावृत्तौ मन्त्रावृत्तिः । तद्गुणत्वात् ॥ १५ ॥

अविच्छिन्नया चोदकधारया 'आपो हि ष्ठा मयोभुवः' (ऋ० सं० १०. ६. १) इति तृचेन ॥ १६ ॥

अविच्छिन्नया चोदकधारया आपो हि ष्ठा मयोभुव इति तृचेन पर्येति । तेन परिव्रजनाभ्यावृतौ प्रोक्षणमभ्यावर्तते ॥ १६ ॥

वंशान्तरेषु शरणानि कारयेत् ॥ १७ ॥

वंशान्तरेष्वित्यत्र बहुधा विप्रतिपन्नाः । तेषु अन्तरालेषु[1] शरणानि कारयेत् । तत्र द्वयोर्वंशयोर्यदन्तरालं[2] तत्र शरणानि कर्तव्यानि । अन्ये पुनर्वंशान्तर एव शरणान्युपदिशन्ति । स्थानानि कर्तव्यानीत्यर्थः ॥ १७ ॥

[3]गर्तेष्ववकाः [4]शीपालमित्यवधापयेत् ॥ १८ ॥

गर्तेषु अवटेषु अवकाः [4]शीपालमित्यवधापयेत् । निदध्यात् ॥ १८ ॥

किं कारणम्—

न ह्रास्याग्निर्दाहको[5] भवतीति विज्ञायते ॥ १९ ॥

अस्यैवंकुर्वतोऽग्निर्दाहको न भवति ॥ १९ ॥

मध्यमस्थूणाया गर्तेऽवधाय प्रागग्रोदगग्रान् कुशानास्तीर्य व्रीहियवमतीरप आसेचयेत् 'अच्युताय भौमाय स्वाहा' इति ॥ २० ॥

---

[1] अन्तरेषु—D. [2] अन्तरा—A, C. [3] D reads कर्त for गर्त everywhere. [4] शीफालम्—D. [5] दाहुको—B.

मध्यमस्थूणायाः गर्ते अवटे अवधाय । पुनरवधायेति कस्मात् । उच्यते । यदि नोच्यते अनेन विशेषविधिना बाध्येत । तत् पुनरवधायग्रहणं क्रियते । प्रागग्रोदगग्रान् कुशानास्तृणाति । आस्तीर्य व्रीहियवमतीः अपः आसेचते निषिञ्चति अच्युतायेत्यनेन मन्त्रेण ।। २० ।।

अथैनामुच्छ्रियमाणामनुमन्त्रयेत--

'इहैव तिष्ठ निमिता तिल्वलास्तामिरावतीम् ।
मध्ये पोषस्य तिष्ठन्तीमा त्वा प्रापन्नघायवः ।।

आ त्वा कुमारस्तरुण आ वत्सो जायतां सह ।
आ त्वा परिश्रितः कुम्भ आ दध्नः कलशैरयन् ।।'

इति ।। २१ ।।

अस्मिन्नवटेऽवधाय यदा उच्छ्रीयते स्थूणा तामनुमन्त्रयेत इहैव तिष्ठेत्येताभ्यामृग्भ्याम् ।। २१ ।।

इति द्वितीये अष्टमी कण्डिका

वंशमाधीयमानम्--'ऋतेन स्थूणामधिरोह वंश द्राघीय आयुः प्रतरं दधानः' (अ० सं० ३. १२. ६) **। इति ।। १ ।।**

वंशमाधीयमानमनुमन्त्रयेत । स्थूणायां निधीयमानं स्थाप्यमानम् । ऋतेनेत्यनेन मन्त्रेण ।। १ ।।

सदूर्वासु चतसृषु शिलासु मणिकं प्रतिष्ठापयेत्-- 'पृथिव्या अधि संभव' इति ।। २ ।।

सह दूर्वया सदूर्वास्तासु चतसृषु शिलासु मणिकं प्रतिष्ठापयन्ति पृथिव्या इत्यनेन मन्त्रेण ।। २ ।।

'अरङ्गरो वावदीति त्रेधा बद्धो वरत्रया ।
इरामु ह प्रशंसत्यनिरामपबाधताम् ॥'

(अ० सं० २०. १३५. १३)

इति वा ॥ ३ ॥

अथवा अरङ्गरो वावदीतीत्यनेन मन्त्रेण प्रतिष्ठापयति । तत्र द्वयोर्मन्त्रयोर्विकल्पः ॥ ३ ॥

अथास्मिन्नप आसेचयेत्—

'एतु राजा वरुणो रेवतीभि-
रस्मिंत्स्थाने तिष्ठतु मोदमानः ।
इरां वहन्तो घृतमुक्षमाणा
मित्रेण साकं सह संविशन्तु ॥'

इति ॥ ४ ॥

अस्मिन् मणिक अप आसेचयन्ति एतु राजेत्यनेन मन्त्रेण ॥ ४ ॥

अथैनच्छमयति ॥ ५ ॥

एनदिति-किं निर्दिश्यते । अनन्तरत्वान्मणिकः ॥ तत्र मणिके प्रतीयमाने लिङ्गं नोपपद्यते । कुतः । पुंलिङ्गत्वान्मणिकस्य । तेन वास्तु प्रतीयते । एतद्वास्तु शमयति ॥ ५ ॥

कथम्—

व्रीहियवमतीभिरद्भिर्हिरण्यमवधाय शन्तातीयेन त्रिः प्रदक्षिणं परिव्रजन् प्रोक्षति ॥ ६ ॥

अत्र विचारः पुरस्तादुक्तो भवति[1] ॥ ६ ॥

अविच्छिन्नया चोदकधारया 'आपो हि ष्ठा मयोभुवः' (ऋ० सं० १०. ६. १) इति तृचेन ॥ ७ ॥

अविच्छिन्नयेत्येतदप्युक्तं भवति ॥ ७ ॥

मध्येऽगारस्य स्थालीपाकं श्रपयित्वा 'वास्तोष्पते प्रति जानीह्यस्मान्' (ऋ० सं० ७. ५४. १) इति चतसृभिः प्रत्यृचं हुत्वान्नं संस्कृत्य ब्राह्मणान् भोजयित्वा 'शिवं वास्तु शिवं वास्तु' इति वाचयीत ॥ ८ ॥

अगारस्य मध्ये स्थालीपाकं श्रपयति । श्रपणग्रहणं न कर्तव्यम् । कस्मात् । तन्त्रप्राप्तत्वात् । ब्रवीति । नियमार्थं क्रियते । कथम् । प्राक् स्थालीपाकान्नान्यदेतस्मिन्नगारे किंचिच्छ्रप्य इति । एवं स्थालीपाकं श्रपयित्वा प्रथमं वास्तोष्पते इति चतसृभिः ऋग्भिः प्रत्यृचं जुहोति । हुत्वा ब्राह्मणान् भोजयति । भोजयित्वा 'शिवं वास्तु शिवं वास्तु' इति वाचयीत ॥ ८ ॥

इति द्वितीये नवमी कण्डिका

उक्तं गृहप्रपदनम् ॥ १ ॥

उक्तं गृहप्रपदनम् । क्वोक्तम् । 'प्रपद्येत गृहान्' (आ० श्रौ० २. ५. १७) इत्येवमादिषु[2] । तत्र तु वर्णयन्ति नेदमत्र गृहप्रपदनं भवतीति । किं पुनर्गृहप्रपदनमिति । यदिदं मणिकप्रतिष्ठापनादि एतदुक्तं गृहप्रपदनं

---

[1] Omitted in B. [2] इति—A, C; एवमादि—D.

भवतीति । तेन किं सिद्धं भवति । कृतसंस्कारेऽपि[1] गृहे प्रपद्यमानस्यैतत् कर्म साधितं भवतीति ।। १ ।।

बीजवतो गृहान् प्रपद्येत ।। २ ।।

गृहान् बीजवतः प्रपद्येत । पूर्वं बीजानि स्थापयित्वा पश्चात् प्रपद्येत । प्रविशेदित्यर्थः ।। २ ।।

क्षेत्रं प्रकर्षयेदुत्तरैः प्रोष्ठपदैः फल्गुनीभी रोहिण्या वा ।। ३ ।।

क्षेत्रं कृष्टुं प्रारभेत उत्तरैः प्रोष्ठपदैः फल्गुनीभिर्वा रोहिण्या वा । एतेषामन्यतमेन नक्षत्रेण प्रारम्भं कुर्यात् ।। ३ ।।

क्षेत्रस्यानुवातं 'क्षेत्रस्य पतिना वयम्' (ऋ० सं० ४. ५७. १.) **इति प्रत्यृचं जुहुयाज्जपेद्वा ।। ४ ।।**

क्षेत्रस्यानुवातं गत्वा क्षेत्रस्य पतिना वयमिति प्रत्यृचं जुहुयादथवा जपेत् । तेन जपहोमयोर्विकल्पः ।। ४ ।।

गाः प्रतिष्ठमाना अनुमन्त्रयेत 'मयोभूर्वातो अभिवातूस्राः' (ऋ० सं० १०. १६९. १) **इति द्वाभ्याम् ।। ५ ।।**

गावः प्रतिष्ठमानाः प्रगच्छमाना अनुमन्त्रयितव्याः मयोभूर्वात इति द्वाभ्यामृग्भ्याम् ।। ५ ।।

आयतीः—

'यासामूधश्चतुर्बिलं मधोः पूर्णं घृतस्य च ।
ता नः सन्तु पयस्वतीर्बह्वीर्गोष्ठे घृताच्यः ।।'

---

[1] कृतेऽपि संस्कारे—B.

'उप मैतु मयोभुव ऊर्जं चौजश्च बिभ्रतीः ।
दुहाना अक्षितं पयो मयि गोष्ठे निविशध्वं यथा
भवाम्युत्तमः' ॥ ६ ॥

ताः आयतीर्गाः अनुमन्त्रयेत यासामूध इत्यनेन मन्त्रेण ॥ ६ ॥

'या देवेषु तन्वामैरयन्त' (ऋ० सं० १०. १६९. ३) **इति च सूक्तशेषम् ॥ ७ ॥**

आगावीयमेके ॥ ८ ॥

एके आचार्याः आगावीयमिच्छन्ति गवामनुमन्त्रणे आयतीनाम् । 'आ गावो अग्मन्' (ऋ० सं० ६. २८. १) इत्येतत् सूक्तम् ॥ ८ ॥

गणानासामुपतिष्ठेतागुरुगवीनाम् ॥ ९ ॥

आसां गवां[1] गणानुपतिष्ठेत । गणाः संघा[2] इत्येतदुक्तं भवति । किं सर्व एवोपस्थेया गणा गवाम् । नेत्युच्यते । अगुरुगवीनां ये गणास्तानुपतिष्ठेत । अत्र गुरुगवीप्रतिषेधात् परगवीनामेतदुपस्थानं भवति ॥ ९ ॥

तत्र त्वयं मन्त्र उपदिश्यते । अनेनोपस्थानं कर्तव्यम्—

'भूताः स्थ प्रशस्ताः स्थ शोभनाः प्रियाः प्रियो वो भूयासं शं मयि जानीध्वं शं मयि जानीध्वम्' ॥ १० ॥

इत्यनेन मन्त्रेण[3] ॥ १० ॥

इति द्वितीये दशमी कण्डिका

[4]इति देवस्वामिविरचित आश्वलायनगृह्यभाष्ये द्वितीयोऽध्यायः

---

[1] गवां—omitted in A, C. [2] संघाताः—A, C. [3] Omitted in A, C, D. [4] इति गृह्यव्याख्याने द्वितीयोऽध्यायः—D; इत्याश्वलायनगृह्यव्याख्यायां द्वितीयोऽध्यायः—B.

तृतीयोऽध्यायः

अथातः पञ्चयज्ञाः ।। १ ।।

अत ऊर्ध्वं पञ्चयज्ञा वक्ष्यन्ते । अथशब्दोऽधिकारार्थः । अतःशब्दो हेतुव्यपदेशार्थः[1] । अतः अस्मात्[2] कारणात् पञ्चयज्ञा वक्ष्यन्ते यस्मादेतैर्निःश्रेयसावाप्तिर्भवति । अथोपदेशादेव पञ्चत्वे सिद्धे किमर्थं पञ्चयज्ञग्रहणं क्रियते[3] । संज्ञाशब्दोऽयम् । यथा सप्तर्षय इति ।। १ ।।

के पुनस्ते पञ्चयज्ञाः । तत्राह—

देवयज्ञो भूतयज्ञः पितृयज्ञो ब्रह्मयज्ञो मनुष्ययज्ञ इति ।।२ ।।

य एते पञ्चयज्ञाः पूर्वसूत्रे[4] उपदिष्टाः । अथ किंलक्षणास्ते । तदाचष्टे[5]—

तद्यदग्नौ जुहोति स देवयज्ञः ।। ३ ।।

स एष देवयज्ञो नाम वेदितव्यः । यस्तेषां पञ्चानां यज्ञानां यदग्नौ हूयते स देवयज्ञः । किमेते इह विधीयन्ते आहोस्विदनुवाद इति । उच्यते । अनुवादः । कस्मात् । तद्यच्छब्दोपदेशाद् यदिह प्रसिद्धं हवनं तद् गृह्यते । किं च तत्[6] । 'सिद्धस्य हविष्यस्य जुहुयात्' (१. २. १) इत्येवं प्रसिद्धानां[7] पञ्चानां निर्देश इति । एवमेके । अन्ये तु विधीनेवैतान्[8] मन्यन्ते । वाक्याध्याहारेण कल्पनां कुर्वन्ति । कथम् । तद्यदग्नौ जुहोति स दैवयज्ञः कर्तव्य

---

[1] हेत्वपदेशार्थः—B. [2] तस्मात्—A, C, D. [3] पञ्चयज्ञा इत्युच्यन्ते—B, D. [4] पूर्वत्र—D. [5] Omitted in A, C. [6] Omitted in D. [7] सिद्धानां—A, C. [8] एव—omitted in A, C.

इति । तस्मादग्नौ होतव्यमिति । यद्यप्यस्य विधित्वं नोपपद्यते अध्याहार्यत्वाद् वाक्यस्य । तथाप्युत्तरेण वाक्येन कल्प्यते । 'तानेतान् यज्ञानहरहः कुर्वीत' इति (३. १. ८) । अनुवादत्वे सति वचनमिदमपार्थकं स्यात् । कस्मात् । अहरहःक्रिया प्रसिद्धेति । वैश्वदेवस्य तावदन्नसंस्कारत्वादहरहःक्रिया प्रसिद्धा । बलिहरणादीनां च तत्संबन्धात् । ब्रह्मयज्ञे च दर्शयति 'तस्य द्वावनध्यायौ' इति (३. ४. ६) । तेन विधय एवैते । तथापि विधित्वं नोपपद्यते । कस्मात् । द्रव्यदेवतानुपदेशात् । नापि द्रव्यमुपदिश्यते होमार्थे नापि देवता यस्यै हूयते । ननु च देवता उपदिष्टाः 'अग्निरिन्द्रः' (१. ३. ८) इत्येवमाद्याः । एवं ते ब्रुवतो ऽनादिष्टेन द्रव्येण होमः प्रसज्येत । किंच तत् । आज्यम् । न चैवं कर्म क्रियते । तस्मान्नैते विधय इति । अनुवादा एवैते । ननु चानुवादत्वे सति 'तानेतान् यज्ञानहरहः कुर्वीत' (३. १. ८) इति [1]वचनमतिरिच्यते । नेत्युच्यते । तत्रान्यत् प्रयोजनं वक्ष्यते । तेनानुवादत्वं सिद्धम्[2] ।। ३ ।।

यद् बलिं करोति स भूतयज्ञः ।। ४ ।।

वैश्वदेवे यद् बलिहरणमाम्नातं तदिदं निर्दिश्यते ।। ४ ।।

यत् पितृभ्यो ददाति स पितृयज्ञः ।। ५ ।।

'स्वधा पितृभ्यः' (१. २. ६) इति यच्छेषनिनयनमाम्नातं स पितृयज्ञो भवति ।। ५ ।।

[3]यत् स्वाध्यायमधीते स ब्रह्मयज्ञः ।। ६ ।।

यदिदमध्ययनं वक्ष्यते तदनेन विधिना कर्तव्यमिति सावित्र्यादितर्पणान्तं स ब्रह्मयज्ञ इति वेदितव्यः[4] ।। ६ ।।

---

[1] सूत्रम्—A. C. [2] This passage omitted in A. C.
[3] This *sūtra* and comm. thereon are written before the *sūtra* 5 in MSS. [4] इति वेदितव्यः omitted in A. C.

यन्मनुष्येभ्यो ददाति स मनुष्ययज्ञः ॥ ७ ॥

तत्र प्रसिद्धवच्चोदना नोपपद्यते । [1]मनुष्यदानस्याचोदितत्वात् । उच्यते । चोदितम् । क्व । स्मृतौ । किमिति चोदना । 'ततोऽतिथीन् भोजयेत्' (वासिष्ठधर्मसू० ११. ६) इत्युक्तम् । अवश्यं चैतदेवमभ्युपगन्तव्यम् । इतरथा हि[2] मनुष्यदानं द्विः[3] प्रसज्येत । तच्चेदं च । तस्मात् तदेवाभ्युपगन्तव्यं मनुष्यदानम् ॥ ७ ॥

तानेतान् यज्ञानहरहः कुर्वीत ॥ ८ ॥

एतेषां यज्ञानामहरहः क्रिया चोद्यते । सा न चोदयितव्या । कस्मात् । सिद्धत्वात् । तदुक्तमनारम्भे कारणम् । उच्यते । आरब्धव्यम् । किं कारणम् । प्रतिषेधविषयेऽपि प्राप्त्यर्थम् । उत्तरत्र 'द्वादशरात्रं वा महागुरुषु दानाध्ययने वर्जयेरन्' (४. ४. १५) इति । तत्र सामान्येन दानाध्ययनप्रतिषेधः । स इहापि प्राप्नोति । [4]तत्रापि कथं[5] स्यादित्येवमर्थमहरहर्ग्रहणं क्रियते । कथं दानं तत्रापि प्रसज्येतेति ब्रवीति । एवमपि ब्रुवतो दोषः । ब्रह्मयज्ञस्याप्यहरहः क्रिया प्राप्नोति । न भविष्यति । कस्मात् । प्रतिषिद्धत्वात् । वक्ष्यति 'तस्य द्वावनध्यायौ' (३. ४. ९) इति । एवमपि मनुष्यदानं प्रसज्येत । तदपि न भविष्यति[6] । किं कारणम् । भोक्तृप्रतिगृहीत्रोरभावात् । तेनार्थात् त्रयाणां यज्ञानामहरहः क्रिया प्राप्नोति । देवयज्ञो भूतयज्ञः पितृयज्ञ इत्येतेषाम् । तस्मादारब्धव्यमिदं सूत्रम् ॥ ८ ॥

इति तृतीये प्रथमा कण्डिका

अथ स्वाध्यायविधिः ॥ १ ॥

अथ स्वाध्यायविधिर्वक्ष्यते । अथशब्दोऽधिकारार्थः । विधिग्रहणं किमर्थम् । उच्यते । यदि विधिग्रहणं न क्रियते तदा दोषः स्यात् । अथ

---

[1] मनुष्ययज्ञस्य—A, C. [2] अत्र—added in B, D. [3] इह—A, C.
[4] अत्रापि—A, C. [5] दानं—added in B, D. [6] Omitted in A, C.

स्वाध्यायमित्येवमुच्यमाने अथशब्दोऽयमनन्तरार्थः कल्प्येत । तथा सति पूर्वान् यज्ञान् कृत्वा एतस्मिन् काले ब्रह्मयज्ञः स्यात् । विधिग्रहणे क्रियमाणे विधिमात्रमेव निर्दिश्यते न क्रम इति । तेनानियतः क्रम इति ॥ १ ॥

प्राग्वोदग्वा[1] ग्रामान्निष्क्रम्याप आप्लुत्य शुचौ देशे यज्ञोपवीत्याचम्याक्लिन्नवासा दर्भाणां महदुपस्तीर्य प्राक्कूलानां तेषु प्राङ्मुख उपविश्योपस्थं कृत्वा दक्षिणोत्तरौ पाणी संधाय पवित्रवन्तौ । विज्ञायतेऽपां वा एष ओषधीनां रसो यद् दर्भाः सरसमेव तद् ब्रह्म करोति । द्यावापृथिव्योः संधिमीक्षमाणः संमील्य वा यथा वा युक्तमात्मानं मन्येत तथा युक्तोऽधीयीत स्वाध्यायम् ॥ २ ॥

प्राग्वोदग्वा ग्रामान्निष्क्रामति । अथोभयत्र वाशब्दः कस्मात् प्रयुज्यते । अप्रतिषिद्धायां दिशि निष्क्रमणं भवतीत्येतत् प्रदर्शितं भवति । निष्क्रम्याप आप्लावयति । अब्ग्रहणं किमर्थम् । अद्भिरुद्धृताभिर्मा भूदिति । कथमवगाहनं स्यादित्येतदर्थमब्ग्रहणम् । आप्लुत्य यज्ञोपवीत्याचामति । अथ यज्ञोपवीतिग्रहणं किमर्थम् । नियमार्थम् । कथमेतस्मिन् काले यज्ञोपवीती स्यात् प्राक् चानियमः स्यादिति । आचमनग्रहणं क्रियते कस्मात् । कर्माङ्गमाचमनं कथं स्यादिति । तत्राक्लिन्नवासा इति केचित् कथंचिदक्लिन्नवासा इति वर्णयन्ति । तत्र शास्त्रान्तरप्रसिद्धेः सद्यः शोधितस्य वाससो ग्रहणमिच्छन्ति शुष्कस्य[2] । अन्ये पुनः शास्त्रान्तरप्रसिद्धेरेवाक्लिन्नस्य वाससो ग्रहणमिच्छन्ति । तेनोभयथा दृष्टत्वादागमादन्यतरत् प्रतिपत्तव्यम् । द्रभाणां महदुपस्तृणाति प्राक्कूलानाम् । प्रागग्राणामित्यर्थः । उपस्तीर्य तेषु प्राङ्मुख उपविशति उपस्थं कृत्वा । तत्र प्राङ्मुखत्वं न विधातव्यम् । परिभाषासामर्थ्यात् । तत्तु विधीयते प्रागनियमार्थम् ।

---

[1] प्राङ वोदङ वा—B. [2] शुक्लस्यान्ये—A, C.

कथमेतस्मिन् काले प्राङ्मुखत्वं स्यादिति । उपस्थकरणं हि दृष्टं यथा तथोपवेष्टव्यम् । दक्षिणोत्तरौ पाणी कृत्वा पवित्रवन्तौ च । तत्र पवित्रे व्याख्याते। पवित्रवन्तौ विज्ञायते अपां वा एष ओषधीनां रसो यद्दर्भाः सरसमेव तद् ब्रह्म करोति यद् दर्भानास्तृणाति यत् पवित्रे गृह्णाति । द्यावापृथिव्योः संधिमीक्षमाणः संमील्य वा अक्षिणी । अन्येन वा प्रकारेणाधीयीत यथात्मानं युक्तं मन्येत । तेन संध्यवेक्षणं संमीलनं चेत्येतदपि योगार्थमेव । तथायुक्तस्तेन प्रकारेण युक्तोऽधीयीत स्वाध्यायम् । अथ पुनः स्वाध्यायग्रहणं कस्मात् क्रियते। कथं सावित्र्या अपि स्वाध्यायत्वं स्यादिति । इतरथा[1] हि स्वाध्यायमधीयीतेति वचनात् सावित्र्या न स्यात् । तेन सावित्र्या अपि स्वाध्यायत्वं दर्शयति ॥ २ ॥

ओंपूर्वा व्याहृतयः ॥ ३ ॥

ओंकारपूर्वा व्याहृतयो वक्तव्याः[2] ॥ ३ ॥

पश्चात्—

सावित्रीमन्वाह ॥ ४ ॥

कथम्—

पच्छोऽर्धर्चशः सर्वामिति तृतीयम् ॥ ५ ॥

एवं त्रिरन्वाह । तृतीयग्रहणं विकल्पसंशयनिवृत्त्यर्थम् ॥ ५ ॥

इति तृतीये द्वितीया कण्डिका[3]

अथ स्वाध्यायमधीयीत ॥ १ ॥

---

[1] यत्—A, C. [2] ब्रुवते—A, C. [3] This division of the कण्डिका is not shown in MSS.

सावित्रीमुक्त्वा स्वाध्यायमधीयीत । अथ पुनः स्वाध्यायग्रहणं किमर्थम्। यदुत्तरत्र वक्ष्यते तत् कथमस्य स्वाध्यायस्य स्यादिति । किं पुनस्तदिति । 'स यावन्मन्येत तावदधीत्यैतया परिदधाति' (३. ३. ५) इति वक्ष्यति । तत् कथमेतदृगादिः स्वाध्यायः स्यादिति । तेन किं सिद्धं भवति । ओंकारव्याहृतिसावित्रीणां नित्यत्वं सिद्धं भवति । एतत् प्रयोजनम् ।। १ ।।

कः पुनरत्र[1] स्वाध्यायोऽध्येतव्यः—

ऋचो यजूंषि सामान्यथर्वाङ्गिरसो ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहासपुराणानीति ।। २ ।।

तत्र कल्पादिषु विवदन्ते[2]। सूत्राणि कल्पा इत्युच्यन्ते । अन्ये तु ब्रुवते । अनित्यानां कल्पानां नित्ये ब्राह्मणे श्रवणदर्शनं नोपपद्यत इति । उच्यते । कल्पशब्दोऽयं ब्राह्मणविधिवाक्येषु वर्तत इति । ननु च ब्राह्मणग्रहणेनैव ग्रहणमिति । नेत्युच्यते । ब्राह्मणशब्दोऽर्थवादे वर्तते । एवमपि कल्पग्रहणमुपपद्यते इति । गाथादीनामपि ब्राह्मणविषयमेव मन्यन्ते ग्रहणम् । ननु च ब्राह्मणग्रहणेनैव तेषां ग्रहणं सिद्धमिति । उच्यते । फलार्थं पुनर्वचनमिति । तदेतन्नोपपद्यते । कस्मात् । तुल्यत्वात् फलस्य । कल्पग्रहणेन सूत्राण्येव गृह्यन्ते । ननु चानित्यानां नित्ये दर्शनं नोपपद्यत इति । उच्यते । उपपद्यते । कथम् । पशुवत् । यथा पशोरनित्यस्य नित्ये ब्राह्मणवाक्ये दर्शनं तद्वदिहापि । तत्राकृतेः [3]पशोर्नित्यत्वादुपपन्नं[4] भवति । इहापि यासौ कल्पाकृतिः सा नित्या । तस्मादुपपद्यते । तेन कल्पग्रहणेन सूत्राणामेव ग्रहणं भवति । तत्र गाथाः गाथाशब्दचोदिताः । नाराशंस्यश्च ।

---

[1] अथ—D. [2] आदिषु विवदन्ते—omitted in A, C. [3] पशोः—omitted in B, D. [4] नित्ये ब्राह्मणवाक्ये दर्शनम्—A, C.

फलार्थं तु पुनर्वचनम् । इतिहासमिति भारतमुपदिशन्ति । यत्र स्थित्यु-त्पत्तिप्रलया[1] वक्ष्यन्ते तत् पुराणमिति ।। २ ।।

इह हि फलं द्रव्योत्सर्गनिमित्तं दृष्टम् । अनेनापि स्वाध्यायमात्रेणापि फलं भवतीत्युपदिष्टम् । तत्प्रामाण्यार्थं श्रुतिमाकृष्टवानाचार्यः—

यदृचोऽधीते पयआहुतिभिरेव तद्देवतास्तर्पयति यद्यजूंषि घृताहुतिभिर्यत् सामानि मध्वाहुतिभिर्यदथर्वाङ्गिरसः सोमाहुति-भिर्यद् ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहासपुराणानी-त्यमृताहुतिभिः ।। ३ ।।

यद् ब्रह्मयज्ञे ऋचोऽधीते स यथा पयआहुतिभिरेव देवतास्तर्पयति । ब्रह्मयज्ञे ऋग्भिरधीताभिरेव पयआहुतिभिर्देवतास्तृप्ता भवन्ति । यद्यजूंषि घृताहुतिभिः । यद्यजूंष्यधीते ब्रह्मयज्ञे घृताहुतिभिरेव देवतास्तृप्ता भवन्ति । यत् सामानि मध्वाहुतिभिः । यत् सामान्यधीते ब्रह्मयज्ञे मध्वाहुतिभिरेव देवतास्तृप्ता भवन्ति । यदथर्वाङ्गिरसोऽधीते सोमाहुतिभिरेव देवतास्तृप्ता भवन्ति । ब्राह्मणादिष्वधीतेषु अमृताहुतिभिरेव तृप्ता भवन्ति । एवं प्रत्येकं मन्त्रजाते फलावाप्तिर्भवति ।। ३ ।।

यदृचोऽधीते पयसः कुल्या अस्य पितॄन् स्वधा उपक्षरन्ति यद्यजूंषि घृतस्य कुल्या यत् सामानि मध्वः कुल्या यदथर्वाङ्गिरस सोमस्य कुल्या यद् ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहास-पुराणानीत्यमृतस्य कुल्याः ।। ४ ।।

यदृचोऽधीते पयसः कुल्याः खाता अस्य पितॄन् स्वधा उपक्षरन्ति । स्वधा इति पितॄणां यदन्नं तदुच्यते । उपक्षरन्ति उपतिष्ठन्ति । एवमुत्तरे-ष्वपि घृतमधुसोमामृतकुल्या अस्य पितॄनुपक्षरन्ति ।। ४ ।।

---

[1] उदय for उत्पत्ति—B.

स यावन्मन्येत तावदधीत्यैतया परिदधाति—

'नमो ब्रह्मणे नमो अस्त्वग्नये
नमः पृथिव्यै नम ओषधीभ्यः ।
नमो वाचे नमो वाचस्पतये
नमो विष्णवे महते करोमि' ।।(तै० आ० २. १२. १)
इति ।। ५ ।।

स यावद् युक्तमात्मानं मन्येत तावदधीत्य अनया ऋचा परिदधाति । स यावन्मन्येतेति किमर्थमारभ्यते । इह ऋचो यजूंषीत्येवमादयः समस्ताश्चोदिताः । तेनाध्ययनमपि समस्तानां प्राप्नोति । तथा चोदितत्वात् । तेन यद्यन्मन्येत यावच्च मन्येत तावदधीते । तेनैषामनियमः सिद्धो भवति । परिधानवचनात् त्रिर्वचनं प्राप्नोति । प्रथमायां दृष्टमिति कृत्वा परिधानशब्दचोदितत्वाच्च ।। ५ ।।

इति तृतीये तृतीया कण्डिका

देवतास्तर्पयति ।। १ ।।

या देवता वक्ष्यन्ते तास्तर्पयति प्रीणयतीत्युच्यते । केन द्रव्येण । उदकेन । कुत एतत् । तथा दृष्टत्वाच्छब्दस्य[1] । 'अपोऽभ्यवयन्ति । एताश्चैव देवतास्तर्पयन्ति[2]' (३. ४. १८) इति । तेन उदकतर्पणं सिद्धं भवति ।। १ ।।

---

[1] तच्छब्दस्य—B.   [2] All MSS. read so. This shows that Devasvāmin had this reading at III. 4. 18 though two of the MSS. and all printed editions read there: एता एव तद्देवतास्तर्पयति Cf. comm. on III. 4. 3.

प्रजापतिर्ब्रह्मा वेदा देवा ऋषयः सर्वाणि छन्दांस्योंकारो वषट्कारो व्याहृतयः सावित्री यज्ञा द्यावापृथिवी अन्तरिक्षमहोरात्राणि सांख्याः सिद्धाः समुद्रा नद्यो गिरयः क्षेत्रौषधिवनस्पतिगन्धर्वाप्सरसो नागा वयांसि गावः साध्या विप्रा यक्षा रक्षांसि भूतान्येवमन्तानि ।। २ ।।

प्रजापतिस्तृप्यतु । एवं तर्पयति परस्मैपदेन । ब्रह्मा वेदा देवा ऋषयश्चेत्येवमाद्यास्तर्पयति । एवमन्तानि तृप्यन्तु । एवमन्तानीति किमर्थमारभ्यते । कथं एवमन्तानां तर्पणं स्यादिति । किं सिद्धं भवति । एकवद् द्विवद् बहुवच्च वचनात् तृप्यतु तृप्यतां तृप्यन्त्विति सिद्धं भवति । नैतदस्ति प्रयोजनम् । अर्थेनैव प्राप्नोति । एवं तर्हि मन्त्र एवायम् एवमन्तानि तृप्यन्त्विति । क्षेत्रौषधिवनस्पतिगन्धर्वाप्सरसस्तृप्यन्तु । समासेनोपदिष्टानामेवं भवति। अथ प्रतिवाक्यं नागाद्यानि भूतानि तृप्यन्त्वित्याह ।। २ ।।

अथ ऋषयः । शतर्चिनो माध्यमा गृत्समदो विश्वामित्रो वामदेवोऽत्रिर्भरद्वाजो वसिष्ठः प्रगाथाः पावमान्यः क्षुद्रसूक्ता महासूक्ता इति ।। ३ ।।

अथ ऋषींस्तर्पयति । ते शतर्चिन इत्येवमादयः । प्रतिवाक्यं च भेदो भवति । तेन ऋषीणामेवोच्यमानानामथ ऋषय इति यदारभ्यते तन्नियमार्थम् । कथमेतस्मिन् प्रदेशे नित्यमेते ऋषयः स्युरिति । कथं वानित्यत्वं स्यादिति । ‘ एताश्चैव देवतास्तर्पयन्ति ’ [1] (३. ४. १८) इत्युच्यमानेऽदेवतात्वादृषीणां न ग्रहणं स्यात् । तस्मान्नियम्यते ।। ३ ।।

प्राचीनावीती ।। ४ ।।

---

[1] Cf. comm. on III. 4. 1.

यानुत्तरत्र वक्ष्यामस्तान् प्राचीनावीती भूत्वा तर्पयति ।। ४ ।।

सुमन्तुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या जानन्तिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमाण्डव्यमाण्डूकेया गार्गी वाचक्नवी वडवा प्रातीथेयी सुलभा मैत्रेयी कहोलं कौषीतकं महाकौषीतकं पैङ्ग्यं महापैङ्ग्यं सुयज्ञं सांख्यायनमैतरेयं महैतरेयं शाकलं बाष्कलं सुजातवक्त्रमौदवाहिं महौदवाहिं सौजामिं शौनकमाश्वलायनं ये चान्य आचार्यास्ते सर्वे तृप्यन्त्विति ।। ५ ।।

सुमन्तुजैमिनीत्येवमाद्यानाचार्यान्तान् सकृत् । जानन्त्याद्यान् माण्डव्यान्तान् सकृत् । गार्ग्यादिषु प्रतिवाक्यम् । कहोलं कौषीतकमित्यर्थात् तर्पयामीति तर्पयति । उत्तरत्र प्रतिवाक्यं तर्पयामीति तर्पयति । ये चान्ये आचार्यास्ते सर्वे तृप्यन्त्विति ।। ५ ।।

प्रतिपुरुषं पितॄंस्तर्पयित्वा गृहानेत्य यद्ददाति सा दक्षिणा ।। ६ ।।

पश्चात् पितॄन् प्रतिपुरुषं तर्पयित्वा गृहानागच्छति । एत्य यद्ददाति सा दक्षिणा । कस्य । ब्रह्मयज्ञस्य ।। ६ ।।

अथापि विज्ञायते ।। ७ ।।

अथापि ब्राह्मणे श्रूयते ।। ७ ।।

स यदि तिष्ठन् व्रजन्नासीनः शयानो वा यं यं क्रतुमधीते तेन तेन हास्य क्रतुनेष्टं भवतीति ।। ८ ।।

तत्र ब्रह्मयज्ञविकल्पोऽयम् । किं तुल्यः । नेत्युच्यते । पूर्वस्यासंभवे । तिष्ठताप्यध्येतव्यं न चानध्ययनमिति । तेन शयितेनाप्यध्येतव्यं न चानध्ययनमिति ।। ८ ।।

विज्ञायते तस्य द्वावनध्यायौ यदात्माशुचिर्यद्देशः ।। ६ ।।

ब्राह्मणे श्रूयते । तस्य ब्रह्मयज्ञस्य द्वावनध्यायौ भवत इति—यदात्माशुचिर्यद्देशः । एतावेव द्वावनध्यायौ भवतो ब्रह्मयज्ञे । आत्मनोऽशुचित्वं कथम् । न बहिर्लेपैः । बहिर्लेपानां प्रक्षालनं शक्यते कर्तुम् । अथवा बाह्यैर्लेपैरपि भवत्यशुचित्वम् । यदा असामर्थ्यं प्रक्षालनस्य भवति आतुरस्य सतः तदा बहिर्लेपैरपि अशुचित्वमुपपद्यते । यदा त्वात्मा कुलधर्मेणान्येन वा केनचिदशुचित्वमापद्यते तदानध्यायो भवति । यदा देशोऽशुचिर्भवति तदा चानध्यायः ।। ६ ।।

इति तृतीये चतुर्थी कण्डिका

अथातोऽध्यायोपाकरणम् ।। १ ।।

अथशब्दोऽधिकारार्थः । अत ऊर्ध्वमध्यायोपाकरणं वक्ष्यते । अध्यायस्योपाकरणमध्यायोपाकरणम् । उपाकरणं नाम प्रारम्भः । अतःशब्दो हेत्वर्थः[1] । यस्माद् ब्रह्मयज्ञो नित्यः ततोऽध्यायोपाकरणं[2] वक्ष्यामः ।। १ ।।

ओषधीनां प्रादुर्भावे श्रवणेन[3] ।। २ ।।

यदा ओषधयः प्रादुर्भवन्ति तदाध्यायस्योपाकरणं कर्तव्यं श्रवणेन नक्षत्रेण । ओषधीनां प्रादुर्भावे निमित्ते उपाकरणम् । तन्निमित्तत्वाद् अपकर्षे अपकर्षः प्राप्नोति उत्कर्षे चोत्कर्षः । कस्मिन् पुनः काले ओषधयः प्रादुर्भवन्ति । श्रावणे मासि । आषाढेऽपकर्षो भवति । उत्कर्षश्च भाद्रपदे वृष्टिनिमित्तत्वात् । उच्यते । श्रावणे भाद्रपदे वा भवति नाषाढे । कस्मात् । तयोर्हि वृष्टेः प्रकृत्यावस्थितत्वात् । तस्मात् तयोरेव भवितव्यं नाषाढे ।

---

[1] हेत्वपदेशार्थः—A, C. [2] कर्तव्यं—added in D. [3] श्रावणस्य—added in B. This seems to be due to the influence of the comm. of Nārāyaṇa.

यद्येवं श्रावणे भाद्रपदे वेति वक्तव्यम् । एवं तर्हि न कश्चित् संशयः । एवं तूच्यमाने ऽनवेक्ष्यौषधिप्रादुर्भावं विकल्पः स्यात् । तच्चानिष्टम् । तेन तत्कृतोऽयं विकल्पः कथं स्यादित्यतः ओषधिप्रादुर्भाव उच्यते । तस्मिन्[1] श्रवणेन कर्तव्यम् ॥ २ ॥

श्रावणस्य पञ्चम्यां हस्तेन वा ॥ ३ ॥

श्रावणस्य वा पञ्चम्यामुपाकरणं कर्तव्यम् । यदा पञ्चमी हस्तेन युज्यते तदायं विकल्पो भवति ॥ ३ ॥

आज्यभागौ हुत्वाज्याहुतीर्जुहुयात् । सावित्र्यै ब्रह्मणे श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पतयेऽनुमतये छन्दोभ्य ऋषिभ्यश्चेति ॥ ४ ॥

आज्यभागयोर्वचनं नित्यार्थम् । हुत्वाज्याहुतीर्जुहोति सावित्र्यै ब्रह्मणे इत्येवमाद्याः । अथाज्यग्रहणं किमर्थम् । नियमार्थमाज्याहुतिवचनम् । वक्ष्यति 'एताभ्यो देवताभ्योऽन्नेन हुत्वा' (३. ५. १८) इति । तत्रापि कथमाज्याहुतय एव स्युरित्यत आज्याहुतिवचनम् ॥ ४ ॥

अथ दधिसक्तून् जुहोति । 'अग्निमीळे पुरोहितम्' (ऋ० सं० १. १. १) **इत्येका ॥ ५ ॥**

अथ दधिसक्तून् जुहोति अग्निमीळे इत्येवमादिभिर्मन्त्रैः । अग्निमीळे पुरोहितमित्येकेति, एकेति न वक्तव्यम् । कस्मात् । परिभाषासिद्धत्वात् । तत्तु क्रियते द्वृचनिवृत्त्यर्थम् । उत्तरत्र कुषुम्भक इत्येवमारभ्य द्वृचा इति वक्ष्यति । तन्निवृत्त्यर्थमेकग्रहणम् ॥ ५ ॥

---

[1] तस्मात्—A, C.

'कुषुम्भकस्तदब्रवीत्' (ऋ० सं० १. १९१. १६), **'आ वदंस्त्वं शकुने भद्रमा वद'** (ऋ० सं० २. ४३. ३), **'गृणाना जमदग्निना'** (ऋ० सं० ३. ६२. १८), **'धामं ते विश्वं भुवनमधिश्रितम्'** (ऋ० सं० ४. ५८. ११), **'गन्ता नो यज्ञं यज्ञियाः सुशमि'** (ऋ० सं० ५. ८७. ९), **'यो नः स्वो अरणः'** (ऋ० सं० ६. ७५. १९), **'प्रतिचक्ष्व विचक्ष्व'** (ऋ० सं० ७. १०४ २५), **'आग्ने याहि मरुत्सखा'** (ऋ० सं० ८. १०३. १४), **'यत ते राजञ्छृतं हविः'** (ऋ० सं० ९. ११४. ४) **इति द्वृचाः ॥ ६ ॥**

यत् ते राजन्नित्येवमन्ता द्व्यृचाः ॥ ६ ॥

'समानी व आकूतिः' (ऋ० सं० १०. १९१. ४) **इत्येका । 'तच्छंयोरावृणीमहे'** (ऋ० सं० खि० १०. १९१. ५) **इत्येका[1] ॥ ७ ॥**

एकग्रहणं द्विृचाधिकारनिवृत्त्यर्थम् ॥ ७ ॥

अध्येष्यमाणोऽध्याप्यैरन्वारब्ध एताभ्यो देवताभ्यो हुत्वा[2] सौविष्टकृतं हुत्वा[3] दधिसक्तून् प्राश्य ततो मार्जनम् ॥ ८ ॥

अध्येष्यमाणो यः सोऽध्याप्यैरध्यापयितव्यैरित्यर्थः । तैः समन्वारब्ध एताभ्यो देवताभ्यो जुहोति । [4]पश्चादनन्तरं स्विष्टकृतं जुहोति । हुत्वा दधिसक्तून् प्राश्नन्ति । प्राश्य मार्जनं कुर्वन्ति । अध्याप्यैरिति च

---

[1] तच्छंयोः etc. omitted in A, C. [2] यज्ञोपवीतं—added in B.
[3] उपवीतं दद्यात्—added in B. [4] पश्चात् seems to be from the *sūtra*; but no MS. reads it in the *sūtra*.

वक्तव्यम् । अप्राप्तत्वात् । अध्येष्यमाण इत्यपार्थकम् । कस्मात् । प्राप्तत्वात् । उच्यते । वक्तव्यम् । अध्याप्यैरन्वारब्ध इत्येवमुच्यमाने अध्याप्याभावे न स्यात् । इष्यते च । कथं तदभावेऽपि स्यादित्यत आरभ्यते । अथैताभ्यो देवताभ्यो हुत्वेति कस्मादारभ्यते । होमस्य सिद्धत्वात् समन्वारम्भणार्थमारभ्यते । यद्येवं तत्रैव समन्वारम्भणं चोदयितव्यम् । क्व चोदना प्राप्नोति । पञ्चम्यां हस्तेन वेति । अध्येष्यमाणोऽध्याप्यैरन्वारब्ध आज्यभागौ जुहुयादिति । एवं सिद्धे यत् पुनराह तत् किमर्थम् । सर्वासां देवतात्वज्ञापनार्थम् । कथम् । याश्च सावित्र्याद्या याश्चाग्निमीळाद्यास्तासां सर्वासां देवताग्रहणेन ग्रहणं कथं स्यादिति । किं प्रयोजनम् । वक्ष्यति 'एताभ्यो देवताभ्योऽन्नेन हुत्वा' (३. ५. १८) इति । तत्र कथमुभय्यो[1] देवता गृह्येरन्नित्येतत् प्रयोजनम् । स्विष्टकृतो वचनमपार्थकम् । कस्मात् । सिद्धत्वात् । ब्रवीति । एवं सिद्धे यत् स्विष्टकृतं प्रधानाहुतिभ्योऽनन्तरं विदधाति तज्ज्ञापयति अन्यत्र स्विष्टकृत् कर्मान्ते भवतीति । प्राशनमार्जने अवश्यं विधेये अपूर्वत्वात् ।। ८ ।।

अपरेणाग्निं प्राक्कूलेषु दर्भेषूपविश्योदपात्रे दर्भान् कृत्वा ब्रह्माञ्जलिकृतो जपेत्[2] ।। ९ ।।

अग्नेः पश्चादुपविश्य प्राक्कूलेषु दर्भेषु । प्रागग्रेष्वित्यर्थः । तेषूपविशति[3] । उदपात्रे दर्भान् कृत्वा[4] ब्रह्माञ्जलिकृतो जपेत् । [5]तच्चार्थात् सर्वेषां भवति । तत्र जपतिचोदनायामुपांशुप्रयोगः प्राप्नोति । न भवति । कस्मात् । अर्थविरोधात् । दर्शयति चाचार्यः जपतिचोदनायामुपांशुत्वमनित्यमिति । तदुत्तरत्र वक्ष्यामः समावर्तनप्रकरणे । तस्माज्जपतिचोदनायामप्युच्चैरेव प्रयोगो भवतीत्युपदेशः ।। ९ ।।

---

[1] उभयोः—B; उभयेन—D. [2] जपेयुः—B. [3] उपविशन्ति—B.
[4] कुर्वन्ति—B. [5] तत्र—A, C.

ओंपूर्वा व्याहृतयः[1] सावित्रीं [2]चतुरभ्यस्य वेदादिमारभेत् ॥ १० ॥

ओंपूर्वाणां च व्याहृतीनां सावित्र्याश्चाभ्यासो भवति चतुष्कृत्वः ।[3] तत्र केचित् त्रिरिति पठन्ति । तेषां पूर्वोक्तेन विधिना त्रिरभ्यासो भवति 'पच्छोऽर्धर्चशः सर्वाम्' (३. २. ५) इति । ये तु चतुरभ्यस्येति पठन्ति तेषामर्धर्चशश्चतुरभ्यासो भवति । कस्मात् । एतत्प्रकृतित्वादभ्यासस्य । वेदारम्भणं कुर्वन्ति । तत्र सूक्तमनुवाकं वा प्रारभन्ते । पश्चात् पूर्णपात्रनिनयनादिकं समापयति ॥ १० ॥

तथोत्सर्गे ॥ ११ ॥

तथा तूत्सर्गे यथोपाकरण इत्येतदुक्तं भवति । तत्रैके कृत्स्नस्य कर्मणोऽतिदेश[4] इति मन्यन्ते । तन्नोपपद्यते । कस्मात् । तृतीयाभावात् । यदि कृत्स्नं कर्मातिदिश्येत 'एतेनोत्सर्गः' इत्येवं ब्रवीति । किं पुनरत्रातिदिश्यते । वेदाद्यारम्भः । अन्यत् कर्मोत्सर्गे कथं भवति । 'एताभ्यो देवताभ्योऽन्नेन हुत्वा' (३. ५. १८) इति । कः पुनरत्र विशेषः वेदाद्यारम्भेण वा कृत्स्नकर्मातिदेशेन वा । यदि कृत्स्नकर्मातिदेशः स्यात् इहापि प्राशनमार्जने प्राप्नुतः । वेदारम्भणातिदेशे पुनस्तयोरनिर्दिष्टत्वात्[5] कृत्स्नकर्मातिदेशो नेष्यते ॥ ११ ॥

षण्मासानधीयीत ॥ १२ ॥

एवमुपाकृत्य षण्मासानधीते । कालोपदेशो नियमार्थः । नियमेन षण्मासाध्ययनं चोद्यते ॥ १२ ॥

---

[1] व्याहृतीः—A, C, D. (But see the quotation at III. 9. 4)
[2] च त्रिरभ्यस्य—A. C.
[3] चतुरो वारान्—A, C.
[4] निर्देशः—D
[5] अनिष्टत्वात्—A, C.

समावृत्तो ब्रह्मचारिकल्पेन ॥ १३ ॥

समावृत्तो ब्रह्मचारिकल्पेनाधीते । ब्रह्मचारिधर्मेणेत्यर्थः । यद्येवं मेखलादयो धर्माः[1] प्राप्नुवन्ति । नेत्युच्यते । स्वाध्यायकाले ये विहितास्ते भवन्ति । के पुनस्ते । मधुमांसानशनं ब्रह्मचर्यं खट्वाशयनादयश्च । कथं पुनरेतद् गम्यते यथा एते भवन्तीति । यदि हि सर्व एतेऽभिप्रेताः स्युर्ब्रह्मचारिवदित्येव ब्रवीति । । तेन सर्वे धर्मा न भवन्तीति । कथमेतद् गम्यते यथा मध्वनशनादयो धर्मा भवन्तीति । एतैरत्यन्तसंयोगात् । ते स्वाध्यायेन चात्यन्तं संयुज्यन्ते । तस्मादेते भवन्तीति ॥ १३ ॥

यथान्यायमितरे ॥ १४ ॥

यथान्यायमधीयते ब्रह्मचारिणः । किमर्थं वचनम् । एतस्मिन्नध्ययने ब्रह्मचारिणामपि प्रवृत्तिर्यथा स्यादिति । कथं वा न स्यात् । समावृत्तानां विधानात् । अधिकाराच्च ॥ १४ ॥

जायोपेयेत्येके ॥ १५ ॥

एके आचार्याः उपगमनमिच्छन्ति भार्यायाः ॥ १५ ॥

कस्मात्—

प्राजापत्यं तत् ॥ १६ ॥

प्रजार्थं तदित्युक्तं भवति । यत् प्रजार्थं भार्योपगमनं तत् कर्तव्यमिति। अथ किमर्थं प्राजापत्यमित्येतदारभ्यते । अर्थादेव भार्योपगमनं प्रजार्थं भविष्यति । ब्रवीति । एतद् दर्शयति यथर्तुकाल एवोपगमनं स्यात् अन्यस्मिन् काले मा भूदिति । अत एव तदारभ्यते ॥ १६ ॥

---

[1] सर्वे—added in B.

वार्षिकमित्येतदाचक्षते ।। १७ ।।

यदध्ययनमेतद्वार्षिकमित्याचक्षते कथयन्त्याचार्याः श्रुतिर्वा ।।१७।।

मध्यमाष्टकायामेताभ्यो देवताभ्योऽन्नेन हुत्वापोऽभ्यवयन्ति । [1]एताश्चैव देवतास्तर्पयन्ति । आचार्यानृषीन् पितॄंश्च ।। १८ ।।

मध्यमाष्टकायां समीपे पौर्णमासी । कथं ज्ञायते यथा पौर्णमास्यामिदं कर्म भवति नाष्टकायामिति । षण्मासवचनाज्ज्ञायते पौर्णमास्यामिति । अष्टकाग्रहणं तूपलक्षणार्थम् । एताभ्यो देवताभ्योऽन्नेन हुत्वा । एता देवता अन्नेन जुहोति याश्च देवताः प्रागुपदिष्टाः । तत्र सावित्र्याद्या अन्नेन प्राप्नुवन्ति । आज्याहुतिवचनात्तु न भवन्ति । अग्निमीळाद्या एवान्नेन हूयन्ते । तत्रान्नवचनात् स्थालीपाको न भवति तथादृष्टत्वात् । अनन्तरं स्विष्टकृद् भवति । पश्चाद्वेदारम्भणम् । शिष्टं कर्म समाप्यापोऽभ्यवयन्ति । अवगाहन्त इत्यर्थः । अवगाह्यैताश्च देवतास्तर्पयन्ति । तत्र सावित्र्यादीनां तर्पणं भवति अग्निमीळादीनामिति । तत्र चशब्दः समुच्चयार्थः । याश्च पूर्वोक्ता देवतास्ताश्च तर्पयन्ति प्रजापतिरित्येवमाद्याः । तत्र देवताग्रहणमेतदर्थं क्रियते । आचार्यान् ऋषीन् पितॄंश्च तर्पयन्ति ।। १८ ।।

एतदुत्सर्जनम् ।। १९ ।।

एतत् कर्म उत्सर्जनसंज्ञं वेदितव्यम् । संज्ञया किं प्रयोजनम् । संविज्ञानम् । किं चोत्सर्जनं कर्तव्यमित्युच्यमानेऽस्य कर्मणो ग्रहणं भविष्यति ।। १९ ।।

---

[1] एता एव तद्देवताः—A, C.

इति तृतीये पञ्चमी कण्डिका

अथ काम्यानां स्थाने काम्याश्चरवः ।। १ ।।

यानि काम्यानि कर्माणि विहितानि तेषां स्थाने काम्याश्चरवो भवन्ति । अथशब्दोऽधिकारार्थः । यानि काम्यानि कर्माणि विहितानि त्रेतायाम्[1] । कुत एतत् । इहाविधानात्[2] तेषां स्थाने चरवो भवन्ति काम्याः । काम्याश्चरव इति किमर्थं पुनः काम्यग्रहणं क्रियते । नित्या मा भूवन्निति । न भविष्यन्ति नित्याः । काम्यानां स्थाने विधीयमानाः काम्या एव भवन्ति । एवं तर्हि योगविभागार्थमारभ्यते । 'अथ काम्यानां स्थाने काम्याः' । काम्याः पाकयज्ञाः इत्युच्यन्ते । किं सिद्धं भवति । इष्टीनां स्थाने स्थालीपाकः पशोः स्थाने पशुरिति । एवं सति सोमस्य स्थाने सोमः प्राप्नोति । न भविष्यति । कस्मात् । इहाविधानात् । इह पशुर्विहितः स्थालीपाकश्च । न सोमः । तस्मात् तस्य सोमस्य स्थाने चरुर्न भविष्यति । 'चरवः'— चरवश्च भवन्ति । किमर्थमिदमारभ्यते । कथं चरुरेव स्यान्न सांनाय्यं नान्यद् द्रव्यमिति । तेन पुरोडाशस्थाने चरुर्भवतीति सिद्धम् । यद्येवं पशोरपि स्थाने चरुर्भवति । नियमितत्वात् । न भवति । कस्मात् । समानजातीयं हि द्रव्यं समानजातीयस्य स्थाने आरभ्यमाणमुद्धाराय वर्तते । चरुश्चोद्यमान ओषधिसामान्यात् न पशोः स्थाने भवति । 'आयुष्कामेष्टचाम्' (आ० श्रौ० २. १०. २) इत्यासां स्थाने चरवो भवन्ति । 'वायव्यं श्वेतमालभेत भूतिकामः' (तै० सं० २. १. १. १) इत्येतस्य स्थाने पशुर्भवति स्वेन[3] कल्पेन इत्येवमादि ।। १ ।।

तानेव कामानाप्नोति ।। २ ।।

ये कामास्तत्राम्नातानेव कामानाप्नोति । तदिदं शक्यमनारब्धुम् । कामानां सिद्धत्वात् तत्स्थाने विधीयमानास्तत्कामा एव भवन्ति । ब्रवीति ।

---

[1] त्रेताग्नौ—B. [2] अभिधानात्—A, C. [3] श्वेतकल्पेन—B.

न कामार्थमिदं वचनमारभ्यते परिमाणार्थम् । यावान्[1] कामस्तेन कर्मणा प्राप्यते तावान्[2] कामोऽनेनाप्यत इति । अन्यथाल्पत्वादस्य कर्मणस्तमेव काममल्पमाप्नुयादित्येवमर्थं वचनमारभ्यते । यदि तावदेव फलमाप्नोति महतां कर्मणामारम्भोऽपार्थकः स्यात् । तस्मान्नायमर्थः । तत्रेदं प्रयोजनं स्यात् । पुरस्तात् कामग्रहणं द्विः कृतम् । तत्र द्वितीयकामग्रहणे संदिह्यते किं कामनियमार्थमुत योगविभागार्थमिति । तत् कथं योगविभागार्थं स्यादित्यत इदमारभ्यते कामग्रहणम् । ननु च तत्कामसंबन्धात् तत्कामा अपि प्राप्नुवन्ति । एवं सिद्धे अप्राप्तवदुपदेशं कुर्वन् दर्शयति कामा एव भवन्ति नान्यदिति । तत्स्थानोपदेशात् तद्धर्मता स्यात् । । तद्धर्मत्वे दक्षिणा अपि प्रसज्येरन् । अतो नियमार्थं क्रियते तानेव कामानाप्नोतीति परिसंख्यानार्थम् । अथवा एवं ब्रुवन्नेतज्ज्ञापयति । अनाहिताग्नेरेवैतद् भवतीति । तेन विनिवेशः कल्पित एव ।। २ ।।

अथ व्याधितस्यातुरस्य यक्ष्मगृहीतस्य वा षडाहुतिश्चरुः 'मुञ्चामि त्वा हविषा जीवनाय कम्' (ऋ० सं० १०. १६१. १) **इत्येतेन ।। ३ ।।**

अथशब्दोऽनन्तरार्थः । व्याधितस्य यदि चातुरः स भवति यक्ष्मगृहीतस्य वायं षडाहुतिश्चरुर्भवति । मुञ्चामीत्यनेन प्रत्यृचं होमो भवति । षडाहुतिरिति संज्ञाया[3] स्विष्टकृत् षष्ठी भवति आज्यभागौ न भवत इति । अत्र वहुधा विप्रतिपन्नाः ।। ३ ।।

स्वप्नममनोज्ञं दृष्ट्वा 'अद्या नो देव सवितः' (ऋ० सं० ५. ८२. ४) **इत्येतया 'यच्च गोषु दुःस्वप्न्यम्' इति पञ्चभिरादित्यमुपतिष्ठेत ।। ४ ।।**

---

[1] यावत्कामः—A, C. [2] तावत्कामः—A, C. [3] संख्याया—A, C.

अमनोज्ञमप्रियमनिष्टमशुभं दृष्ट्वा 'अद्या नो देव सवितः' इत्येतया[1] 'यच्च गोषु दुःस्वप्न्यम्' इति पञ्चभिरित्याभिः[2] षड्भिरादित्यमुपतिष्ठेत ॥ ४ ॥

'यो मे राजन् युज्यो वा सखा वा' (ऋ० सं० २. २८. १०) **इति वा ॥ ५ ॥**

'यो मे राजन्' इत्यनया वादित्यमुपतिष्टेत। तत्रैके विकल्पमिच्छन्ति अनया वा पूर्वाभिर्वेति । अन्ये समुच्चयम् । वाशब्दः समुच्चयार्थ इति । एकस्य चानेकस्य च विकल्पो नोपपद्यते इति कृत्वा । तस्मात् समुच्चयमिच्छन्ति । नेत्युच्यते । विकल्प एव । कस्मात् । यदि समुच्चयोऽभिप्रेतो भविष्यति उपस्थानान्ते वा आदौ वोपदिशेत् । यस्मान्मध्ये उपस्थानं विदधाति तस्माद् विकल्प एवेति दर्शयति । नेत्युच्यते । उपस्थानद्वित्वाददोषः । एकं षड्भिरुपस्थानमन्यदेकया । तयोः समुच्चयः । तुल्यत्वादुपस्थानस्य । निमित्तैकत्वाच्च ॥ ५ ॥

क्षुत्वा जृम्भित्वामनोज्ञं दृष्ट्वा पापकं गन्धमाघ्रायाक्षिस्पन्दने कर्णध्वनने च 'सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन सुश्रुत् कर्णाभ्यां मयि दक्षक्रतू' इति जपेत् ॥ ६ ॥

क्षुतादिषु कृतेषु सुचक्षा अहमित्येतन्मन्त्रं जपति ॥ ६ ॥

अगमनीयां गत्वायाज्यं याजयित्वाभोज्यं भुक्त्वाप्रतिग्राह्यं प्रतिगृह्य चैत्यं यूपं वोपहत्य

'पुनर्मामैत्विन्द्रियं पुनरायुः पुनर्भगः ।
पुनर्द्रविणमैतु मां पुनर्ब्राह्मणमैतु माम्' ॥
(अ० सं० ७. ६७. १) **स्वाहा ॥**

---

[1] द्वाभ्याम्—A, C. [2] आभिः षड्भिः—omitted in A, C.

‘ इमे ये धिष्ण्यासो अग्नयो
यथास्थानमिह कल्पताम् ।
वैश्वानरो वावृधानोऽन्तर्यच्छतु मे मनो
हृद्यन्तरममृतस्य केतुः ’ ।। स्वाहा ।।

इत्याज्याहुती जुहुयात् ।। ७ ।।

अगमनीयादिषु पुनर्मामित्येताभ्यामृग्भ्यामाज्याहुती जुहोति । तत्रा-गमनीया रजस्वला । अयाज्यमिति प्रतिषिद्धस्यार्त्विज्यम् । अप्रतिग्राह्यमिति शस्त्रं विषमित्येवमादि । चैत्यं यूपमिति । चितिस्थश्चित्योऽग्निस्तत्र च यो यूपः स चैत्यः । तमुपहृत्य स्पृष्ट्वेत्यर्थः । एतानि कृत्वाज्याहुती जुहोति । ।। ७ ।।

समिधौ वा ।। ८ ।।

आदध्यात् ।। ८ ।।

जपेद्वा ।। ९ ।।

एतन्मन्त्रम् ।। ९ ।।

इति तृतीये षष्ठी कण्डिका

अव्याधितं चेत् स्वपन्तमादित्योऽभ्यस्तमियाद् वाग्यतो-ऽनुपविशन् रात्रिशेषं भूत्वा[1] ‘येन सूर्य ज्योतिषा बाधसे तमः’ (ऋ० सं० १०. ३७. ४) **इति पञ्चभिरादित्यमुपतिष्ठेत ।।१।।**

अव्याधितं स्वपन्तं यद्यादित्योऽस्तं गच्छति वाग्यतो भूत्वानुपविशन् रात्रिशेषं तिष्ठेत् । व्युष्टायां येन सूर्येति पञ्चभिरादित्यमुपतिष्ठेत । तस्येदं प्रायश्चित्तं भवति ।। १ ।।

---

1 स्थित्वा—B.

अभ्युदियाच्चेदकर्मश्रान्तमनभिरूपेण कर्मणा वाग्यत इति समानम् । उत्तराभिश्चतसृभिरुपस्थानम् ।। २ ।।

अकर्मश्रान्तमव्याधितमपि स्वपन्तमादित्यो यद्यभ्युदियात् अनभिरूपेण कर्मणा कर्मश्रान्तं यद्यभ्युदियादादित्य इत्यर्थः । ततो भवत्येतत् प्रायश्चित्तम् । किं पुनरभिरूपं कर्म । गुरुवचनमग्निहोत्रनिमित्तं वा यथाशास्त्रम् । अतोऽन्यदनभिरूपमित्युच्यते । वाग्यतोऽनुपविशन्नहःशेषं तिष्ठेत् । 'यस्य ते विश्वा भुवनानि' (ऋ० सं० १०. ३७. ६) इत्येताभिश्चतसृभिरुपस्थानमन्यस्मिन्नहनि । कस्मात् । आदित्याभावात् ।। २ ।।

यज्ञोपवीती नित्योदकः संध्यामुपासीत वाग्यतः । सायमुत्तरापराभिमुखोऽन्वष्टमदेशं सावित्रीं जपेदर्धास्तमिते मण्डल आ नक्षत्रदर्शनात् ।। ३ ।।

यज्ञोपवीतित्वं नित्योदकत्वं च विधीयते । उत्तरापराभिमुखोऽन्वष्टमदेशम् । प्रतीच्यां दिशि य उत्तरभागस्तमभिमुख इत्यर्थः । कियन्तं कालम् । अर्धास्तमयदर्शनादेतावन्तं कालमुपासीत ।। ३ ।।

एवं प्रातः प्राङ्मुखस्तिष्ठन्ना मण्डलदर्शनात् ।। ४ ।।

एवं प्रातरुपासीत । तिष्ठन् प्राङ्मुख आ मण्डलदर्शनादादित्यस्य । पूर्वो विधिः सर्वः प्राप्नोति । कः पुनरसौ । अर्धास्तमितेषु नक्षत्रेषु आरभ्य तावद् यावदादित्य उदितो भवति ।। ४ ।।

कपोतश्चेदगारमुपहन्यादनुपतेद्वा 'देवाः कपोतः' (ऋ० सं० १०. १६५. १) **इति प्रत्यृचं जुहुयाज्जपेद्वा ।। ५ ।।**

यद्युपहन्यान्निषीदेदित्यर्थः । निषीदेदगारे गृहे अनुपतेद्वागारम् । यद्यनुपतति तत्र देवाः कपोत इति प्रत्यृचं जुहोति । प्रत्यृचग्रहणप्रयोजनमधस्तादुक्तम् । जपति वैतत् सूक्तम् ।। ५ ।।

'वयमु त्वा पथस्पते' (ऋ० सं० ६. ५३. १) **इत्यर्थचर्यां चरिष्यन् ।। ६ ।।**

धनार्थी यदि क्वचिद् गच्छेत् वयमु त्वा पथस्पत इत्यनेन सूक्तेन प्रत्यृचं जुहुयाज्जपेद्वा ।। ६ ।।

'सं पूषन् विदुषा' (ऋ० सं ६. ५४. १) **इति नष्टमधिजिगमिषन् ।। ७ ।।**

नष्टान्वेषणमिच्छन्नित्यर्थः ।। ७ ।।

मूल्हो वा ।। ८ ।।

प्रज्ञाभ्रष्टो वेत्यर्थः ।। ८ ।।

'सं पूषन्नध्वनः' (ऋ० सं० १. ४२. १) **इति महान्तमध्वानमेष्यन् । प्रतिभयं वा ।। ९ ।।**

अल्पेऽध्वनि प्रतिभयं भवति न शक्यते गन्तुम् । महाध्वानं वा यियासुरनेन प्रत्यृचं जुहुयाज्जपेद्वा ।। ९ ।।

इति तृतीये सप्तमी कण्डिका

अथैतान्युपकल्पयीत समावर्तमानः ।। १ ।।

अथशब्दोऽधिकारार्थः । एतानि द्रव्याण्युपकल्पयीत सः । एतानि । कानि पुनस्तानि द्रव्याणि । यानि वक्ष्यामः । उपकल्पयीत[1] परिकल्पयेत् समावर्तमानोऽयम् । समावर्तिष्यमाण इति प्राप्नोति समावर्तिष्यन्निति वा । तत्र समावर्तमान इत्युक्ते यथोपपद्यते तथा लक्षणं योजयितव्यम् । तत्रोपकल्पयीतेत्येतच्छक्यमनारब्धुम् । द्रव्योपदेशश्च न कर्तव्यः ।

---

[1] उपकल्पयेत—B.

उपकल्पयीतेति यदि नोच्यते अपूर्वमप्येषा चोदना न स्यात् । भवतु को दोषः । ये उत्तरत्र विशेषास्ते तत्रैवावतिष्ठेरन् । न चायमिष्टः । तत्राहते वाससी आचार्यस्य प्राप्नुतः । कस्मात् । समावर्तमानस्य विशेषोपदेशात् । तेन कथं सापूर्वा चोदना स्यात् इदं च वचनमानुमानिकं स्यादित्येतदर्थ-मेतानीत्युच्यते । उपकल्पयीतेति यदि नोच्येत एतेषां द्रव्याणामुपकल्पनं न स्यात् । नेत्युच्यते । उत्तरत्रोपदेशाद् भविष्यति । तद्यथा—'आचार्योऽहतेन वाससा त्रिः प्रदक्षिणं शिरः समुखं वेष्टयित्वा' (आ. श्रौ. ८. १४. १०) इत्यत्रासत्यामपि चोदनायामुपकल्पयीतेत्यर्थादुपकल्पनं भवति । तद्वदिहापि भविष्यति । नात्रोपकल्पनं प्राधान्येन चोद्यते । 'आत्मने चाचार्याय च' (३. ८. २) इति वक्ष्यति । तत्र न ज्ञायते कानि द्रव्याण्यात्मने चाचार्याय च भवन्तीति । तत्र कथमेतेषां द्रव्याणां ग्रहणं स्यादित्यतो वचन-मारभ्यते ।। १ ।।

मणिं कुण्डले वस्त्रयुगं छत्रमुपानद्युगं दण्डं स्त्रजमुन्म-र्दनमनुलेपनमाञ्जनमुष्णीषमित्यात्मने चाचार्याय च ।। २ ।।

मणिं कुण्डले इत्येवमाद्यूष्णीषान्तानि आत्मने चाचार्याय चोपकल्पयते । तत्र मणी कुण्डले इत्येवं केचित् पठन्ति । मणिकुण्डले इत्येवमपरे । ये मणिकुण्डले इति पठन्ति तेषां मणिग्रहणं कुण्डलविशे-षणार्थम् । तेन चाचार्यस्य मणिर्न प्राप्नोति । समावर्तमानस्य दर्शनाद् भविष्यति । तस्मान्नायं पाठः । मणिं कुण्डले इत्ययमेव पाठः । किमेवं भविष्यति । उभयोरपि मणिः सिद्धो भवति । अविशिष्टयोः कुण्डलयोः प्राप्तिर्भविष्यति । दर्शनाद् विशिष्टयोः प्राप्तिर्भवति मणिकुण्डले आबध्नीतेति ।। २ ।।

यद्युभयोर्न विन्देताचार्यायैव ।। ३ ।।

यद् द्रव्यमुभयोर्न विन्देत तदाचार्यायैव देयमशक्तौ सत्याम् ।। ३ ।।

समिधं त्वाहरेत् ॥ ४ ॥

समिधं त्वाहरेदेव नियमेन ॥ ४ ॥

अपराजिताया दिशो यज्ञियस्य वृक्षस्य ॥ ५ ॥

यो यज्ञियो वृक्षः तस्यापराजिताया दिशः समिधमाहरेत् । आनयेदित्युक्तं भवति ॥ ५ ॥

आर्द्रामन्नाद्यकामः ॥ ६ ॥

अन्नाद्यं यः कामयते स आर्द्रामाहरेत् ॥ ६ ॥

पुष्टिकामस्तेजस्कामो वा ॥ ७ ॥

आर्द्रामाहरेत् ॥ ७ ॥

ब्रह्मवर्चसकाम उपवाताम् ॥ ८ ॥

आहरेत् । शुष्कामित्युक्तं भवति ॥ ८ ॥

उभयीमुभयकामः ॥ ९ ॥

उभयं यः कामयते स उभयीमाहरेत् समिधमार्द्रामर्धशुष्काम् ॥ ९ ॥

उपरि समिधं कृत्वा गामन्नं च ब्राह्मणेभ्यः प्रदाय गौदानिकं कर्म कुर्वीत ॥ १० ॥

आहृत्य समिधमुपरि निदधाति । भूमेः प्रतिषेधः । उपरि कृत्वा गामन्नं च ब्राह्मणेभ्यो ददाति । तत्र संशयः । किमियं गौर्व्यञ्जनत्वेन चोद्यते आहोस्विद् दक्षिणार्थं इति । उभयथा चोपपद्यते । अन्नसंनिधौ श्रूयमाणे व्यञ्जनत्वेनोपपद्यते इति । प्रतिग्रहीतृसंनिधौ श्रूयमाणे दक्षिणार्थत्वेनेत्युपपद्यते । एवमुभयथा संप्रतिपन्नाः । आगमस्तु दक्षिणार्थत्वेनेति । गां दत्त्वा ब्राह्मणांश्च भोजयित्वा गौदानिकं कर्म कुर्वीत ।

तत्र कर्मण इयमानुपूर्वीति । तत्र कर्मग्रहणं किमर्थम् । तदेव कर्म कथं स्यादिति । किं सिद्धं भवति । 'आप्लुत्य वाग्यतः' (१. १८. ६) इत्येवमादि मा भूदिति । इदं तु समावर्तनं कर्म स्वयंकर्तृकं भवति ।। १० ।।

आत्मनि मन्त्रान् संनमयेत् ।। ११ ।।

तत्र ये मन्त्रा अत्र ते आत्माभिवादिनो निवेशयितव्या इति ब्रवीति । यद्येवमर्थमारभ्यते नैवारब्धव्यम् । किं कारणम् । परिभाषासिद्धत्वादस्यार्थस्य । वैकृतत्वाच्चास्य कर्मण ऊहो भवति । तस्माच्छक्यमनारब्धुम् । आरभ्यते प्रयोजनार्थम् । किं प्रयोजनम् । ऋगूहप्राप्त्यर्थम् । ऋक्षु कथमूहः प्रसज्येत इति । तस्मादारब्धव्यम् । के पुनस्ते मन्त्राः ये आत्माभिवादिनः कर्तव्याः । तद्यथा— 'ओषधे त्रायस्व मां स्वधिते मा मा हिंसीः',[1] 'वपतेदं म आयुष्मान्', 'तेन म आयुषे वपामि', 'मुखं मा म आयुः प्रमोषीः' इति । समावर्तनकर्मण्येते मन्त्रा अनेन प्रयोगेण प्रयोक्तव्याः ।। ।। ११ ।।

एकक्लीतकेन शीतोष्णाभिरद्भिः स्नात्वा 'युवं वस्त्राणि पीवसा वसाथे' (ऋ० सं० १. १५२. १) इत्यहते वाससी आच्छाद्य 'अश्मनस्तेजोऽसि चक्षुर्मे पाहि' इति चक्षुषी आञ्जयीत ।। १२ ।।

एकक्लीतकेन उन्मर्दयति । तदुन्मर्दनमेकक्लीतकं भवति । एकक्लीतकमिति किमुच्यते । करञ्जक्याः फलानां यत्रैकं क्लीतकं बीजं भवति । तदुन्मर्दनं भवति । तेनोन्मर्द्य शीतोष्णाभिरद्भिः स्नाति । स्नात्वा 'युवं वस्त्राणि' इत्यनयर्चा अहते वाससी आच्छादयति । आच्छाद्य 'अश्मनस्तेजोऽसि' इत्यनेन मन्त्रेण चक्षुषी आञ्जयीत । सव्यं प्रथममित्युपदेशः ।

---

[1] Cf. I. 17. 8-16.

पश्चाद् दक्षिणम् । कुतः । एवमेव शास्त्रान्तरप्रसिद्धेः । 'सव्यं हि पूर्वं मनुष्या आञ्जते' (तै० सं० ६. १. १. ६) इत्येवं श्रूयते ।। १२ ।।

'अश्मनस्तेजोऽसि श्रोत्रं मे पाहि' इति कुण्डले आबध्नीत ।। १३ ।।

'अश्मनस्तेजोऽसि' इत्यनेन मन्त्रेण कुण्डले आबध्नीत । दक्षिणं प्रथमं सव्यं पश्चादिति । स्वशास्त्रप्रसिद्धेः ।। १३ ।।

अनुलेपनेन पाणी प्रलिप्य मुखमग्रे ब्राह्मणोऽनुलिम्पेत् ।। १४ ।।

यत्तदनुलेपनमुपपादितं तेन पाणी प्रलिम्पति । प्रलिप्य ब्राह्मणो मुखमग्रे लिम्पति । पश्चादितराणि गात्राणि ।। १४ ।।

बाहू राजन्यः ।। १५ ।।

राजन्यो बाहू अग्रेऽनुलिम्पति ।। १५ ।।

उदरं वैश्यः ।। १६ ।।

उदरमग्रे वैश्योऽनुलिम्पति ।। १६ ।।

तत्र त्रयाणां वर्णानां यस्याग्रेऽनुलेपनं कर्तव्यं तदुपदिष्टम् । कथमयं विधिर्नित्यः स्यादित्येतदर्थं स्त्रियाश्चोपदेशं करोति—

उपस्थं स्त्री । ऊरू सरलजीविनः ।। १७ ।।

उपस्थं स्त्री अग्रेऽनुलिम्पति । ऊरू सरलजीविनः । सरलजीविन इति क उच्यन्ते । प्रेष्यमुपदिशन्ति । दीर्घाध्वनिका इति ये लोके गण्यन्ते ते सरलजीविन ऊरु प्रथममनुलिम्पन्ति । किमर्थं तस्य ग्रहणम् । नित्यत्वं विधेः प्रज्ञापयति । समावर्तने दृष्टं सर्वत्र कथं स्यात् । ब्राह्मणादीनां सर्वत्रेत्यवमर्थम् ।। १७ ।।

'अनार्तास्यनार्तोऽहं भूयासम्' इति स्रजमपि बध्नीत । न मालोक्ताम् । मालेति चेद् ब्रूयुः स्रगित्यभिधापयीत ।। १८ ।।

मालेति चेद् ब्रूयुः या तु स्रङ्मालेत्युच्यते तां नाबन्धीत । स्रगिति च तामभिधापयीत । स्रगिति ब्रूध्वमिति । पश्चादपि निबध्नीत स्रगित्यभिधापितां सतीम् ।। १८ ।।

'देवानां प्रतिष्ठे स्थः सर्वतो मा पातम्' इत्युपानहावास्थाय 'दिवश्छद्मासि' इति छत्रमादत्ते ।। १९ ।।

'देवानां प्रतिष्ठे स्थः' इत्यनेन मन्त्रेणोपानहावातिष्ठति । 'दिवश्छद्मासि' इति छत्रमादत्ते गृह्णाति ।। १९ ।।

'वेणुरसि वानस्पत्योऽसि सर्वतो मा पाहि' इति वैणवं दण्डम् ।। २० ।।

'वेणुरसि' इत्यनेन मन्त्रेण वैणवं दण्डं गृह्णाति ।। २० ।।

'आयुष्यम्' (ऋ० खि० १०. १२८. २) इति सूक्तेन मणिं कण्ठे प्रतिमुच्योष्णीषं कृत्वा तिष्ठन् समिधमादध्यात्[1] ।। २१ ।।

'आयुष्यम्' इति सूक्तेन मणिं कण्ठे प्रमुञ्चति आबध्नाति । सूक्तग्रहणं कथं कृत्स्नेन सूक्तेन मणेराबन्धनं स्यादिति । प्रतिमुच्योष्णीषं करोति। अहतेन वाससा शिरो वेष्टयति । कृत्वा तिष्ठन् समिधमादधाति । यासौ समिदाहुता तां तिष्ठन् समिधमादधाति ।। २१ ।।

---

[1] According to the printed editions here ends the *kaṇḍikā* 8 and the rest of the *sūtra-s* form *kaṇḍikā* 9. But see note at the end of the chapter.

['स्मृतं च मे अस्मृतं च मे तन्म उभयव्रतम्' ।][1]
स्मृतं निन्दा च विद्या च श्रद्धा प्रज्ञा च पञ्चमी ।
इष्टं दत्तमधीतं च कृतं सत्यं श्रुतं व्रतम् ।।

'यदग्नेः सेन्द्रस्य सप्रजापतिकस्य सऋषिकस्य सऋषिराजन्यस्य सपितृकस्य सपितृराजन्यस्य समनुष्यस्य समनुष्यराजन्यस्य साकाशस्य सातीकाशस्य सानूकाशस्य सप्रतीकाशस्य सदेवमनुष्कस्य सगन्धर्वाप्सरस्कस्य सहारण्यैश्च पशुभिर्ग्राम्यैश्च यन्म आत्मन आत्मनि व्रतं तन्मे सर्वव्रतमिदमहमग्ने सर्वव्रतो भवामि' स्वाहेति ।। २२ ।।

स्मृतं च म इत्यादिना सर्वव्रतो भवामि स्वाहेत्येवमन्तेन मन्त्रेण समिधमादधाति ।। २२ ।।

'ममाग्ने वर्चः' (ऋ० सं० १०. १२८. १) **इति प्रत्यृचं समिधोऽभ्यादध्यात् ।। २३ ।।**

ममाग्ने वर्च इत्यर्वाञ्चमिन्द्रमित्येका । प्रत्यृचं समिधोऽभ्यादध्यात् । तत्रैतत् सूक्तं नवर्चमनुक्रमितम् । दशमीमपि केचित् पठन्ति । किं तया होमः कर्तव्यो न कर्तव्य इति तत्र संशयः । 'एतस्य समाम्नायस्य' इति (आ० श्रौ० १. १. १) वचनान्न प्राप्नोति । नेत्युच्यते । विताने एतस्य समाम्नायस्येति परिग्रहः । कथं गम्यते । तत्र खिलानां कृत्स्नशः पाठात् । इह तु

---

[1] This *mantra* is not written in MSS. But from the *bhāṣya* it appears to be in the *sūtra*. So it is in practice as well as in all *prayoga* texts. Nārāyaṇa also notes that the *mantra* is to be read in this way.

सर्वपरिग्रहः । कथं ज्ञायते । यस्मात् खैलिकानामुपदेशं करोति 'यमृत्विजो बहुधा कल्पयन्ते' (१. १३. ५) इत्यत्र । तस्मादिह दशभिर्होमः कर्तव्यः । अतश्च ज्ञायते यथेह दश भवन्तीति । येन 'आयुष्यमिति सूक्तेन' (३. ८. २१) इत्युपदेशं करोति ।। २३ ।।

यत्रैनं पूजयिष्यन्तो भवन्ति तत्रैतां रात्रिं वसेत् ।। २४ ।।

यत्र मन्यते पूजयिष्यन्ति मामेत इति तत्रैतामुपस्थितां रात्रिं वसेत् वसतिं कुर्यात् । कथं पुनरसौ पूजयितव्यः । मधुपर्केण । 'स्नातकायोपस्थिताय' (१. २४. २) इति वचनात् पूजयितव्यो भवति ।। २४ ।।

विद्यान्ते गुरुमर्थेन निमन्त्र्य कृत्वानुज्ञातस्य वा स्नानम् ।। २५ ।।

स्नानं कर्तव्यम् । तत्र द्वादशानां वर्षाणामन्ते विद्याग्रहणान्ते वा गुर्वर्थं करोति पश्चात् स्नानमिति । विद्याया अन्ते गुरुमर्थेन निमन्त्रयेत किमहं करवाणीति तेनोक्तमर्थमाहृतं कृत्वा स्नानं करोति । अथवानुज्ञातः स्नानं करोति । ननु च प्रागुक्तास्त्रिविधाः स्नातका भवन्तीति । तेषु द्वयोरेतत् स्नानमुपदिश्यते । कयोः । विद्यास्नातकस्य विद्याव्रतस्नातकस्य । कस्मात् तौ विद्याया अन्तं गतवन्तौ भवतः । नेतरस्य । असमाप्तविद्यत्वान्न प्राप्नोति । नेत्युच्यते । नात्र विद्यापरिसमाप्तौ स्नानं चोद्यते । किं तर्हि । अन्ते चोद्यते । तेनासावपि मध्यमुत्सृज्यान्तमध्येष्यते । तेनासावप्यन्तगतो भवति । तस्मात् त्रिविधस्यापि स्नानं वेदान्ते भविष्यति ।। २५ ।।

तस्यैतानि व्रतानि भवन्ति ।। २६ ।।

एतानि व्रतानि भवन्ति यानि वक्ष्यामः । तानि व्रतानि यावज्जीवं स्नातकस्य ।। २६ ।।

न नक्तं स्नायात् ॥ २७ ॥

रात्रौ स्नानप्रतिषेधः ॥ २७ ॥

न नग्नः स्नायात् ॥ २८ ॥

अवाससः स्नानप्रतिषेधः ॥ २८ ॥

न नग्नः शयीत ॥ २९ ॥

न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनात् ॥ ३० ॥

मैथुनादन्यत्र नग्नायाः स्त्रिया ईक्षणप्रतिषेधः ॥ ३० ॥

वर्षति न धावेत् ॥ ३१ ॥

द्रुतगमनप्रतिषेधः ॥ ३१ ॥

न वृक्षमारोहेत् ॥ ३२ ॥

वृक्षारोहणप्रतिषेधः ॥ ३२ ॥

न कूपमवरोहेत् ॥ ३३ ॥

कूपावरोहणं च न कुर्यात् ॥ ३३ ॥

न बाहुभ्यां नदीं तरेत् ॥ ३४ ॥

न संशयमभ्यापद्येत ॥ ३५ ॥

वर्षति न धावेदित्येवमादिप्रतिषेधो न कर्तव्यः । कस्मात् । न संशयमभ्यापद्येतेत्येतेनैव सिद्धत्वात् । न संशयमभ्यापद्येतेत्येतावत्येवोच्यमाने संशयः स्यात् । किं प्राणसंशयं नाभ्यापद्येत उतार्थसंशयमिति । एतस्मिन् संदिह्यमानेऽयं प्रतिषेधः क्रियते । एवमादिसंशयं नाभ्यापद्येतेत्येतदुक्तं भवति ॥ ३५ ॥

महद्वै भूतं स्नातको भवतीति विज्ञायते ।। ३६ ।।

यस्मान्महद्भूतं स्नातकः तस्मात् संशयं नाभ्यापद्येतेत्युच्यते ।। ३६ ।।

इति तृतीये अष्टमी कण्डिका[1]

गुरवे प्रस्त्रक्ष्यमाणो नाम प्रब्रुवीत ।। १ ।।

गुरवे प्रब्रुवीत प्रस्त्रक्ष्यमाणो विस्त्रक्ष्यमाणः । को विस्त्रक्षन् भवति । शिष्य आचार्येणातिसृज्यते—गच्छ पुत्र गृहानिति । असौ विस्त्रक्ष्यमाणः नाम प्रब्रवीति । कस्य नाम ब्रूते । तत्रैके आत्मनो नामेति । आचार्यस्य नाम नोपपद्यते । कस्मात् । आत्मनो नामासौ जानीते । ननु चाचार्यस्यापि जानीते । एतावन्तं कालमुषित्वा आचार्यस्य स्वं नाम प्रख्यापयतीति तदेतन्नोपपद्यते । तस्मान्न वक्तव्यमात्मनो नाम । आचार्यस्य नाम वक्तव्यम् । कथं ज्ञायते । उपांशुप्रयोगदर्शनादुत्तरेण वाक्येन संबन्धाच्च । यज्ञदत्त इदं वत्स्यावो[2] भो इति । यदा आत्मनो नाम ब्रूयात् तदोत्तरेण वाक्येन संबन्धो नोपपद्यते । तस्मादाचार्यस्य नामोपदेष्टव्यम् । ननु चोक्तं नामासौ जानीत इति तच्छिष्यस्यापि जानाति तस्मादहेतुरयम् ।। १ ।।

इदं वत्स्यावो[1] भो इति । उच्चैरूर्ध्वं नाम्नः ।। २ ।।

इदमिति सर्वनामनिर्देशः । अस्य स्थाने आश्रमान्तरं निर्दिशति । गार्हस्थ्यं वत्स्याव[2] इति । एवं नाम्न ऊर्ध्वमुच्चैराह । तत्र वत्स्याव[2] इति एकस्य द्विवचनं नोपपद्यते । एवं कृत्वा पाठान्तरं कुर्वन्ति । इदं वत्स्याव[1] इति आवामेतावन्तं कालमुषितवन्तौ सांप्रतं तु[3] विवत्स्यावः[2] । उच्चैरिति न

---

[1] The MSS. A, C, D end here. For the further portion only one MS., namely B is available. [2] MS. reads so—dual everywhere. [3] B adds—अद्य ।

वक्तव्यम् । कस्मात् । अर्थप्राप्तत्वात् । जापादीनामुपांशुत्वं विहितम् । न चात्र जापादिलक्षणत्वमुपांशुत्वं प्राप्नोति । तस्मादुच्चैरेव भविष्यति । एवं सिद्धे नाम्न ऊर्ध्वं यदुच्चैस्त्वं विदधाति तज्ज्ञापयति नाम उपांशु भवतीति । ऊर्ध्वं नाम्न इति न वक्तव्यम् । कस्मात् । क्रमादूर्ध्वमेव नाम्नो भवतीति । एवं सति यद्यूर्ध्वग्रहणं न क्रियते न स्यादूर्ध्वं नाम्नः । किंतु सह नाम्ना तदुच्चैः स्यात् । उच्चैर्ग्रहणं चैतदर्थमेव कल्प्यते । तस्मादूर्ध्वं नाम्न इति वक्तव्यम् । यस्माद्यत्नेनोपांशुत्वं विदधाति नाम्नः तज्ज्ञापयति गुरोर्नामादेष्टव्यमिति ॥ २ ॥

प्राणापानयोरुपांशु ॥ ३ ॥

प्राणापानयोरित्येतन्मन्त्रमुपांशु ब्रूते ॥ ३ ॥

'आ मन्द्रैरिन्द्र हरिभिः' (ऋ० सं० ३. ४५. १) **इति च ॥ ४ ॥**

आ मन्द्रैरिन्द्र हरिभिः इत्येतामृचं चोपांशु ब्रूते । तत्रोपांशुग्रहणं न कर्तव्यम् । कस्मात् । सिद्धत्वात् । कथं सिद्धमिति । उत्तरत्र वक्ष्यति— अतो वृद्धो जपतीति । एवमुपांशुत्वे सिद्धे यत् पुनरुपांशुत्वं विदधाति तज्ज्ञापयति जापलक्षणमुपांशुत्वं गृह्यकर्मण्यनित्यं भवतीति । 'उदपात्रे दर्भान् कृत्वा ब्रह्माञ्जलिकृतो जपेत् । ओं पूर्वा व्याहृतयः' (३. ५. ६) इत्यस्य उच्चैःप्रयोगः सिद्धो भवति ॥ ४ ॥

अतो वृद्धो जपति 'प्राणापानयोरुरुव्यचास्तया प्रपद्ये देवाय सवित्रे परिददामि' इति ॥ ५ ॥

एतौ मन्त्रौ वृद्धो जपति । वृद्धः कः । आचार्य उच्यते । तत्र वृद्धो जपतीति न वक्तव्यम् । सिद्धत्वात् । कथम् । उत्तरत्र एककर्तृकोपदेशात् । उच्यते । शिष्याधिकारादिह वृद्धग्रहणम् । अथवा नियमार्थमतो वृद्धो

जपतीति । तेन नियमं कुर्वन्नुत्तरत्र दर्शयति द्वयोर्जपोऽयं यथा स्यादिति । प्राणापानयोरिति कृत्स्नो मन्त्रः पठ्यते ।। ५ ।।

ऋचं च समाप्योंं प्राक्स्वस्तीति जपित्वा 'महि त्रीणाम्' (ऋ० सं० १०. १८५. १) **इत्यनुमन्त्र्य ।। ६ ।।**

'महि त्रीणामवोऽस्तु' इत्यनेनाभिमन्त्र्यातिसृजेत् । कथम् । विवसिष्याव विवत्स्याव इति वा ।। ६ ।।

एवमतिसृष्टस्य न कुतश्चिद् भयं भवतीति विज्ञायते । ।। ७ ।।

किमर्थं श्रुत्याकर्षणं क्रियते । कथमन्यस्मिन्नपि काले अनेन विधिना विवसनं स्यादिति ।। ७ ।।

वयसाममनोज्ञा वाचः श्रुत्वा 'कनिक्रदज्जनुषं प्रब्रुवाणः' (ऋ० सं० २. ४२. १) **इति सूक्ते जपेत् । 'देवीं वाचमजनयन्त देवाः'** (ऋ० सं० ८. १००. ११) **इति च ।।८।।**

वयसः पक्षिण इत्युच्यन्ते । तेषां वाचः अमनोज्ञाः श्रुत्वा एते सूक्ते जपेत् । एतां च ऋचम् । ।। ८ ।।

'स्तुहि श्रुतं गर्तसदं युवानम्' (ऋ० सं० २. ३३. ११) **इति मृगस्य ।। ९ ।।**

अमनोज्ञा वाचः श्रुत्वा मृगस्य तामृचं जपेत् ।। ९ ।।

यस्या दिशो बिभीयाद् यस्माद्वा तां दिशमुल्मुकमुभयतः प्रदीप्तं प्रत्यस्येन्मन्थं वा प्रसव्यमालोड्य

'अभयं मित्रावरुणा मह्यमस्त्व-
र्चिषा शत्रून् दहतं प्रतीत्य ।
मा ज्ञातारं मा प्रतिष्ठां विन्दन्तु
मिथो भिन्दाना उपयन्तु मृत्युम्' इति ।

'संसृष्टं धनमुभयं समाकृतम्' (ऋ० सं० १०. ८४. ७) **इति मन्थं न्यञ्चं करोति ।। १० ।।**

यस्या दिशो भयमुत्पद्यते यस्माद्वा पुरुषात् तां दिशमुल्मुकमुभयतः प्रदीप्तं प्रत्यस्येत् क्षिपेदित्यर्थः । मन्थं च प्रसव्यमालोड्य उल्मुकेन प्रत्यस्येत् अभयं मित्रावरुणेत्यनेन मन्त्रेण । संसृष्टमित्यनया ऋचा मन्थं न्यञ्चं करोति । अधः करोतीत्येतदुक्तं भवति ।। १० ।।

इति तृतीये नवमी कण्डिका

सर्वतो भयादनाज्ञातादष्टावाज्याहुतीर्जुहुयात्––'पृथिवी वृता साग्निना वृता तया वृतया वर्व्या यस्माद् भयाद् बिभेमि तद् वारये स्वाहा'। 'अन्तरिक्षं वृतं तद् वायुना वृतं तेन वृतेन वर्त्रेण यस्माद् भयाद् बिभेमि तद् वारये स्वाहा'। 'द्यौर्वृता सादित्येन वृता तया वृतया वर्व्या यस्माद् भयाद् विभेमि तद् वारये स्वाहा'। 'दिशो वृतास्ताश्चन्द्रमसा वृतास्ताभिर्वृताभिर्वर्त्रीभिर्यस्माद् भयाद् बिभेमि तद् वारये स्वाहा'। 'आपो वृतास्ता वरुणेन वृतास्ताभि-र्वृताभिर्वर्त्रीभिर्यस्माद् भयाद् बिभेमि तद् वारये स्वाहा'। 'प्रजा वृतास्ताः प्राणेन वृतास्ताभिर्वृताभिर्वर्त्रीभिर्यस्माद् भयाद् बिभेमि तद् वारये स्वाहा'। 'वेदा वृतास्ते छन्दोभिर्वृतास्तैर्वृतैर्वर्त्रैर्यस्माद् भयाद् बिभेमि तद् वारये स्वाहा'। 'सर्वं वृतं तद् ब्रह्मणा वृतं तेन वृतेन वर्त्रेण यस्माद् भयाद् बिभेमि तद् वारये स्वाहा' इति ।।१।।

सर्वतोऽनाज्ञातात् सर्वासु दिक्षु यद् भयमुत्पद्यते न च ज्ञायते कस्मात् पुरुषादिति यतो वेति तत् सर्वतो भयमनाज्ञातं भवति। तस्माद् यो विभेति स एता अष्टावाज्याहुतीर्जुहुयात्। पृथिवी ते वृतेत्येवमादिभिर्मन्त्रैः। संख्यावचनमष्टाविति आज्यभागस्विष्टकृन्निवृत्त्यर्थम्। आज्यग्रहणमाज्यहोमधर्मप्राप्त्यर्थम् ॥ १ ॥

अथापराजितायां दिश्यवस्थाय स्वस्त्यात्रेयं जपति ॥ २ ॥

अपराजितायां दिशि स्थित्वा स्वस्त्यात्रेयऋषिं जपति प्राक् पूर्णपात्रनिनयनात् ॥ २ ॥

'यत इन्द्र भयामहे' (ऋ० सं० ८. ६१. १३) **इति च सूक्तशेषम् ॥ ३ ॥**

जपति ॥ ३ ॥

इति तृतीये दशमी कण्डिका

संग्रामे समुपोळ्हे राजानं संनाहयेत् ॥ १ ॥

युद्धे समुपस्थिते पुरोहितो राजानं संनद्धं करोति ॥ १ ॥

'आ त्वाहार्षमन्तरेधि' (ऋ० सं० १०. १७३. १) **इति पश्चाद्रथस्यावस्थाय ॥ २ ॥**

पश्चाद्रथस्य स्थित्वा आ त्वाहार्षमिति जपति। पादग्रहणेऽपि लिङ्गात् सूक्तग्रहणं भवति ॥ २ ॥

'जीमूतस्येव भवति प्रतीकम्' (ऋ० सं० ६. ७५. १) **इति कवचं प्रयच्छेत् ॥ ३ ॥**

जीमूतस्येत्यनया ऋचा कवचं प्रयच्छेत् दद्याद्राज्ञे । कवचं नाम संनहनविशेषः कश्चित् लोकप्रसिद्धः ।। ३ ।।

उत्तरया धनुः ।। ४ ।।

किम् । प्रयच्छति धनुः । का पुनरत्रोत्तरा । 'धन्वना गाः' (ऋ० सं० ६. ७५. २) इत्येषा ।। ४ ।।

उत्तरां वाचयेत् ।। ५ ।।

राजानं वाचयति 'वक्ष्यन्तीव' (ऋ० सं० ६. ७५. ३) इत्येताम् ।। ५ ।।

स्वयं चतुर्थीं जपेत् ।। ६ ।।

तस्य सूक्तस्य या चतुर्थी ऋक् तां स्वयं जपति 'ते आचरन्ती' (ऋ० सं० ६. ७५. ४) इत्येताम् ।। ६ ।।

पञ्चम्येषुधिं प्रयच्छेत् ।। ७ ।।

पञ्चम्या इषुधिं प्रयच्छति । इषवो यत्र निधीयन्ते स इषुधिः । 'बह्वीनां पिता' (ऋ० सं० ६. ७५. ५) इत्यनया तं प्रयच्छति ।। ७ ।।

अभिप्रवर्तमाने षष्ठीम् ।। ८ ।।

अभिप्रवर्तमाने रथे षष्ठीमृचं जपति 'रथे तिष्ठन्' (ऋ० सं० ६. ७५. ६) इत्येताम् ।। ८ ।।

सप्तम्याश्वान् ।। ९ ।।

सप्तम्या चानुमन्त्रयते 'तीव्रान् घोषान्' (ऋ० सं० ६. ७५. ७) इत्यनया ।। ९ ।।

अष्टमीमिषूनवेक्षमाणं वाचयति ।। १० ।।

इषूनवेक्षमाणमष्टमीं वाचयति 'रथवाहनं हविः' (ऋ० सं० ६. ७५. ८) इत्येताम् ।। १० ।।

'अहिरिव भोगैः पर्येति बाहुम्' (ऋ० सं० ६. ७५. १४) इति तलं नह्यमानम् ।। ११ ।।

अहिरिव भोगैरित्यनया तलं नह्यमानं वाचयति ।। ११ ।।

अथैनं सारयमाणमुपारुह्याभीवर्तं वाचयति । 'प्र यो वां मित्रावरुणा' (ऋ० सं० ८. १०१. ३) इति च द्वे ।। १२ ।।

नियन्ता[1] एतस्मिन् काले रथमसौ सारयति । तं सारयमाणमुपारुह्याभीवर्तं वाचयति । 'अभीवर्तेन हविषा' (ऋ० सं० १०. १५४. १) इति 'प्र यो वां मित्रावरुणा' इति च द्वे ऋचौ वाचयति ।। १२ ।।

अथैनमन्वीक्षेताप्रतिरथशाससौपर्णैः ।। १३ ।।

तं गच्छमानमीक्षेत अप्रतिरथशाससौपर्णैः ।। १३ ।।

तत्र सौपर्णबहुत्वान्निर्देशः क्रियते —

'प्र धारयन्तु मधुनो घृतस्य' (ऐ. ब्रा० ६. २५. ७) इत्येतत् सौपर्णम् ।। १४ ।।

सर्वा दिशोऽनु परियायात् । आदित्यमौशनसं वास्थाय प्रयोधयेत् ।। १५ ।।

सर्वा दिशः परीत्य यस्यां दिशि आदित्यः शुक्रो वा तां दिशं प्रतिष्ठाय प्रयोधयेत् । नापि प्रत्यादित्यं नापि प्रतिशुक्रम् ।। १५ ।।

---

[1] नयति—B.

'उप श्वासय पृथिवीमुत द्याम्' (ऋ० सं० ६. ४७. २९) **इति तृचेन दुन्दुभिमभिमृशेत् ।। १६ ।।**

उप श्वासयेत्यनेन तृचेन दुन्दुभिमभिमृशेत् राजा ।। १६ ।।

'अवसृष्टा परापत' (ऋ० सं० ६. ७५. १६) **इतीषून् विसर्जयेत् ।। १७ ।।**

अवसृष्टेत्यनया क्षिपेदिषून् ।। १७ ।।

'यत्र बाणाः संपतन्ति' (ऋ० सं० ६. ७५. १७) **इति युध्यमानेषु जपेत् ।। १८ ।।**

यत्र बाणा इत्येतामपि युध्यमानेषु जपति पुरोहितः ।। १८ ।।

संशिष्याद्वा संशिष्याद्वा ।। १९ ।।

अथवा न स्वयं जपति । तमेव क्षत्रियं शिष्यात् । संदिशेदित्यर्थः । दुन्दुभ्यभिमर्शनात् प्रभृति इदं त्वया कर्तव्यमित्युक्त्वा प्रहारभयादपक्रमेत । अन्ये पुनराहुः—एतत् त्वया कर्तव्यमिति सर्वमेव संदिशतीति । सर्वं तस्यैव भवति ।। १९ ।।

इति तृतीये एकादशी कण्डिका

इत्याश्वलायनगृह्यभाष्ये तृतीयोऽध्यायः[1] ।

[1] B adds: अथातः पञ्चयज्ञा एकादश । This shows that according to the tradition followed in the MS. the third chapter is divided into eleven, not twelve, *kaṇḍikā-s* as is found in printed editions.

चतुर्थोऽध्यायः

आहिताग्निश्चेदुपतपेत् प्राच्यामुदीच्यामपराजितायां वा दिश्युदवस्येत् ॥ १ ॥

उपतपेदिति व्याधितः । प्राच्यामुदीच्यामपराजितायां वा दिश्युदवस्येत् गच्छेदित्यर्थः ॥ १ ॥

कस्मात्—

ग्रामकामा अग्नय इत्युदाहरन्ति ॥ २ ॥

केचिद् ब्रह्मवादिनः । यस्माद् ग्रामकामा अग्नयस्तस्मादसावुदवस्येदिति ॥ २ ॥

आशंसन्त एनं ग्राममाजिगमिषन्तोऽगदं कुर्युरिति ह विज्ञायते ॥ ३ ॥

ग्राममाजिगमिषन्तोऽग्नय एनमगदं कुर्युरित्येवं ब्राह्मणे श्रूयते । तस्मात् कारणादाहिताग्निरुदवस्येदिति ॥ ३ ॥

अगदः सोमेन पशुनेष्टयेष्ट्वावस्येत् ॥ ४ ॥

अगदः सन् सोमादिभिः कर्मभिरिष्ट्वावस्येत् ग्रामं गच्छेत् । तत्र संशयः—सोमेनेति कः सोमः कार्यः । तत्र प्रदर्शितमेतत् प्राकृतमेव कार्यम् । 'स एव हेतुः प्रकृतिभावे' (आ० श्रौ० १२. १५. १२) इति वचनात् । पशुः कार्यः । किम् । ऐन्द्राग्नः । कस्मात् । प्रकृतित्वात् पशूनाम् । उक्तं च प्राक् 'देवतागमे नित्यानामपायः' (आ० श्रौ० २. १. २२) इति । अनागमे नित्यानामनपाय आगमे नित्यानामपाय इति । एवमेव इष्टौ

प्राकृता एव देवता भवन्ति। अथ त्रीणि हवींषि भवन्तीति। नेत्युच्यते। एकमाग्नेयं हविर्भवतीति। कस्मात्। मुख्यत्वात्। न च कर्मसमुदायो निर्दिश्यते। एकस्य कर्मणो निर्देशः। तस्मादाग्नेयेष्टिः कर्तव्या ॥ ४ ॥

अनिष्ट्वा वा ॥ ५ ॥

अनिष्ट्वा वावस्येत् ॥ ५ ॥

संस्थिते भूमिभागं खानयेत् ॥ ६ ॥

तत्र संस्थितवचनाद् गम्यते यथा मृत्युः पुनरनतिक्रमणीय इति। यदप्येतदुक्तं कर्म तेन न मृत्युः शक्येत जेतुम्। भूमिभागं खानयेत् अवदारयेदित्यर्थः ॥ ६ ॥

दक्षिणपूर्वस्यां दिशि दक्षिणापरस्यां वा ॥ ७ ॥

कुतः। यस्मिन् स्थानेऽसावुदवस्यति ॥ ७ ॥

[1]**[दक्षिणाप्रवणं प्राग्दक्षिणाप्रवणं वा। प्रत्यग्दक्षिणाप्रवणमित्येके] ॥ ८ ॥**

यावानुद्बाहुकः पुरुषस्तावदायामम् ॥ ९ ॥

यावानुद्बाहुकः पुरुषः तावत्परिमाणमायामं खानयेत् ॥ ९ ॥

व्याममात्रं तिर्यक् ॥ १० ॥

व्यामपरिमाणं खानयेत् तिर्यक् ॥ १० ॥

वितस्तिमवाक् ॥ ११ ॥

---

[1] For the *bhāṣya* on this *sūtra* see below IV. 3. 25.

अधो वितस्तिपरिमाणं खानयेदिति ॥ ११ ॥

अभितआकाशं श्मशानम् ॥ १२ ॥

अभितआकाशं भवति श्मशानम् । श्मशानशब्दग्रहणं किमर्थम् । तदेवाधिकृतम् । अन्यदपि श्मशानं कथं सर्वतआकाशं स्यादिति । किं पुनरन्यत् । यत्रास्थीनि निधीयन्ते तस्यैतल्लक्षणं सिद्धं भवति । अभित आकाशमित्येवं ब्रुवन् मध्ये तदनाकाशं भवतीति ज्ञाप्यते ॥ १२ ॥

बहुलौषधिकम् ॥ १३ ॥

भवति ॥ १३ ॥

कण्टकिक्षीरिणस्त्वति यथोक्तं पुरस्तात् ॥ १४ ॥

तथा कर्तव्यम् । 'समूलान् परिखाय' (२. ७. ५) इत्येवमादि ॥ १४ ॥

[यत्र सर्वत आपः प्रध्वंसेरन्नेतदादहनस्य लक्षणं श्मशानस्य ॥ १५ ॥

केशश्मश्रुलोमनखानीत्युक्तं पुरस्तात् ॥ १६ ॥][1]

विगुल्फं बर्हिः ॥ १७ ॥

वह्वित्ययमर्थः । बहु कार्यम् ॥ १७ ॥

आज्यं च ॥ १८ ॥

तच्च बहु कार्यम् ॥ १८ ॥

---

[1] The *bhāṣya* on these two *sūtra-s* is found at IV. 3. 25.

दधन्यत्र सर्पिरानयन्ति । एतत् पित्र्यं पृषदाज्यम् ॥१६ ॥

[1]पित्र्यमिति संज्ञाकरणं ‘ निष्पुरीषमेके कृत्वा पृषदाज्यस्य पूरयन्ति ’ (आ०. श्रौ. ६. १०. ५) इत्यत्रापि कथमेतस्य ग्रहणं स्यादिति ॥ १६ ॥

इति चतुर्थे प्रथमा कण्डिका

अथैतां दिशमग्नीन् नयन्ति ॥ १ ॥

यस्यां दिशि भूमिभागः खातः तां दिशमग्नीन् नयन्ति बान्धवाः ॥ १ ॥

यज्ञपात्राणि च ॥ २ ॥

एतामेव दिशं नयन्ति ॥ २ ॥

अन्वञ्चं प्रेतमयुजोऽमिथुनाः प्रवयसः ॥ ३ ॥

यज्ञपात्राणामन्वञ्चं पृष्ठतः प्रेतं नयन्ति अयुजो विषमाः स्त्रियो वा पुमांसः प्रवयसः प्रगतवयसः वृद्धाः ॥ ३ ॥

पीठचक्रेण गोयुक्तेनेत्येके ॥ ४ ॥

पीठचक्रेणेति केचिद् योगविभागं कुर्वन्ति । नित्यं पीठचक्रेण नीयते तेषां गोयुक्तेनागोयुक्तेन वा । अपरे पीठचक्रेण गोयुक्तेनेत्येके इति । यदा पीठचक्रेण तदा गोयुक्तेन । एवं पीठचक्रविकल्प उपपद्यते । आचरितत्वादयमेव पक्षः ॥ ४ ॥

अनुस्तरणीम् ॥ ५ ॥

---

[1] Here is added in the MS.: प्राक्प्रवणमित्येवमादीनि प्रमादादनुदाहृतानि । उत्तरत्र . . . तद्वक्ष्यामः । This must refer to the *sūtra* 8 above. See below IV. 3. 25.

प्रेतमनुस्तीर्यत इत्यनुस्तरणी ताम् ॥ ५ ॥

गाम् ॥ ६ ॥

तामनुस्तरणीं गामिच्छन्ति ॥ ६ ॥

अजां वैकवर्णाम् ॥ ७ ॥

अजां वा एकवर्णां तामनुस्तरणीमिच्छन्ति ॥ [1]अन्वञ्चग्रहणं प्राक् । तत्र चोदितम्—ननूपदेशादेव पृष्ठतोभावः सिध्यति । किमर्थमन्वञ्चग्रहणं करोति । तज्ज्ञापयति—नोपदेशादेव पात्राणामुपरिभाव इति । तेन किं सिद्धं भवति । अग्नयो वा प्रथमं यज्ञपात्राणि वा प्रथमम् ॥ ७ ॥

[1] This refers to the *sūtra* 3 above.

कृष्णामेके ॥ ८ ॥

कृष्णामेके अजां मन्यन्ते अनुस्तरणीम् । अनुस्तरणी याकाचिदेकवर्णेत्येके । केचित् कृष्णवर्णेति । एवमनुस्तरणी नित्यविहिता । अन्येषां तु विकल्पेन विहिता । 'न वास्थिसंदेहात्' (का० श्रौ० २५. ७. ३८) इति तं पक्षमनुविधातुमिच्छन्तोऽन्यथा कुर्वन्ति । एकसूत्रतां कुर्वन्ति—अनुस्तरणीमेके । एवं कृत्वा व्यवधानेन योजनं कुर्वन्ति । एवमनुस्तरण्या एकीयपक्षे क्रिया भवति यदा तदा गामजां वा कृष्णां कुर्वन्ति । ननु एकवर्णग्रहणमतिरिच्यते । न । कृष्णामित्युक्ते कृष्णप्रायापि स्यात् । तन्निवृत्त्यर्थमेकवर्णामिति । अनन्यसंयुक्तां कृष्णामेव कुर्वन्ति ॥ ८ ॥

सव्ये बाहौ बद्ध्वानुसंकालयन्ति ॥ ९ ॥

पृष्ठतो नयन्ति ॥ ९ ॥

अन्वञ्चोऽमात्या अधोनिवीताः प्रवृत्तशिखा ज्येष्ठप्रथमाः कनिष्ठजघन्याः ॥ १० ॥

बान्धवास्ते पृष्ठतो गच्छन्ति । अधोनिवीता अनुपरिस्थितवासस उच्यन्ते अपरे यज्ञोपवीतमधः कर्तव्यमिति । प्रवृत्तशिखा विमुक्तकेशाः । ज्येष्ठप्रथमाः कनिष्ठजघन्या गच्छेयुः। तत्र कनिष्ठजघन्या इति न वक्तव्यम् । ज्येष्ठप्रथमा इत्युक्तत्वात् कनिष्ठजघन्या भवन्ति । वक्तव्यमेव । ज्येष्ठ-प्रथमा इत्युक्ते सर्वेषां यो ज्येष्ठ स प्रथमः स्यात् इतरेषामनियमः । यो यथा ज्येष्ठः स तथा कथं स्यात् यो यथा जघन्यः स कथं पृष्ठतः स्यात् इत्येषानुपूर्वी उभयवचनादृते न सिध्यति । तस्मादुभयवचनं वक्तव्यमेवेति ।। १० ।।

प्राप्यैतं भूमिभागं कर्तोदकेन शमीशाखया त्रिः प्रसव्य-मायतनं परिव्रजन् प्रोक्षति 'अपेत वीत वि च सर्पतातः' (ऋ० सं० १०. १४. ९) **इति ।। ११ ।।**

प्राप्यैतं भूमिभागं कर्तोदकेन शमीशाखया । अपरे गर्तोदकेनेति । गर्त उदकं गर्तोदकमिति जानुमात्रं गर्तं खात्वा अत्रोदकेनेति । शमीशाखया च त्रिः प्रसव्यं परिव्रजन् प्रोक्षति—अपेत वीतेत्यनया । मन्त्रस्याभ्या-वृत्तिरुक्ता ।। ११ ।।

दक्षिणपूर्व उद्धतान्त आहवनीयं विदधाति ।। १२ ।।

दक्षिणपूर्वे देशे उद्धतान्ते आहवनीयं निदधाति । तत्र केचिदुद्धतान्तात् बहिरिति ।। १२ ।।

उत्तरपश्चिमे गार्हपत्यम् ।। १३ ।।

उद्धतान्त इत्यनुवर्तते ।। १३ ।।

दक्षिणपश्चिमे दक्षिणाग्निम् ।। १४ ।।

निदधाति । उद्धतान्त इत्येव ।। १४ ।।

अथैनमन्तर्वेदीध्मचितिं चिनोति यो जानाति ।। १५ ।।

अथैनमन्तर्वेदि इध्मचितिं चिनोति । कः । कर्ता अन्यो वा योजनाभ्युपायं यो जानीते स चिनोति ।। १५ ।।

तस्मिन् बर्हिरास्तीर्य कृष्णाजिनं चोत्तरलोम तस्मिन् प्रेतं संवेशयन्त्युत्तरेण गार्हपत्यं हृत्वाहवनीयमभिमुखशिरसम् ।। १६ ।।

तस्मिन् बर्हिरास्तृणाति । कृष्णाजिनं चोत्तरलोम ऊर्ध्वलोमेति । तस्मिन् प्रेतं संवेशयन्ति । तस्मिन् कृष्णाजिने प्रेतं संवेशयन्ति । उत्तरेण गार्हपत्यं हृत्वा आहवनीयं चाभिमुखशिरसं संवेशयन्ति ।। १६ ।।

उत्तरतः पत्नीम् ।। १७ ।।

प्रेतस्योत्तरतः पत्नीं संवेशयन्ति ।। १७ ।।

धनुश्च क्षत्रियाय ।। १८ ।।

क्षत्रियाय धनुश्चोत्तरतः स्थापयेत् ।। १८ ।।

तामुत्थापयेद् देवरः पतिस्थानीयोऽन्तेवासी जरद्दासो वा 'उदीर्ष्व नार्यभि जीवलोकम्' (ऋ० सं० १०. १८. ८) **इति ।। १९ ।।**

तामुत्थापयेत् यो देवरः पतिद्वितीयः । पतिस्थानमर्हति यः स पतिस्थानीयोऽन्तेवासी शिष्यो वा जरद्दासो वा कुलानुरूप इत्यर्थः । तां पत्नीमुत्थापयेदुदीर्ष्व नारीत्यनेन ।। १९ ।।

कर्ता वृषले जपेत् ।। २० ।।

यदैनां वृषल उत्थापयेत् तदा कर्ता जपेन्मन्त्रम् ।। २० ।।

'धनुर्हस्तादाददानो मृतस्य' (ऋ० सं० १०. १८. ९) इति धनुः ॥ २१ ॥

धनुर्हस्तादिति धनुरपनयेत् ॥ २१ ॥

उक्तं वृषले ॥ २२ ॥

कर्ता जपेदित्ययमर्थः ॥ २२ ॥

अधिज्यं कृत्वा संचितिमचित्वा संशीर्यानुप्रहरेत् ॥ २३ ॥

अधिज्यम् उपरिज्यमिति । संचितिमचित्वा । संचयनादूर्ध्वं चेदमर्थप्राप्तम् । तदकृत्वा संशीर्य भङ्क्त्वा अनुप्रहरेत् प्रक्षिपेत् ॥ २३ ॥

इति चतुर्थे द्वितीया कण्डिका

अथैतानि पात्राणि योजयेत् ॥ १ ॥

अथैतानि पात्राणि निदध्यात् स्रुक्स्रुवादीनि । तत्र संशयः—एतानि कानि पात्राणि निर्देश्यन्त इति—किं प्राकृतान्याहोस्विद्वैकृतानीति । कस्मात् । 'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च सह' इति श्रूयते । तत्र पात्राविशेषात् । तत्रैतामेव श्रुतिं विचारयिष्यामः—किमेषा श्रुतिर्यज्ञपात्रधारणार्था आहोस्विद्विद्यमानानां विनियोगार्थेति । किं चान्यत् । अत्र किं यजमानः संस्क्रियते यज्ञपात्रैः आहोस्वित् सर्वेषां संस्कार इति । सर्वेषां संस्कार इति प्रतिपन्नाः । एवं चेत् सर्वेषां पात्राणां विनियोगः कार्यः । संस्कारत्वात् । संस्कारत्वेऽपि वैकृतानां विनियोगो न भवति । कस्मात् । एकवचनेनोपदेशात् । 'दक्षिणे हस्ते जुहूम्' इत्यादिनिर्देशोऽयं द्रष्टव्यः । संस्कार्योऽर्थः संस्कारमपेक्षते । एवं तद्यथा 'दशापवित्रेण ग्रहं संमार्ष्टि' इत्येकवचनोपदेशेऽपि यावन्तो ग्रहास्तावतां सर्वेषामेव संस्कारो भवति । तस्मादिहाप्यकारणमिति । अथ विद्यमानानां पात्राणां

विनियोग इति आहोस्वित् तदुद्धारणमिति । तत्रैवानयैव धारणमित्येके । ननु चोभयार्थं कल्पना भवतीति धारणार्था विनियोगार्था च । न द्वचर्था श्रुतिरितीह कल्प्यते । विद्यमानानां विनियोगार्था श्रुतिरेषा इति । कानि पुनर्विद्यन्ते । प्राकृतानि । वैकृतानां तु कर्मान्ते उत्सर्गः । तस्मात् प्राकृतानामेव विनियोगः । नेति । वैकृतानामपि दर्शनात् ' दत्सु ग्राव्णः ' इति । तानि सोमाधिकृतानां कर्ममध्यमरणे कृतार्थानि भविष्यन्ति । धारणाकारणमन्यदेवाश्रयितव्यम् । प्राकृतानामेव धारणं न वैकृतानाम् । किं कारणम् । सर्वार्थत्वात् तेषाम् । यानि गृह्याग्न्याधेयादुत्पद्यन्ते तानि सर्वार्थानि भवन्ति । अग्निवत् सर्वशेषत्वात् । तस्मात् तेषां धारणमुपपद्यते न वैकृतानाम् । तथैषा श्रुतिः । विद्यमानानां विनियोगे सति यानि प्राकृतानि नित्यानि वैकृतान्यपि विद्यन्ते तेषां विनियोगो भवतीति ' एतानि ' इति विद्यमानानि निर्दिश्यन्ते । तस्माद्विद्यमानानां विनियोग इति साधितम् ।। १ ।।

दक्षिणे हस्ते जुहूम् ।। २ ।।

योजयेत् । एकवचनस्याविवक्षितत्वेन अनेकामपि योजयेत् ।। २ ।।

सव्य उपभृतम् ।। ३ ।।

दक्षिणे पार्श्वे स्फ्यं सव्येऽग्निहोत्रहवणीम् ।। ४ ।।

अग्निहोत्रं यया हूयते सा अग्निहोत्रहवणी ताम् । योजयेदित्यनुवर्तते ।। ४ ।।

उरसि ध्रुवां शिरसि कपालानि दत्सु ग्राव्णः ।। ५ ।।

योजयेत् । ग्राव्णामभावे वचनमपार्थकम् । सोमलिप्तैरवभृथमवयन्तीति । अतः सोमे मृतवचनमिति । किमिदमारभ्यते । अनुत्सृष्टानां ग्राव्णाम् ।। ५ ।।

नासिकयोः स्रुवौ ॥ ६ ॥

योजयेत् ॥ ६ ॥

भित्त्वा चैकम् ॥ ७ ॥

एकं चेद् भित्त्वा योजयेत् ॥ ७ ॥

कर्णयोः प्राशित्रहरणे ॥ ८ ॥

एकत्वात् प्राशित्रहरणस्य द्विवचनं नोपपद्यते । विकृत्यपेक्षं द्विवचनम् । अथवा प्रकृतावेव प्राशित्रहरणे द्वे भवतः केषांचिदध्वर्यूणाम् ॥ ८ ॥

भित्त्वा चैकम् ॥ ९ ॥

एकं प्राशित्रहरणं भित्त्वा योजयेत् ॥ ९ ॥

उदरे पात्रीम् ॥ १० ॥

इडापात्रीमुदरे ॥ १० ॥

समवत्तधानं च चमसम् ॥ ११ ॥

निदध्यात् । चमसं समवत्तं यस्मिन् निधीयते तत् समवत्तधानं तदुदरे योजयेत् । अपरे पात्रीं दारुपात्रीं समवत्तधानमिडापात्रमिति ॥११॥

उपस्थे शम्यामरणी ऊर्वोः ॥ १२ ॥

योजयेत् ॥ १२ ॥

उलूखलमुसले जङ्घयोः पादयोः शूर्पे ॥ १३ ॥

प्राशित्रहरणवद् द्विवचनम् ॥ १३ ॥

छित्त्वा चैकम् ॥ १४ ॥

एकं वा शूर्पं छित्त्वा योजयेत् अन्यान्यपि । पात्राण्यनिर्दिष्टानि अनियतकालानि भवन्ति अनियतदेशानि च तान्यपि योजयेत् ।। १४ ।।

आसेचनवन्ति पृषादाज्यस्य पूरयन्ति ।। १५ ।।

आसेचनवन्ति पात्राणि यानि तानि पृषदाज्यस्य पूरयेत् । प्रागुक्तं पृषदाज्यम् ।। १५ ।।

अमा पुत्रो दृषदुपले ।। १६ ।।

पुत्रो दृषदुपले अमा कुर्वीत । अमा सहयोगे । सह कुर्वीतेति । गृह्णीयादिति । दृषद् उपलं च दृषदुपले ।। १६ ।।

लोहायसं च कौलालम् ।। १७ ।।

तं चामा कुर्वीत ।। १७ ।।

अनुस्तरण्या वपामुत्खिद्य शिरो मुखं प्रच्छादयेत् 'अग्नेर्वर्म परि गोभिर्व्ययस्व' (ऋ० सं० १०. १६. ७) **इति ।। १८ ।।**

कथं तस्या विशसनम् . . . इति । अन्ये त्वशासिताया इति । वपामुत्खिद्य शिरो मुखं प्रच्छादयति । प्रावारयेत् अग्नेर्वर्मेत्येतयर्चा ।। १८ ।।

वृक्का उद्धृत्य पाण्योरादध्यात् 'अति द्रव सारमेयौ श्वानौ' (ऋ० स० १०. १४. १०) **इति दक्षिणे दक्षिणं सव्ये सव्यम् ।। १९ ।।**

वृक्का उद्धृत्य पाण्योरवदधाति अतिद्रवेत्यनया । दक्षिणे दक्षिणं सव्ये सव्यम् । उभयोर्मन्त्रावृत्तिः ।। १९ ।।

हृदये हृदयम् ।। २० ।।

हृदये हृदयमुद्धृत्यावदधाति ।। २० ।।

पिण्डचौ चैके ।। २१ ।।

एके हृदयं मन्यन्ते । एके पुनः पिण्डचाविति । अङ्गावयवा इत्येके ।। २१ ।।

वृक्कापचार इत्येके ।। २२ ।।

एके आचार्याः वृक्काभावे पिण्डचौ मन्यन्ते । अपरे पुनर्वृक्कापचार इति अपेत्यमधोभागः अधश्चारं मन्यन्ते बाह्वोरधः । तस्मात् तत्र देशाचारात् क्रिया ।। २२ ।।

सर्वां यथाङ्गं विनिक्षिप्य चर्मणा प्रच्छाद्य ' इममग्ने चमसं मा वि जिह्वरः ' (ऋ० सं० १०. १६. ८) **इति प्रणीताप्रणयनमनुमन्त्रयते ।। ।। २३ ।।**

तामनुस्तरणीं यथाङ्गं तस्या यदङ्गं तस्मिन् निक्षिपेत् । सर्वग्रहणं यथाभूतामेवाखण्डितां यथा स्यादिति । यथाङ्गं विनिक्षिप्य चर्मणा प्रच्छादयति इममग्ने चमसमिति प्रणीताप्रणयनमनुमन्त्रयते । अनेनैवानुमन्त्रयते । अथ प्रणीताः कस्मिन् काले भवन्तीति । अग्निनिधानादुत्तरं प्राक् चितिसंचयनात् ।। २३ ।।

सव्यं जान्वाच्य दक्षिणाग्नावाज्याहुतीर्जुहुयात्––अग्नये स्वाहा कामाय स्वाहा लोकाय स्वाहा अनुमतये स्वाहा इति । २४ ।

सव्यं जानु निपात्य दक्षिणाग्नौ जुहुयादाज्याहुतीः अग्नय इत्येतैश्चतुर्भिर्मन्त्रैः । तत्र होमार्थमन्यं स्रुवमुत्पादयन्ति । पूर्वस्य योजितत्वात् । अपरे हुत्वाहुतीर्योजयन्ति । ये स्रुवं तदर्थमुत्पाद्यमिच्छन्ति योजयन्ति ते पूर्वम् । तस्य विहितत्वात् । एवं सति विनियोगक्रमो न बाधितो भवति ।। २४ ।।

पञ्चमीमुरसि प्रेतस्य--'अस्माद्वै त्वमजायथा अयं त्वदधिजायतामसौ स्वर्गाय लोकाय स्वाहा' इति ।। २५ ।।

पञ्चमीमाहुतिं प्रेतस्योरसि जुहोति ।।

[1][पुरस्तादनुदाहृतम्--

दक्षिणाप्रवणं खानयेत् प्राग्दक्षिणाप्रवणं वा खानयेत् । प्रत्यग्दक्षिणाप्रवणमित्येके ।। यत्र सर्वतः श्मशानस्य--यस्मिन् आपो नावतिष्ठेरन् तत्र खानयेत् । तदादहनस्य लक्षणम् । एतदादहनस्येति श्मशानद्वित्वप्रदर्शनार्थम् । किं पुनरन्यत् । संचित्यास्थीनि यत्र निधीयन्ते तदपि श्मशानम् । तत्र विशेषणं मा भूदिति तल्लक्षणम् ।। 'केशश्मश्रुलोमनखानि वापयन्ति (आ० श्रौ० ६. १०. २) इत्येवमादि यदुक्तं तदिहापि भवति । 'नलदेनानुलिम्पन्ति' (आ० श्रौ० ६. १०. ३) इति]

अस्माद्वै त्वमजायथा अयं त्वधिजायतामसौ स्वाहेति असावित्यत्र संबुध्या नाम निर्दिशेत् ।। २५ ।।

इति चतुर्थे तृतीया कण्डिका

प्रेष्यति युगपदग्नीन् प्रज्वलयतेति ।। १ ।।

युगपदग्नीन् प्रज्वलयतेत्येवं प्रेष्यति ।। १ ।।

आहवनीयश्चेत् पूर्वं प्राप्नुयात् स्वर्गलोक एनं प्रापदिति विद्याद्रात्स्यत्यसावमुत्रैवमयमस्मिन्निति पुत्रः ।। २ ।।

---

[1] This portion is the *bhāṣya* on the *sūtra-s* IV. 1. 8 and IV. 1. 15-16. cf. Note on IV. 1. 19.

आहवनीयश्चेदग्निः प्रथममेनं प्राप्नुयात् अनेन निमित्तेन स्वर्गलोक एनं प्रापदिति विद्यात् । रात्स्यत्यसावमुत्रैव ऋद्धिं प्राप्स्यत्यसावाहिताग्निरमुष्मिन् स्वर्गे लोके । एवं पुत्रः अस्मिन् लोके ।। २ ।।

गार्हपत्यश्चेत् पूर्वं प्राप्नुयादन्तरिक्षलोक एनं प्रापदिति विद्याद्रात्स्यत्यसावमुत्रैवमयमस्मिन्निति पुत्रः ।। ३ ।।

गार्हपत्यश्चेत् पूर्ववत् ।। ३ ।।

दक्षिणाग्निश्चेत् पूर्वं प्राप्नुयान्मनुष्यलोक एनं प्रापदिति विद्याद्रात्स्यत्यसावमुत्रैवमयमस्मिन्निति पुत्रः ।। ४ ।।

दक्षिणाग्निश्चेत् पूर्ववत् ।। ४ ।।

युगपत्प्राप्तौ परामृद्धिं वदन्ति ।। ५ ।।

युगपदेनं यदाग्नयः अवाप्नुयुः यजमानं तदा परा ऋद्धिर्भवति । का पुनः परा ऋद्धिः । यस्याः परतरा नास्ति सा । तां प्राप्नुते मुच्यत इति यावत् । किमेतावत्येव तस्य मोक्षो भवति । नेति । अनभिसंधाय फलं यः कर्मसु वर्तते तस्य मोक्षो भवति । तस्यैवमग्नयो युगपत् प्रवर्तन्ते । क इममर्थं द्योतयन्ति । अनेन निमित्तेन पूर्वा प्रवृत्तिरनुमीयते । तानि निमित्तानि द्योतकानि भवन्ति । तत्र तु कर्मसमर्थसाधनसाद्गुण्यात् पूर्वा गतिरिति । तद्वैगुण्यादुत्तरा गतिः ।। ५ ।।

तं दह्यमानमनुमन्त्रयते 'प्रेहि प्रेहि पथिभिः पूर्व्येभिः' (ऋ० सं० १०. १४. ६) **इति समानम् । स एवंविदा दह्यमानः सहैव धूमेन स्वर्गं लोकमेतीति विज्ञायते ।। ६ ।।**

दीप्तं यजमानशरीरमनुमन्त्रयते [प्रेहि प्रेहि पथिभिरित्येवमादिभिर्ऋग्भिः । याः प्रागुक्ताः (आ० श्रौ० ६. १०. १९) ता अत्र ज्ञायन्ते । स

आहिताग्निरेवंविदा कर्त्रा दह्यमानः सहैव धूमेन स्वर्गं लोकमेति गच्छती-त्येवं विज्ञायते। आतिवाहिकं शरीरमास्थाय एनं संस्कारमपेक्षते ॥ ६ ॥

उत्तरपुरस्तादाहवनीयस्य जानुमात्रं गर्तं खात्वावकाः शीपालमित्यवधापयेत्। ततो ह वा एष निष्क्रम्य सहैव धूमेन स्वर्गं लोकमेतीति विज्ञायते ॥ ७ ॥

उत्तरपुरस्तादाहवनीयस्य जानुमात्रं गर्तं खात्वा अद्भिः पूरयित्वा तस्मिन्नवकाः शीपालमित्यवधापयेत्। स तु भूमिभागः खननकाल एव कृतो भवति। तत्रायमवस्थित आहिताग्निरातिवाहिकं शरीरमास्थाय संस्कारमपेक्षते। अवाप्य संस्कारं निष्क्रम्य ततः सहैव धूमेन स्वर्गं लोकं गच्छतीति ॥ ७ ॥

'इमे जीवा निमृतैराववृत्रन्' (ऋ० सं० १०. १८. ३) इति सव्यावृतो व्रजन्त्यनवेक्षमाणाः ॥ ८ ॥

सव्यावृतो भूत्वा व्रजन्त्यनवेक्षमाणाः ॥ ८ ॥

यत्रोदकमवहद् भवति तत् प्राप्य सकृदुन्मज्ज्यैकाञ्जलि-मुत्सृज्य तस्य गोत्रं नाम च गृहीत्वोत्तीर्यान्यानि वासांसि परिधाय सकृदेनान्यापीड्योदग्दशानि विसृज्यासत आ नक्षत्रदर्शनात् ॥९॥

यत्रोदकमवहद् भवति स्थिरं यत्रोदकं तत् प्राप्य सकृदुन्मज्ज्य स्नान्ति। सकृदेकाञ्जलिमुत्सृजन्ति तस्य गोत्रनामनी गृहीत्वा। उत्ती-र्यान्यानि वासांसि परिदधति। एतानि च सकृत् पीडयन्ति। सकृदनभ्यासेन। उदग्दशानीति विसृजन्ति। विसृज्यासते आ नक्षत्रदर्शनात् ॥ ९ ॥

आदित्यस्य वा दृश्यमाने प्रविशेयुः ॥ १० ॥

आदित्यस्य दृश्यमाने वा । अस्मिन् काले रश्मिवर्जित इव दृश्यमाने प्रविशेयुः गृहानागच्छेयुः ॥ १० ॥

कनिष्ठप्रथमा ज्येष्ठजघन्याः ॥ ११ ॥

कनिष्ठप्रथमा इति पूर्वोक्तम् ॥ ११ ॥

प्राप्य गृहानश्मानमग्निं गोमयमक्षतांस्तैलमप उपस्पृशन्ति ॥ १२ ॥

प्राप्य गृहान् । अन्ये तु प्राप्यावसथमिति पठन्ति । अश्मानमग्निं गोमयमक्षतान् तैलमप इत्येतानि क्रमेणोपस्पृशन्ति ॥ १२ ॥

नैतस्यां रात्र्यामन्नं पचेरन् ॥ १३ ॥

एतस्यां रात्र्यामन्नं न पचेरन् अनन्तरस्यां रात्र्यां च ॥ १३ ॥

[1]त्रिरात्रमक्षारलवणाशिनः स्युः ॥ १४ ॥

त्रिरात्रमक्षारलवणाशितः स्युः ॥ १४ ॥

द्वादशरात्रं वा महागुरुषु दानाध्ययने वर्जयेरन् ॥ १५ ॥

के पुनर्महागुरवः । मातापितरौ यश्चोपनीय कृत्स्नं वेदमध्यापयति । तेषु द्वादशरात्रं वा दानाध्ययने वर्जयेरन् । दशाहं वेत्युत्तरेण विकल्पः । नात्राशौचं विधीयते दानाध्ययनमेव । आशौचविधिः केनेति । स्मृत्या 'दशाहं शावमाशौचम्' इति (मनु० ५. ५९) ॥ १५ ॥

दशाहं सपिण्डेषु ॥ १६ ॥

---

[1] Printed editions have before this *sutra*: क्रीत्तोत्पन्नेन वा वर्तेरन् । It is not found in the MS. Nārāyaṇa says: केचिदेतत् सूत्रं न पठन्ति ।

दानाध्ययने वर्जयेदित्यनुवर्तते ।। १६ ।।

गुरौ चासपिण्डे ।। १७ ।।

दशाहमेव ।। १७ ।।

अप्रत्तासु च स्त्रीषु ।। १८ ।।

अविवाहितासु स्त्रीषु दशरात्रमिति ।। १८ ।।

त्रिरात्रमितरेष्वाचार्येषु ।। १६ ।।

आचार्येषु च इतरेषु त्रिरात्रमेव । यस्त्वेकदेशमध्यापयति स उपाध्यायः (आचार्यः?) ।। १६ ।।

ज्ञातौ चासपिण्डे ।। २० ।।

त्रिरात्रमेव ।। २० ।।

प्रत्तासु च स्त्रीषु ।। २१ ।।

विवाहितासु स्त्रीषु त्रिरात्रमेव ।। २१ ।।

अदन्तजाते ।। २२ ।।

अदन्तजाते च त्रिरात्रम् ।। २२ ।।

अपरिजाते च ।। २३ ।।

अपरिजातो नाम गर्भगतो यदा म्रियतेऽसंपूर्णस्तदा त्रिरात्रम् ।। २३ ।।

एकाहं सब्रह्मचारिणि ।। २४ ।।

सब्रह्मचारी उपनयनादिभिः संस्कारैः आ समावर्तनात् समानः स सब्रह्मचारी । तस्मिन् सब्रह्मचारिणि दानाध्ययने वर्जयेरन् । अथवैकस्मिन्नाचार्यकुले सह ब्रह्मचर्यं कृतवान् सब्रह्मचारी ।। २४ ।।

समानग्रामीये च श्रोत्रिये ।। २५ ।।

एकस्मिन् ग्रामे यः सहाध्युषितः स एकग्रामीय श्रोत्रिय इति। यो ब्राह्मणः विधिना वेदाध्ययनं कृतवान् स श्रोत्रियः । तस्मिन्नेकामेव रात्रिं दानाध्ययने वर्जयेत् ।। २५ ।।

इति चतुर्थे चतुर्थी कण्डिका

संचयनमूर्ध्वं दशम्याः कृष्णपक्षस्यायुजास्वेकनक्षत्रे ।। १ ।।

संचयनं नाम संचीयन्ते येन यस्मिन् वा कर्मणि अस्थीनि तत् संचयनम् । तदूर्ध्वं दशम्याः कृष्णपक्षस्य भवति । तत्र दशम्या इति तिथिर्दशमी गृह्यत इत्येके । तथा सति अन्तर्दशाहेऽपि संचयनं साधितं भवति । अपरपक्षसंयोगात् कालदशमीति युक्ता । अस्य शब्दस्य कालवाचित्वादिति । अपरे प्राहुः अघाहदशमीति । अघाहे नैव संचयनं भवतीति । कृष्णपक्षस्यायुजासु तिथिषु एकनक्षत्रसंयुक्तासु । एकतारनक्षत्रमेव यदि तेन नाम्ना (अभिधीयते) अनेकं यदि तेन न भवति तदेकनक्षत्रम् ।। १ ।।

अलक्षणे कुम्भे पुमांसमलक्षणायां स्त्रियमयुजोऽमिथुनाः प्रवयसः ।। २ ।।

अलक्षणेऽमङ्गले कुम्भे संचिनुयात् । अलक्षणायां स्त्रियम् । अयुजोऽमिथुना इति प्रागुक्तम् ।। २ ।।

क्षीरोदकेन शमीशाखया त्रिः प्रसव्यमायतनं परिव्रजन् प्रोक्षति 'शीतिके शीतिकावति' (ऋ० सं० १०. १६. १४) **इति ।। ३ ।।**

अनेन मन्त्रेण प्रोक्षति ।। ३ ।।

अङ्गुष्ठोपकनिष्ठिकाभ्यामेकैकमस्थ्यसंह्लादयन्तोऽवदध्युः ।। ४ ।।

असंह्लादयन्तः अस्खालयन्तः अवदध्युः ।। ४ ।।

पादौ पूर्वं शिर उत्तरम् ।। ५ ।।

कुम्भे पादौ पूर्वं शिर उत्तरमवदध्युः । अनयोर्द्वयोरुपदेशात् क्रमेणैवावधानं भवतीति साधयति पद्भ्यामारभ्येति ।। ५ ।।

सुसंचितं संचित्य पवनेन संपूय यत्र सर्वत आपो नाभिस्यन्देरन्नन्या वर्षाभ्यस्तत्र गर्तेऽवदध्युः 'उप सर्प मातरं भूमिमेताम्' (ऋ० सं० १०. १८. १०) **इति ।। ६ ।।**

सुसंचितं संचित्य नियमेन अनुत्सृज्य पवनेन शूर्पेण संपुनाति । यत्र सर्वत आपो नाभिस्यन्देरन् । वर्षाभ्योऽन्या यास्तासां प्रतिषेधः । तत्र गर्तेऽवदध्युः । यत्र मन्त्रवती क्रिया तामेकः करोति । अन्याः सर्वे कुर्वन्ति संभवात् । विशेषकरणं प्रागुक्तम्––आदहनस्येति । इदमपि श्मशानं तल्लक्षणसंयुक्तमेव भवति । उप सर्प मातरमित्यनया अवदधाति ।। ६ ।।

उत्तरया पांसूनवकिरेत् । अवकीर्ण उत्तराम् ।। ७ ।।

उच्छ्वञ्चस्वेत्यनया पांसूनवकीर्य उत्तरां जपति ।। ७ ।।

'उत्ते स्तभ्नामि' (ऋ० सं० १०. १८. १३) **इति कपालेन पिधायाथानवेक्षं प्रत्याव्रज्याप उपस्पृश्य श्राद्धमस्मै दद्युः ।। ८ ।।**

अवधानादनन्तरमबकिरणम् । तत 'उत्ते' इति कपालेनापिधानं भवति। तत अवकीर्ण उत्तरामिति पुनरवकीर्णग्रहणेनावकिरणान्तरं चोद्यते न पूर्वस्यादेश इति । कथं गम्यते । पुनरवकिरणादेकवचनोपदेशाच्च ।

यदि पूर्वस्यादेशः स्यात् अवकीर्णेष्वित्येवं ब्रूयात् । अथानवेक्षं प्रत्याव्रज्याप उपस्पृश्य श्राद्धमस्मै दद्युः । अथशब्दकरणाज्ज्ञापयति क्रियान्तरं प्रकृतमिति । अपरे यथाक्रममिच्छन्ति । अनवेक्षमित्यनवलोकयन्तः प्रत्याव्रज्याप उपस्पृशन्ति स्नानं कुर्वन्ति ततः श्राद्धमस्मै दद्युः । अस्मै प्रेताय श्राद्धं दद्युरिति ॥ ८ ॥

इति चतुर्थे पञ्चमी कण्डिका

गुरुणाभिमृता अन्यतो वापक्षीयमाणा अमावास्यायां शान्तिकर्म कुर्वीरन् ॥ १ ॥

गुरुणाभिमृता ये भवन्ति गुरोर्मरणे अन्यतो वा अपक्षीयमाणा इति । कुतोऽपक्षये सति । भ्रातृपुत्रापक्षये । अमावास्यायां शान्तिकर्म कुर्वन्ति । यदुच्यते तत् कर्तव्यम् ॥ १ ॥

पुरोदयादग्निं सहभस्मानं सहायतनं दक्षिणा हरेयुः 'क्रव्यादमग्निं प्र हिणोमि दूरम्' (ऋ० सं० १०. १६. ९) **इत्यर्धर्चेन ॥ २ ॥**

प्रागुदयादग्निं सहभस्मानं सहायतनं सहायतनेन दक्षिणा दक्षिणस्यां हरेयुर्नयेयुः देशान्तरं प्रापयेयुः क्रव्यादमग्निमित्यर्धर्चेन । कतरस्याग्नेरयमुत्सर्गः । संशयाभावात् कुतो विचारणेति । अनेकाग्नित्वात् संशयः । उच्यते । एकत्वादग्नेर्नास्ति संशयः । कः पुनरसौ । पचन इत्येके । गृह्य इत्यपरे । प्रतिविशिष्टत्वात् तस्योत्सर्गो न भवितुमर्हति । इतरथा त्रेताग्नेरपि प्रसङ्गः स्यात् । तस्मान्न तस्योत्सर्गः । प्रतिविशिष्टत्वात् । तस्मात् साधारणस्योत्सर्गेण भवितव्यम् । कः पुनरसौ । पचनः । अन्यः पचनोऽन्यश्च गृह्य इति तत्र प्रागप्यनयोर्नानात्वमुक्तम् । कुतः पुनः पचनस्योत्पत्तिः । उत्तरत्र वक्ष्यामः । तस्मात् साधारणस्य पचनस्येति सिद्धम् ॥ २ ॥

तं चतुष्पथे न्युप्य यत्र वा त्रिः प्रसव्यं परियन्ति सव्यैः पाणिभिः सव्यानूरूनाघ्नानाः ।। ३ ।।

तं चतुष्पथे न्युप्य यत्र वा । चतुष्पथे निवपन्ति । दक्षिणस्यां दिशि यत्र वा इष्टम् । चतुष्पथे निवपन्ति दक्षिणस्यां दिशि वेति । न्युप्य त्रिः प्रसव्यं परियन्ति । प्रगतसव्यं परियन्ति । सव्यतो यन्ति सव्यानूरूनाघ्नाना आस्फालयमानाः परियन्ति ।। ३ ।।

अथानवेक्षं प्रत्याव्रज्याप उपस्पृश्य केशश्मश्रुलोमनखानि वापयित्वोपकल्पयीरन्––नवान् मणिकान् कुम्भानाचमनीयांश्च शमीसुमनोमालिनः शमीमयमिध्मं शमीमय्यावरणी परिधींश्चानडुहं गोमयं चर्म च नवनीतमश्मानं च यावत्यो युवतयस्तावन्ति कुशपिञ्जूलानि ।। ४ ।।

अथानवेक्षं प्रत्याव्रज्य । अनवलोकयन्त आगच्छन्ति । अप उपस्पृश्य स्नात्वेत्यर्थः । केशश्मश्रुलोमनखानि वापयीरन् । तत्रार्थप्राप्तं स्नानं भवति । अथोपकल्पयन्ति । तत्रैषां द्रव्याणामुपकल्पनोपदेशादेव जानीयात् यान्यन्यान्येवंजातीयानि द्रव्याणि पुराणानि तेषामुत्सर्ग इति । नवान् मणिकानित्यादीनि द्रव्याणि । नवानि अनुपयुक्तानि । एवं सर्वाणि कार्याणि । द्रव्याणां निदर्शनमिति । तस्मात् सर्वाणि तानि नवानि कारयेत् । शमीसुमनोमालिनः । अरणी च शमीमय्यौ भवतः । परिधयश्च शमीमयाः । परिधींश्चोपकल्पयेरन् । अधिकारात् शमीमया भवन्ति । अन्ये तु तन्मयत्वं परिधीनां नेच्छन्ति । कस्मात् पुनः शमीग्रहणं शमीमय्यावित्यधिकृते शमीमयग्रहणे शमीमयमिध्ममिति । अपरे तु शमीमयाश्च परिधयो भवन्तीति । कस्मात् । अधिकारात् । ननु च पूर्वं . . . इति नि . . . नियमार्थमिति । ननु चोक्तं पुनः शमीग्रहणम् । नेत्युच्यते । यदि शमीग्रहणं पुनर्न क्रियते नैवारण्योः शमीमयत्वं स्यात् । कथम् ।

विद्यमानानामिध्मानां शमीमयत्वं गुणश्चोद्यत इति । अपूर्वे अरणी चोद्येते । एकेन वाक्येन द्रव्यचोदना गुणचोदना च न स्याताम् । अस्तु द्रव्यम् अरणी चोद्यते । अत एव . . . शमीग्रहणं न क्रियते । कस्मात् । द्रव्याधिकारात् । तस्मात् परिधयोऽपि शमीमया भवन्ति । आनडुहं गोमयमुपकल्पयेरन् । अनडुद्ग्रहणं गोमयविशेषणार्थम् । यावत्यो युवतयः । तस्मिन् गृहे यावत्यो युवतयः स्युः तावन्ति कुशपिञ्जूलानि कुशतरुणकानि उपकल्पयेरन् । नवनीतमपि केचिदिच्छन्ति । तेषामुपक्लृप्तानां द्रव्याणामनिर्दिष्टानां यथार्थमुपयोगः कर्तव्यः ।। ४ ।।

अग्निवेलायामग्निं जनयेत् 'इहैवायमितरो जातवेदाः' (ऋ० सं० १०. १६. ९) इत्यर्धर्चेन ।। ५ ।।

अग्निवेलायामिति । सायं योऽग्निहोत्रकालः साग्निवेलेत्युच्यते । तस्यां वेलायामग्निं जनयन्ति तयोररण्योः इहैवायमितरो जातवेदा इत्यर्धर्चेन ।। ५ ।।

तं दीपयमाना आसत आ शान्तरात्रादायुष्मतां कथाः कीर्तयन्तो माङ्गल्यानीतिहासपुराणानीत्याख्यापयमानाः ।। ६ ।।

आ शान्तरात्रादिति । संनिविष्टेषु (जनेषु) । शान्तायां निशि ते तूष्णीमासत इति । आयुष्मतां चिरजीवितानां कथाः कीर्तयन्तः कुलवृद्धानां चान्येषां च । माङ्गल्यादीनि चाख्यापयमाना अन्योन्यम् ।। ६ ।।

शान्तरात्रस्यानियतत्वान्नियमं करोति—

उपरतेषु शब्देषु संप्रविष्टेषु वा गृहं निवेशनं वा दक्षिणाद् द्वारपक्षात् प्रक्रम्याविच्छिन्नामुदकधारां हरेत् 'तन्तुं तन्वन् रजसो नुभामन्विहि' (ऋ० सं० १०. ५३. ६) इत्योत्तरस्मात् ।। ७ ।।

सर्वत्र उपरताः शब्दा यदा भवन्ति न क्वचिद्वाच उच्चरन्ति न काचिदुच्चारणा श्रूयते । गृहं निवेशनं वा संप्रविष्टेषु सर्वेषु अमात्येषु इदं कर्म भवति । अथैतस्मिन् काले दक्षिणाद् द्वारपक्षात् प्रक्रम्य तन्तुं तन्वन्नित्यनेन मन्त्रेणोदकधारां हरेत् । संततामविच्छिन्नां धारां हरेत् । दक्षिणाद् द्वारपक्षादारभ्य आ उत्तरस्माद् द्वारपक्षात् ॥ ७ ॥

अथाग्निमुपसमाधाय पश्चादस्यानडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नमात्यानारोहयेत् ' आ रोहतायुर्जरसं वृणानाः ' (ऋ० सं० १०. १८. ६) **इति ॥ ८ ॥**

अथानन्तरमग्नेरुपसमाधानं करोति । उपसमाधानाद्युक्तं प्रागसंस्कृते देशेऽग्निं दीपयमाना आसत इति । तस्मिन् चर्मणि अमात्यानारोहयेत् आरोहतायुरित्यनेन मन्त्रेण ॥ ८ ॥

' इमं जीवेभ्यः परिधिं दधामि ' (ऋ० सं० १०. १८. ४) **इति परिधिं परिदध्यात् ' ॥ ९ ॥**

मध्यमं परिधिमनेन मन्त्रेण निदधाति । पादेनेत्येके । कस्मात् । त्रयः पादेन पादेन निधीयन्ते परिधयः एकैकम् । चतुर्थः पादः अश्मन्युपदिश्यत इति वचनादेवं चत्वारः पादाः चतुर्षु कर्मसूपदिश्यन्त इति । ऋग्ग्रहणात्तु चतुर्थस्य द्विरभ्यासः प्राप्नोति । अपरे तु पादग्रहणादृगेव भवति मध्यमे परिधाविति । उत्तरयोः परिध्योः तूष्णीम् । चतुर्थस्य चाभ्यासो वचनात् उत्तरयोः क्रमः अध्वर्युप्रत्ययः । अथवा उदक्संस्थत्वात् प्रथमं दक्षिणं पश्चादुत्तरम् ॥ ९ ॥

' अन्तर्मृत्युं दधतां पर्वतेन ' (ऋ० सं० १०. १८. ४) **इत्यश्मानमुत्तरतोऽग्नेः कृत्वा ' परं मृत्यो अनु परेहि पन्थाम् '** (ऋ० सं० १० १८. १) **इति चतसृभिः प्रत्यृचं हुत्वा**

'यथाहान्यनुपूर्वं भवन्ति' (ऋ० सं० १०. १८. ५) **इत्यमात्यानीक्षेत ॥ १० ॥**

अन्तर्मृत्युमित्यनेनाश्मानमुत्तरतोऽग्नेः करोति । कृत्वा परं मृत्यो इति चतसृभिः प्रत्यृचं जुहोति । प्रत्यृचग्रहणमुक्तप्रयोजनम् । हुत्वा यथाहान्यनुपूर्वमित्यनेन मन्त्रेणामात्यानीक्षेत ॥ १० ॥

युवतयः पृथक्पाणिभ्यां दर्भतरुणकैर्नवनीतेनाङ्गुष्ठोपकनिष्ठिकाभ्यामक्षिणी आञ्ज्य पराच्यो विसृजेयुः ॥ ११ ॥

युवतयः पृथक्पाणिभ्यां नानापाणिभ्यां दर्भतरुणकैर्नवनीतेन च अङ्गुष्ठोपकनिष्ठिकाभ्यामक्षिणी आञ्ज्य पराच्योऽनवेक्षमाणाः पृष्ठतो विसृजेयुः । पृथग्ग्रहणाद् द्विस्तावन्ति कुशपिञ्जूलानि । नैतावता द्वित्वं शक्यमुपदेष्टुम् । पृथग्ग्रहणं दक्षिणाङ्गनिवृत्त्यर्थम् । तस्मात् तावन्त्येव कुशपिञ्जूलानीति ॥ ११ ॥

'इमा नारीरविधवाः सुपत्नीः' (ऋ० सं० १०. १८. ७) **इत्यञ्जाना ईक्षेत ॥ १२ ॥**

इमा नारीरित्यनयाञ्जाना ईक्षेत ॥ १२ ॥

'अश्मन्वतीरीयते सं रभध्वम्' (ऋ० सं० १०. ५३. ८) **इत्यश्मानं कर्ता प्रथमोऽभिमृशेत् ॥ १३ ॥**

अश्मन्वतीरित्यनयाश्मानं कर्ता प्रथममभिमृशेत् । पश्चादितरे ॥ १३ ॥

अथापराजितायां दिश्यवस्थायाग्निनानडुहा गोमयेन चाविच्छिन्नया चोदकधारया 'आपो हि ष्ठा मयोभुवः' (ऋ० सं० १०. ९. १) **इति तृचेन 'परीमे गामनेषत'** (ऋ० सं० १०. १५५. ५) **इति परिक्रामत्सु जपेत् ॥ १४ ॥**

कर्ता जपेदितरेषु परिक्रामत्सु । कथम् । अग्निना अनडुहा—आनडुहेन चेति ये पठन्ति तेषामानडुहं गोमयं भवति । अन्ये तत्रानडुहं गोमयमिति पठन्ति । येऽनड्वाहमिति पठन्ति तेषामनडुहा च भवति ।। १४ ।।

पिङ्गलोऽनड्वान् परिणेयः स्यादित्युदाहरन्ति ।। १५ ।।

अथोपविशन्ति यत्राभिरंस्यमाना भवन्ति ।। १६ ।।

कर्मेदं कृत्वा तदनन्तरमुपविशन्ति यत्राभिरंस्यमाना भवन्ति । मनसो यत्र रोचते तत्रोपविशन्ति ।। १६ ।।

अहतेन वाससा प्रच्छाद्यास्वपन्त आसत ओदयात् ।। १७ ।।

अनुपयुक्तवाससा प्रच्छाद्य आवृत्य सर्व आसते अस्वपन्तः ओदयादादित्यस्य ।। १७ ।।

उदित आदित्ये सौर्याणि स्वस्त्ययनानि च जपित्वान्नं संस्कृत्य 'अप नः शोशुचदघम्' (ऋ० सं० १. ९७. १) इति प्रत्यृचं हुत्वा ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीत । गौः कंसोऽहतं वासश्च दक्षिणा ।। १८ ।।

उदिते आदित्ये । सौर्याणि व्याख्यातानि । तानि स्वस्त्ययनानि च जपित्वा अन्नं संस्कृत्य अप नः शोशुचदघमिति प्रत्यृचं जुहोति । प्रत्यृचग्रहणमुक्तप्रयोजनम् । ततो ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयित्वा गौः कंसोऽहतं वास इत्येतानि द्रव्याणि दक्षिणां ददाति ।। १८ ।।

इति चतुर्थे षष्ठी कण्डिका

अथातः पार्वणे श्राद्धे काम्य आभ्युदयिक एकोद्दिष्टे वा ।। १ ।।

अथशब्दोऽनन्तरविशेषप्रक्रियार्थः । अत इति हेत्वर्थनिर्देशः । यस्मादतो गृहस्थस्य धर्म आयत्तः ततः श्राद्धं वक्ष्यते । पर्वणि भवं पार्वणम् । पर्वेति पक्षयोः संधिः । तत्प्रसङ्गादन्यत्राप्यधिकरोति—काम्ये । कामसंयुक्तं कामनिमित्तं च काम्यम् । 'पञ्चम्यां पुत्रकामस्य' इत्येवमादयः कामाः श्रूयन्ते । तस्मिंश्चैते धर्मा वेदितव्याः । आभ्युदयिके— अभ्युदयनिमित्तमाभ्युदयिकम् । अभ्युदयो नाम चौलोपनयनगोदानविवाहाः । तत्र यद् भवति तदाभ्युदयिकम् । एकोद्दिष्टे वा—एकोद्दिष्टे वेति एकमुद्दिश्य यत् क्रियते 'श्राद्धमस्मै दद्युः' (४. ५. ८) इति तदेकोद्दिष्टम् । तत्र संशयः—किमेतेषु श्राद्धेषु तुल्या धर्मा उतातुल्या इति । अतुल्याः इति । समानाधिकारेऽपि सति विशेषसंबन्धात् । तत्र पार्वणे तावत् स्थालीपाको विशिष्टः। आभ्युदयिककाम्ययोः पाणावेव[1] होमः । आभ्युदयिकेषु तु पुनः 'युग्मान् वृद्धिपूर्तेषु' (२. ५. १५) इत्येवमादिविशेषः । एकोद्दिष्टे एकमुदपात्रममन्त्रवती च क्रिया । तस्मादेते विशेषाः । अपरे आहुः—नित्यं च काम्याभ्युदयिके च पृथक् प्राप्नुवन्तीति । तन्न । तदेव नित्यं कामसंयोगात् तस्मिन्नहनि क्रियते आभ्युदयिकं च । कस्मात् । अग्निहोत्रहोमवत् । अग्निहोत्रं नित्यं च कामसंयोगात् तेन तेन द्रव्येण हूयमानं काम्यं च नित्यं च । तथा इदमपि ॥ १ ॥

ब्राह्मणाञ्श्रुतशीलवृत्तसंपन्नानेकेन वा काले ज्ञापितान् स्नातान् कृतपच्छौचानाचान्तानुदङमुखान् पितृवदुपवेश्यैकैकमेकैकस्य द्वौ द्वौ त्रींस्त्रीन् वा ॥ २ ॥

ब्राह्मणान् श्रुतादिभिर्गुणैः संपन्नान् काले ज्ञापितान् । कः कालः । 'ब्राह्मणान् पूर्वेद्युः संनिपात्य' इति (वासिष्ठधर्मसू. ११. १७) ज्ञापितान् संबोधितानित्यर्थः । अयं काल । तत्र ब्राह्मणग्रहणं क्षत्रियादिनिवृत्त्यर्थम् ।

[1] अन्नादेव—B.

गुणसंयोगेन स्यात् प्रसङ्गः । तन्मा भूदिति । एकेन वा गुणेन श्रुतवृत्तानामेकेन वा गुणेन संपन्नान् ब्राह्मणानिति । स्नातान् कृतपच्छौचान् । एवं शौचसंयुक्तान् पितृवदुपवेशयेत् । पितृवदिति । पितृतुल्यं पितृवत् । तद्वदेव मन्यमानः । पितृपितामहादिषु या वृत्तिः तां वृत्तिमास्थाय नियोजयेत् । अथवा पितृवदिति ब्राह्मणानां ये कनीयांसः ते पितुर्ये वृद्धतरास्ते पितामहस्य ये वृद्धतमास्ते प्रपितामहस्य । अथवा 'द्वौ दैवे पितृकृत्ये त्रीन् एकैकमुभयत्र वा' (मनु० ३. १२५) इत्येवं वा । तत्र स्नानमविधेयम् । प्राग्विहितत्वात् 'प्राग्वोदग्वा ग्रामात्' (३. २. २) इत्यत्रैव सिद्धे यत् पुनः स्नानग्रहणं करोति तज्ज्ञापयति प्रागनित्यं स्नानमिति । तस्मादिह नित्यार्थमारभ्यते । अथवा स्नानद्रव्यैः स्नाताविति । स्नानद्रव्याणि च स्वेन उपहर्तव्यानि तेषामिति । कृतपच्छौचानाचान्तान् । कृतपादशौचानाचान्तान् । अत्रोभयं शक्यतेऽनारब्धुम् । 'आर्द्रपादस्तु पञ्चार्द्रो भुञ्जीत' इति पच्छौचस्य सिद्धत्वात् । तथाचमनस्य 'भोक्ष्यमाणस्तु प्रयतो द्विराचामेत्' इति भोजनपूर्वत्वादाचमनस्य । तेनान्यदेवेदं कर्माङ्गमाचमनं विधीयते । एवमपि पच्छौचमविधेयम् । आचमनाङ्गत्वात् । 'प्रक्षाल्य पादौ पाणी च' इत्येवं सिद्धेऽपि पच्छौचं विदधाति तज्ज्ञापयति— अन्येष्वाचमनेषु अनित्यं पादप्रक्षालनमिति । तेन पादयोर्यदा शुचित्वं तदाप्रक्षाल्यापि पादावाचमनम् । एकैकमेकैकस्येति संख्याविशेषः ।। २ ।।

वृद्धौ फलभूयस्त्वम् ।। ३ ।।

प्राक् संख्यानियमादाधिक्यं न स्यादिति कृत्वा वचनम् ।। ३ ।।

न त्वेवैकं सर्वेषाम् ।। ४ ।।

न तु खलु सर्वेषामेकं भोजने नियुञ्ज्यात् ।। ४ ।।

काममनाद्ये ।। ५ ।।

तत्रानाद्य इति । आद्यं प्रथमं यस्मिन् त्रयाणामादौ निपरणं क्रियते । तत् प्रथमं वर्जयित्वा द्वितीयादिषु काममेकं भोजयेत् । एवमेके । अथापरेऽनाद्य इति अद्यते यस्मिन् श्राद्धे भुज्यते तदाद्यम् । न आद्यमनाद्यं न भुज्यते यस्मिन् श्राद्धे इति । कथं पुनरभोजनीयं श्राद्धम् । आमं हिरण्यं यदा दीयते तत्र काममेकं नियुञ्ज्यात् । अथवा काममनाद्य इति यत्राद्यं न विद्यते तदनाद्यं दुर्भिक्षमित्यर्थः । नित्यत्वाच्छ्राद्धस्य एकं वा भोजयेत् तत्रेति ॥ ५ ॥

पिण्डैर्व्याख्यातम् ॥ ६ ॥

पिण्डनिपरणे ये विकल्पास्त इहापि भवन्ति ॥ ६ ॥

अपः प्रदाय ॥ ७ ॥

उपवेशनादनन्तरमपः प्रयच्छति ॥ ७ ॥

दर्भान् द्विगुणभुग्नानासनं प्रदाय ॥ ८ ॥

ततोऽनन्तरं दर्भान् द्विगुणभुग्नानासने ददाति । आसनमिति सप्तमीस्थाने द्वितीया द्रष्टव्या ॥ ८ ॥

अपः प्रदाय ॥ ९ ॥

पुनरपो ददाति ॥ ९ ॥

तैजसाश्ममयमृन्मयेषु त्रिषु पात्रेष्वेकद्रव्येषु वा दर्भान्तर्हितेष्वपः प्रदाय 'शं नो देवीरभिष्टये' (ऋ० सं० १०. ९. ४) इत्यनुमन्त्रितासु तिलानावपति 'तिलोऽसि सोमदेवत्यो गोसवे देवनिर्मितः । प्रत्नवद्भिः प्रत्तः स्वधया पितॄनिमान् लोकान् प्रीणयाहि नः स्वधा नमः' इति ॥ १० ॥

तैजसादिषु पात्रेषु । तथोपदेशादेव त्रिषु पात्रेषु भवति । अतस्त्रिग्रहणमपार्थकम् । उच्यते . . . विशेषणचोदना कथम् । एतेष्वेव पात्रेषु कथं स्यादिति । कुतो वान्येषु स्यात् प्रसङ्गः । एकद्रव्येष्विति । तत्रान्यद्रव्याणां प्रसङ्गो मा भूदिति । अपरे तु तदेव विपरीतं त्रिषु पात्रेष्विति । कथम् तैजसादीनां त्रिषु पात्रेषु । कथम् । तैजसादीनामेकैकस्य द्रव्यस्य त्रीणि पात्राणि कार्याणि । तन्वेकद्रव्येषु वेत्यनेनैव सिध्यति । न सिध्यति । अन्यद्रव्यप्राप्त्यर्थम् । न केवलमधिकृतानामेव द्रव्याणां पात्राणि भवन्ति । तस्मात् शङ्खादीनां प्राप्तिः सिद्धा भवति । दर्भान्तर्हितेष्वप प्रादाय पात्रेषु ततोऽनुमन्त्रयते शं नो देवीरित्यनेन मन्त्रेण । सकृदनुमन्त्रणम् । शक्यत्वात् । अनुमन्त्रितासु तिलानावपति तिलोऽसीत्यनेन । प्रतिपात्रं मन्त्रावृत्तिः ।। १० ।।

प्रसव्येनेतरपाण्यङ्गुष्ठान्तरेणोपवीतित्वात् ।। ११ ।।

प्रगतसव्यं प्रसव्यम् । प्रसव्येन पाणिना पितॄणामर्घ्यदानमित्यस्मिन् प्राप्ते इदमारभ्यते । इह नित्यं पितॄणामपि प्रदक्षिणमर्घ्यदानं भवति । एतस्मिन् प्राप्ते प्रदक्षिणमर्घ्यदानं विधीयते प्रसव्येनेति । इतरेण पाणिना । कथम् । इतरपाण्यङ्गुष्ठान्तरेणेति वचनात् । इतरग्रहणे सव्यग्रहणम् । इतरस्य पाणेरङ्गुष्ठ इतरपाणेरङ्गुष्ठस्यान्तरमितरपाण्यङ्गुष्ठान्तरं तनान्तरेण दद्यात् । उपवीतित्वाद्धेतोस्तेनैव तस्मिन् कर्मणि प्राचीनावीतित्वमुपदिश्यते तस्मात् तेनान्तरेण ददाति ।। ११ ।।

दक्षिणेन वा सव्योपगृहीतेन ' पितरिदं ते अर्घ्यं पितामहेदं ते अर्घ्यं प्रपितामहेदं ते अर्घ्यम् ' इति ।। १२ ।।

दक्षिणेन वा पणिना यथाप्राप्तं ददाति । कथं प्रादक्षिण्यम् । प्रादेशिन्यङ्गुष्ठयोरन्तरेण पितृदैवतेन तीर्थेन सव्येन पाणिनोपगृहीतेन ' पितरिदं ते अर्घ्यम्, पितामहेदं ते अर्घ्यम्, प्रपितामहेदं ते अर्घ्यम् ' इत्येवं त्रयाणामेतैर्मन्त्रैः ।। १२ ।।

अप्पूर्वं ताः प्रतिग्राहयिष्यन् सकृत् सकृत् स्वधार्घ्या इति ।। १३ ।।

यदा प्रतिग्राहयिष्यन् भवति तदा पूर्वमपो ददाति । सकृत् सकृत् स्वधार्घ्या इति । आपः स्वधाया अर्घ्याः स्वधार्घ्याः । तासां सकृद्दानं भवति । एवं ब्रुवता किं ज्ञापितं भवति । या अस्वधार्घ्यास्तासामसकृद्दानं भवति । 'प्रक्षालितपादोऽर्घ्यमञ्जलिना प्रतिगृह्य' (१. २४. १३) इत्येवमेके । प्रतिग्राहयिष्यन्नित्युत्तराङ्गं केचित् कुर्वन्ति । प्रतिग्राहयिष्यन् सकृत् सकृत् स्वधार्घ्या इति मन्त्रं मन्यन्ते । प्रतिग्राह्या अनेन मन्त्रेण ता अर्घ्या निवेदयति । सकृद्वचनं प्रतिब्राह्मणं निवेदनमन्त्रो मा भूदिति । तेनैवं ब्रुवता किं ज्ञापितं भवति । अन्यो मन्त्रः प्रतिब्राह्मणमावर्तत इति । कः पुनरसौ । अर्घ्यदानमन्त्रः ।। १३ ।।

प्रसृष्टा अनुमन्त्रयेत 'या दिव्या आपः पृथिवी संबभूवुर्या अन्तरिक्षा उत पार्थिवीर्याः । हिरण्यवर्णा यज्ञियास्ता न आपः शं स्योना भवन्तु' (तै० ब्रा० २. ७. १५. ४) इति संस्रवान् समवनीय ताभिरद्भिः पुत्रकामो मुखमनक्ति ।। १४ ।।

प्रसृष्टाः प्रदत्ता अर्घ्या अपोऽनुमन्त्रयेत । या दिव्या इत्यनेन मन्त्रेण । तत्रानुमन्त्रणे विप्रतिपन्नाः । सर्वान् केचिदिच्छन्ति । प्रतिविसर्जनमपरे । या यथा प्रसृष्टास्तास्तथैवानुमन्त्रयन्ते । अन्ते त्वनुमन्त्रणं कुर्वतां सकृन्मन्त्रः । शक्यत्वात् । इतरथा हि मन्त्रभेदः कालभेदात् । संस्रवान् समवनयन्ति । अर्घ्यदानादवशिष्टा या आप आसन् ताः प्रथमे पात्रे समवनीय ताभिरवशिष्टाभिरद्भिः पुत्रकामो मुखमनक्ति पुत्रकामसमर्थश्चेत् ।। १४ ।।

नोद्धरेत् प्रथमं पात्रं पितॄणामर्घ्यपातितम् ।
आवृतास्तत्र तिष्ठन्ति पितरः शौनकोऽब्रवीत् ।। १५ ।।

नोद्धरेदिति यज्ञगाथा । प्रथमं पात्रं यस्मिन् देशे निहितं तं तस्माद् देशान्नोद्धरेत् । कस्मात् । आवृता गुप्ता यस्मात् तत्र तिष्ठन्ति पितरः तस्मान्नोद्धरेत् कदाचनैव ।। १५ ।।

एतस्मिन् काले गन्धमाल्यधूपदीपाच्छादनानां प्रदानम् ।। १६ ।।

अर्घ्यदानादनन्तरं गन्धमाल्यादीनि ददाति ।। १६ ।।

उद्धृत्य घृताक्तमन्नमनुज्ञापयति—अग्नौ करिष्ये करवै करवाणीति वा ।। १७ ।।

भोजनार्थादन्नादेकदेशमुद्धृत्यानुज्ञापयति । कथम् । अग्नौ करिष्ये करवै करवाणीति वा । अग्नौ करिष्ये इत्येवमादीनां त्रयाणां वाक्यानामन्यतमेनानुज्ञापयति ।। १७ ।।

प्रत्यभ्यनुज्ञा—क्रियतां कुरुष्व कुर्विति ।। १८ ।।

अनुज्ञापिताः सन्तो ब्राह्मणाः प्रत्यभ्यनुज्ञां ददते क्रियतामित्येतेषां त्रयाणामन्यतमेन ।। १८ ।।

अथाग्नौ जुहोति यथोक्तं पुरस्तात् ।। १९ ।।

प्रत्यभ्यनुज्ञानादनन्तरमग्नौ जुहोति यथोक्तं पुरस्तात् । कथमुक्तम् । सोमाय पितृमते स्वधा नमः । अग्नये कव्यवाहनाय स्वधा नम इत्येताभ्यां मन्त्राभ्याम् । तत्र विकल्प उक्तः ।। १९ ।।

अभ्यनुज्ञायां[1] पाणिष्वेव वा ।। २० ।।

यदा अभ्यनुज्ञापयन्ति[2] तदा पाणिष्वेव जुहोति । तत्रानयोर्विकल्पयोर्विनिवेशमिच्छन्ति । आहिताग्नेः पार्वणे नित्यमनुज्ञापनम् । कस्मात् ।

---

[1] अनभ्यनुज्ञायां—B. [2] न अनुज्ञापयति—B

होमस्यानित्यत्वात् । आहिताग्नेर्होमस्य च निपरणस्य च त्रेतायां विहितत्वात् । तेन पाणिष्वेव होमो भवति । तथान्येषां च विहितं भवत्येव अग्नौ करणं पिण्डाश्चेत्येवं विनिवेशयन्ति ।। २० ।।

‘अग्निमुखा वै देवाः पाणिमुखा पितरः’ इति हि ब्राह्मणम् ।। २१ ।।

श्रुतिरेवैषा श्रूयते ।। २१ ।।

यदि पाणिष्वेवाचान्तेष्वन्यदन्नमनुदिशति ।। २२ ।।

यदि पाणिषु जुहुयादाचान्तेषु भुक्तवत्स्वित्यर्थः । यत् पाणौ हुतं तद् भुक्तवत्सु अन्यदन्नमनुदिशति ददाति ।। २२ ।।

अथाग्नौहुतशेषम्—

अन्नमन्ने ।। २३ ।।

हुतशेषमन्नमन्यस्मिन्नन्ने ददाति । अन्यदन्नं पूर्वं ब्राह्मणेभ्यो दत्त्वा तस्योपरि हुतशिष्टं ददाति ।। २३ ।।

सृष्टं दत्तमृध्नुकम् ।। २४ ।।

सृष्टं प्रभूतम् [1]ऋध्नुकमृद्धिमत् ।। २४ ।।

तृप्तान् ज्ञात्वा मधुमतीः श्रावयेत् ।। २५ ।।

तृप्ताननन्नकाङ्क्षिणः । एवमुपलभ्य मधुमच्छब्दसंयुक्ता ऋचः श्रावयेत् ।। २५ ।।

‘अक्षन्नमीमदन्त’ (ऋ० सं० १. ८२. २) **इति च ।।२६।।**

एतां च श्रावयेत् ।। २६ ।।

---

1 आर्ध्नुकम्—B.

संपन्नमिति पृष्ट्वा यद्यदन्नमुपभुक्तं तत्तत्[1] स्थालीपाकेन सह पिण्डार्थमुद्धृत्य शेषं निवेदयेत् ॥ २७ ॥

श्रावणादनन्तरं संपन्नं पृच्छति । ब्राह्मणैर्यद्यदन्नमुपभुक्तं . . . स्थालीपाकाच्च । कः पुनः स्थालीपाको गृह्यते । येषां पिण्डपितृयज्ञस्थालीपाकः तस्य सर्वेषु श्राद्धेषु प्रवृत्तिर्भवति । नेत्युच्यते । विद्यमानस्योपयोगमात्रमिदं नाविद्यमानस्य चोदना । क्वचासौ विद्यते । अमावास्यायाम् । अन्येषु श्राद्धेषु भोजनार्थादेव निपरणम् । तत्र काम्ये नित्यं पिण्डनिपरणम् आहिताग्नेश्चानाहिताग्नेश्च । अपार्वणे आभ्युदायिके विकल्पः । आहिताग्नेस्तु निपरणं भवति । इतरस्तुल्यः । एकोद्दिष्टेष्वेकं पात्रमेकश्च पिण्डो भोजनार्थादेवाम्नात् । तूष्णीमेव क्रियां मन्यन्ते । शास्त्रान्तरदर्शनाच्च । 'नवश्राद्धममन्त्रकम्' इति । एवं तुल्याधिकारेऽपि श्राद्धविशेषा द्रष्टव्याः । अन्यश्चोक्तो विकल्पः 'मासि मासि चैवम्' (२. ५. ११) इति । एवं पिण्डार्थमुद्धृत्य यदवशिष्टमन्नं तन्निवेदयेत् ॥ २७ ॥

अभिमतेऽनुमते वा ॥ २८ ॥

अभिमतिर्नामात्मनः स्वीकरणम् । निवेदितं यदि ते काङ्क्षन्ति देयं तेषाम् । अथ चेदनुजानते गृहपतिरात्मोपयोगं करोति ॥ २८ ॥

भुक्तवत्स्वनाचान्तेषु पिण्डान् निदध्यात् ॥ २९ ॥

प्रागाचमनादेतस्मिन् काले पिण्डनिपरणं कर्तव्यं पूर्वोक्तेन विधानेन ॥ २९ ॥

आचान्तेष्वेके ॥ ३० ॥

एके आचार्याः आचान्तेषु पिण्डनिपरणमिच्छन्ति ॥ ३० ॥

---

[1] तत्सर्वं—B.

प्रकीर्यान्नमुपवीयों स्वधोच्यतामिति विसृजेत् ।। ३१ ।।

अन्नप्रकिरणं कृत्वा । उपवीयेति कण्ठेऽवलम्बनं करोति सूत्रस्य । यज्ञोपवीती स्यादित्यर्थः। ओं स्वधोच्यतामिति विसृजेद् ब्राह्मणान् ।। ३१ ।।

अस्तु स्वधेति वा ।। ३२ ।।[1]

इति चतुर्थे सप्तमी कण्डिका

इत्याश्वलायनगृह्यसूत्रभाष्ये चतुर्थोऽध्यायः

---

[1] Here ends the MS. The last *kaṇḍikā* dealing with *śūlagava* is apparently lost. Devasvāmin cites a *sūtra* from *śūlagava* at I. 11. 1 (see above p. 63).

INDEX OF SŪTRA-S

सूत्राणामनुक्रमणिका

अ

ध

य

INDEX OF ṚGVEDIC QUOTATIONS

(सूत्रोदाहृतर्ग्वेदमन्त्राणामनुक्रमणिका)

INDEX OF MANTRA-S MENTIONED IN THE SŪTRA-S

(सूत्रे नाम्नाभिहितानां मन्त्राणामनुक्रमणिका)

INDEX OF NON-ṚGVEDIC QUOTATIONS

(सूत्रोदाहृतऋग्वेदमन्त्रतोऽन्यवाक्यानामनुक्रमणिका)

* The entries marked with asterisks are in verse form. For a few of the non-Ṛgvedic quotations listed here the sources have been given in the text. A large number of them are however not traceable. Nor is it always possible to determine the exact source of them even in the extant Vedic literature. Those interested in this problem may refer to: V. M. Apte, 'Mantra Rubrics in Ritual Literature (New Lines of Investigation)', *C. K. Raja Presentation Volume*, Adyar Library, Madras, 1946, pp. 233-40 and 'Non-Ṛgvedic Mantras Rubricated in the Āśvalāyana-gṛhya-sūtra: Their Sources and Interpretation', *New Indian Antiquary* 3, Poona, 1940-41, pp. 49ff. P. K. N. Pillai, *Non-Ṛgvedic Mantras in the Marriage Ceremonies*, Trivandrum, 1958. Krishna Lal, *Gṛhya-Mantras and Their Ritual Application*, (in Hindi) National Publishing House, Delhi, 1970.

INDEX OF CITATIONS IN THE BHĀṢYA

(भाष्योदाहृतवाक्यानामनुक्रमणिका)

APPENDIX

आश्वलायनगृह्यपरिशिष्टम्[1]

गृह्ये तु यानि नोक्तानि क्वचिद् वैतानिकेऽपि वा ।
विधेरलोपनार्थाय तानि वक्ष्याम्यतः परम् ।।
क्वचिद् गद्यैः क्वचिच्छ्लोकैस्तद् वक्ष्याम्यनुपूर्वशः ।
गायत्र्यादिषु छन्दःसु सविता येषु देवता ।।
तत्र पुण्यतमा ह्येषा सानुगीता यशस्विनी ।
गायत्रीनामधेया तु 'तत् सवितुर्वरेण्यम्' इति ।।
छन्दसा सा तु गायत्री सावित्री दैवतेन तु ।
सावित्रीजातिसंपन्नः श्राद्धं वेत्ति यथाविधि ।।
'आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवःस्वरोम्' इत्युच्यते
शिरश्चास्याः ।
बह्वृचं वैश्वदेवे तु नियुञ्ज्याद् वेदपारगम् ।
नियुक्तो वैश्वदेवे तु स श्राद्धं परिपालयेत् ।।

[1] This is a reprint of the text published earlier in the *ALB* on the basis of four MSS. with introduction, critical apparatus, appendixes and indexes. It is thought useful to include it here as in some MSS. of the Pariśiṣṭa it is regarded as chapter V of the *Gṛhya-sūtra*. On the details of its importance and references to it by numerous authors from the 11th century onwards one may refer to *The Adyar Library Bulletin*, vol. 27, 1964, pp. 217ff. (=The Adyar Library Phamphlet Series No. 36).

किमर्थं वैश्वदेवानां पूर्वमन्नं प्रदीयते ।
दत्त्वा तु पूर्वमेतेषां कस्मात् पश्चाद्विसर्जनम् ।।
असुराः पितृरूपेण चात्तुं हिंसन्ति मानवान् ।
तेषां वै रक्षणार्थं तु तस्मात् पश्चाद्विसर्जनम् ।। १ ।।

अङ्गुष्ठमात्रो भगवान् विष्णुः पर्यटते महीम् ।
रक्षसां तु वधार्थाय श्राद्धेऽङ्गुष्ठग्रहः स्मृतः ।।
ब्राह्मणानां नियुक्तानामङ्गुष्ठेष्वेव तिष्ठति ।
तस्माच्छ्राद्धेषु सर्वेषु अङ्गुष्ठग्रहणं स्मृतम् ।।
अभिरूपेण मन्त्रेण ' इदं विष्णुर्विचक्रमे ' इति ।।
निरङ्गुष्ठं च यच्छ्राद्धं बहिर्जानु च यद् भवेत् ।
बहिर्जानु च यद् भुक्तं सर्वं विद्यात् तदासुरम् ।।

इति ।। २ ।।

अथाभ्युदयिके। अमूला दर्भाः। युग्मा ब्राह्मणाः। प्राङ्मुखो यज्ञोपवीती स्यात् । प्राङ्मुखेभ्य उदङ्मुखो दद्यात् । उदङ्मुखेभ्यो वा प्राङ्मुखः । द्वौ दर्भौ पवित्रे । सोपयामानि पात्राणि त्रीण्येव । ' शं नो देवीरभिष्टये ' इत्यनुमन्त्रितासु यवानावपति । ' यवोऽसि सोमदेवत्यो गोसवे देवनिर्मितः । प्रत्नवद्भिः प्रत्तः पुष्ट्या नान्दीमुखान् पितॄनिमान् लोकान् प्रीणया हि नः स्वाहा ' इति । ' नान्दीमुखाः पितरः प्रीयन्ताम् ' इत्यर्घ्यनिवेदनम् । ' नान्दीमुखाः पितर इदं वोऽर्घ्यम् ' इत्यर्घ्य-ग्रहणं विसर्जनं च । एवमुत्तरयोरपि पितामहप्रपितामहयोः । नित्यं चाग्नौकरणम् । स्वाहाकारेण होमः स्यात् । ' अतो देवा अवन्तु नः ' इत्यङ्गुष्ठग्रहणं च । ' इदं विष्णुर्विचक्रमे ' इत्यन्यत्र ।

पावमानीः शंवतीरैन्द्रीरप्रतिरथं च श्रावयेत् । भुक्ताशयेषु पिण्डदानम् । आशयान् गोमयेनोपलिप्य प्रागग्रान् कुशानास्तीर्य, अलंकृत्य पृषदाज्यमिश्रेण भुक्तशेषेणैकैकस्य द्वौ द्वौ पिण्डौ दद्यात् । 'नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः स्वाहा' इत्युपांशूक्त्वा अक्षय्यमित्युच्चैः पात्रेणालंकृतमुदकुम्भमादाय दक्षिणं जान्वाच्य 'उपास्मै गायता नरः' इति पञ्च मधुमतीः श्रावयेत् । 'अक्षन्नमीमदन्त हि' इति च षष्ठीम् । 'मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनु मदन्तु' इति । 'नान्दीमुखाः पितरः प्रीयन्ताम्' इत्युच्चैर्विसृजेत् । उक्तं 'प्रदक्षिणमुपचारो यवैस्तिलार्थः' इति । सर्वं द्विर्द्विरिति । यथाशक्ति दक्षिणा ॥ ३ ॥

अथ पात्राणामासादनम् । उदगग्नेर्दर्भेषु । ऊर्ध्वं पर्युक्षणात् । पवित्रच्छेदनानि पवित्रे प्रोक्षणी प्रणीताज्यस्थाली चरुस्थाली स्रुक्स्रुवं चेध्मार्बार्हिर्मेक्षणकाश्च । अन्यद्वोपयोग्यम् । द्वे द्वे पात्रे न्यग्बिले कृत्वा ततः प्रोक्षेत् । सपवित्रे अनामिके कृत्वा प्रोक्षणीमुद्धृत्य, अद्भिः पूरयित्वा, उत्पूय त्रिस्ताभिरुपरिबिलानि कृत्वा ततः प्रोक्ष्य, इध्मं च विस्रस्य प्रणीतापात्रेऽक्षताः सुमनसः पवित्रकं न्यस्य ब्रह्माणमतिसर्जयेत् । नातिसर्जयेदित्येके । अपां पूरयित्वा, उत्पूय ब्रह्मणानुज्ञातोऽग्नेरुदक् प्रतिष्ठापयेत् । आज्यस्थाल्यां सर्पिरानीय, अग्नेरुदगङ्गारापोहनादि समानम् । मन्त्रवर्जमवज्वाल्य, अनन्तरा दर्भतरुणकौ न्यस्य पुनर्ज्वलता त्रिः परिहरेत् ।

आज्यस्योत्पवनम् । बर्हिष उपरि स्थाप्य दर्वीं स्रुवं च प्रक्षाल्य प्रताप्य दर्भैरवमृज्य पुनः प्रक्षाल्य निष्टप्य निदध्यादिति । सर्वत्रैवमाज्यलेपान् परिस्तरणैस्त्रिस्त्रिः संमृज्याग्रैर्मध्येन मूलेन च अद्भिः संस्पृश्याग्नावादधाति । परिधींश्चेत् सर्वत्रैव समानेषु यथोक्तं कर्म कुर्यादिति ।। ४ ।।

नाम त्वेकादशे दिवसे शतरात्रे संवत्सरे वा । यथोपपत्त्येके । जन्मन्येकादशे वा नक्षत्रनाम ।

कुमारस्य तु जातस्य अरणीं षोडशाङ्गुलाम् ।
आहृत्य चोत्तरामरणीं ताभ्यामग्निं तु मन्थयेत् ।।
संगृह्यश्चात ऊर्ध्वं स्याद् विधिनानेन संस्कृतः ।
तस्मिन् कुमारकर्माणि विवाहान्तानि कारयेत् ।
जुहुयाज्जातकर्मादि पित्र्य औपासनेऽपि वा ।। ५ ।।

ब्राह्मार्षदैवोद्वाहेषु प्राजापत्येषु याज्ञिकैः ।
पूर्वं होमविधिः प्रोक्तः पश्चात् परिणयः स्मृतः ।।
गान्धर्वासुरपैशाचा विवाहो यश्च राक्षसः ।
पूर्वं परिणयस्तेषां पश्चाद्धोमो विधीयते ।।
कन्यां वरयमाणानामेष धर्मो विधीयते ।
प्रत्यङ्मुखा वरयन्ति प्रतिगृह्णन्ति प्राङ्मुखाः ।।
उभयस्यापि पक्षस्य पितापुत्रीमनुक्रमेत् ।
कन्यां ददति ये तत्र पितापुत्रीं तथैव च ।।

'अनृक्षरा ऋजवः सन्तु पन्थाः' इत्यागच्छमानामनुमन्त्रयेत । दाता वराभिमुखः पूर्वं ब्राह्मणान् वाचयित्वा ततो वरं वाचयेत्—'शिवा आपः सन्तु । सौमनस्यमस्तु । अक्षतं चारिष्टं

चास्तु । दीर्घमायुः श्रेयः शान्तिः पुष्टिस्तुष्टिश्चास्तु । यच्छ्रेयस्तदस्तु––इति । ततः ‘ वसुदत्तप्रपौत्री मित्रदत्तपौत्री देवदत्तदुहिता यज्ञदत्तप्रपौत्राय ब्रह्ममित्रपौत्राय विष्णुमित्रपुत्राय रुद्रमित्राय तुभ्यं प्रदत्ता । ’ ‘ धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयम् ’ इति । ततो वरः ‘ क इदं कस्मा अदात् ’ इत्यनेन कन्यामभिमृशेत् । ततो दक्षिणां ‘ दक्षिणाः पान्तु । बहुदेयं चास्तु । प्रजापतिः प्रीयताम् । तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु ’ इति । पुण्याहमिति त्रिः । ओं स्वस्तीति । उदपात्रं ततः कृत्वा अभिमृश्यानुमन्त्रयेत् । ‘ अनाधृष्टमस्यनाधृष्यम् ’ इति । ‘ यत् कक्षीवान् संबननम् ’, ‘ आ नः प्रजां जनयतु प्रजापतिः ’ इति कन्यामभिषिच्य ब्राह्मणान् वाचयेदिति ।

‘ संसृष्टम् ’ इति विज्ञेयाः सौर्याः पञ्चाशतं त्वृचः ।
अध्येयास्ता विवाहेषु नायुग्भिर्वेदपारगैः ।।

ततो गन्धमाल्यवासःसुवर्णगवादीनां प्रदानम् । ततः कन्यां सख्यो वाससि गृहीत्वा गृहं प्रवेशयन्ति । ततो जनपदधर्मा ग्रामधर्माश्च स्त्रियो यत् कारयिष्यन्ति तत् कर्तव्यम् । ‘ ग्रामवचनं कुर्युः ’ इति वचनात् ।। ६ ।।

अथ चतुर्थीकर्म । त्रिरात्रे निवृत्ते द्वादशरात्रे संवत्सरे वा । महाव्याहृतिभिर्हुत्वा––‘ भूरग्नये च पृथिव्यै च महते च स्वाहा । भुवो वायवे चान्तरिक्षाय च महते च स्वाहा । स्वरादित्याय च दिवे च महते च स्वाहा । भूर्भुवः स्वश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा ’ ––इति । स्थालीपाकस्य जुहोति ।

‘अग्ने प्रायश्चित्तिरसि । त्वं देवानां प्रायश्चित्तिरसि ।
यास्याः पतिघ्नी तनूः । तामस्या अप जहि स्वाहा ॥
वायो प्रायश्चित्तिरसि । त्वं देवानां प्रायश्चित्तिरसि ।
यास्या अपुत्र्या तनूः । तामस्या अप जहि स्वाहा ॥
सूर्य प्रायश्चित्तिरसि । त्वं देवानां प्रायश्चित्तिरसि ।
यास्या अपशव्या तनूः । तामस्या अप जहि स्वाहा ॥’

इति । ‘अर्यमणं नु देवम्’ इति तिस्रः । ‘प्रजापते न त्वदेतान्यन्यः’ इति च सप्तमी । सौविष्टकृत्यष्टमी ॥ ७ ॥

ऋतौ तु प्रथमे कार्यः प्राजापत्यो भवेच्चरुः ।
हुत्वैतस्याज्याहुतयः सप्तैतास्तदनन्तराः ॥
‘विष्णुर्योनिं’ ‘नेजमेष’ एका चैव प्रजापतेः ।
‘अप नः शोशुचद्’ इति तस्यै मूर्धानमालभेत् ॥

‘वधेन दस्युम्’ इति षड्भिः, ‘अग्निस्तुविश्रवस्तमम्’ इति द्वाभ्यामग्निमुपतिष्ठेत । ‘सूर्यो नो दिवस्पातु’ इति पञ्चभिः सूर्योपस्थानम् । ‘याः फलिनीर्या अफलाः’ इत्येतां चैकामृचं जपेत् ॥ ८ ॥

अथ गर्भलम्भनम् । अध्याण्डामूलं पेषयित्वा ऋतुवेलायाम् ‘उदीर्ष्वातः पतिवती’ इति द्वाभ्यामन्तेस्वाहाकाराभ्यां नस्तो दक्षिणतो निषिञ्चेत् । ‘गन्धर्वस्य विश्वावसोर्मुखमसि’ इत्युपस्थं प्रजनयिष्यमाणोऽभिमृशेत् । ‘विष्णुर्योनिम्’ इति द्वारं विदारयेत् । ‘तां पूषञ्छिवतमामेरयस्व’ इत्युपयच्छेत् । समाप्तेऽर्थे जपेत् ‘प्राणे ते रेतो दधाम्यसौ’ इति । अनुप्राण्यात् ।

‘ यथा भूमिरग्निगर्भा यथा द्यौरिन्द्रेण गर्भिणी ।
वायुर्यथा दिशां गर्भ एवं गर्भं दधाम्यसौ ’ ।।

इति वा ।। ९ ।।

उक्तं तृतीये मासि पुंसवनं चतुर्थेऽनवलोभनम् । ‘ब्रह्मणाग्निः संविदानः ’ इति षट् प्राजापत्यस्य स्थालीपाकस्य हुत्वा ‘ अक्षीभ्यां ते नासिकाभ्याम् ’ इति प्रत्यृचमाज्यलेपेनाङ्गान्यभिमृशेत् । व्याख्यातं सीमन्तोन्नयनं प्रथमगर्भे ।। १० ।।

अनवलोभनं व्याख्यास्यामः । चरुद्वयं च कुर्वीत प्राजापत्यं च पौरुषम् । ‘हिरण्यगर्भः समवर्तताग्रे’ इति प्राजापत्ये जुहुयात् । ‘ सहस्रशीर्षा ’ इति द्वितीये । गुर्विण्याः कुक्षिमभिमन्त्रयेत ‘ आयुष्यम् ’ इति सूक्तेन । ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीत ।। ११ ।।

ग्राम्यस्वाध्यायमधीत्याथारण्यमधीयीत । अथास्य व्रतानि भवन्ति । सावित्रं वेदव्रतं माहानाम्न्यं व्रातिकमौपनिषदं गौदानिकं सौपर्णं चेति । ‘ त्वं व्रतानां व्रतपतिरसि ’ इति । सर्वव्रतेषु चैवम् । यथायथमादेशः । व्रतं कीर्तयेदग्निमीक्षमाणः । ‘ स्मृतं च मे अस्मृतं च मे तन्म उभयव्रतम् ’ इति । एवमुत्तरेषु सर्वेषु पदेषु वदेत् ।

जातकर्मणि चेन्न गृहीतः स्यादथ समावर्तनाग्निं परिगृह्णीयात् । यत्रान्त्यां समिधमादधाति तं परिगृह्णाति । स आवसथ्यः । तस्मिन् गृह्यकर्माणि कुर्युः । तदापि न गृहीतः स्याद् वैवाह्यमग्निमादधीत । वैवाह्योऽपि न गृहीतः स्यादमावास्यायां वैश्यकुलादाहृत्य शुचौ देशे स्थापयित्वा अस्तमित आदित्य औदुम्ब-

रीभिः समिद्भिरष्टाभिर्दधिमधुघृताक्ताभिः 'अप नः शोशुचदघम्' इति प्रत्यृचं हुत्वा श्वोभूत उदित आदित्ये पाणिग्रहस्य पुरस्तादाहुतिप्रभृति सर्वं प्राग्वधूवस्त्रान्तं च । अत्र संभारा दधिवर्जम् । न च तत् प्रयच्छेत् । आज्यशेषं त्वभिमृशेत् । लाजहोमश्चावदानधर्मेण । जुहुयाच्चतुर्थमभ्यातमम् । अरणिमन्तं चेदिच्छेदेतस्मिन्नेवाग्नौ तूष्णीं प्रताप्य निर्मथ्य चतुर्गृहीतमाज्यं जुहुयात् । अग्नये पवमानाय, अग्नये पावकाय, अग्नये पथिकृते, अग्नये तन्तुमते, अग्नये शुचये, 'मनो ज्योतिः' इति च । अत ऊर्ध्वमग्न्याधेयेन समानं प्राक् पौर्णमासात् ।। १२ ।।

यथा पाणिगृहीतायाः प्रजा संतानवर्धनी ।
एवं परिगृहीतेऽग्नौ पाकः पुष्टिकरो भवेत् ।।
तथा दैवे च पित्र्ये च यच्चान्यत् पूर्तसंज्ञिकम् ।
अक्षय्यं भवति दत्तं वै यस्याग्निः परिगृह्यते ।।
परिगृहीते यथाग्नौ सायं प्रातर्बलिं हरेत् ।
विधूतपापः स तेन ब्रह्मलोकमवाप्नुयात् ।।
योऽगृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते ।
अन्नं तस्य न भोक्तव्यं वृथापाको ह्यसौ भवेत् ।।
वृथापाकं हि भुञ्जानः प्रायश्चित्तं विनिर्दिशेत् ।
प्राणायामास्ततः कार्या घृतं प्राश्य ततः शुचिः ।।

इति ।। १३ ।।

अथ यद्युपासनो नश्येत् कथं स्यादिति । लौकिकमग्निमाहृत्य, आज्यं संस्कृत्येध्ममभिघार्य नानान्तयोश्चतुर्गृहीतैरेता आज्याहुतीर्जुहुयात् । 'त्वमग्ने व्रतपा असि', 'यो अग्निं देववीतये', 'तन्तुं तन्वन् रजसो भानुमन्विहि'

‘सप्त ते अग्ने समिधः सप्त जिह्वाः
सप्त ऋषयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति
सप्त योनीरा पृणस्व घृतेन ॥’

स्वाहा—‘त्वं नो अग्ने तव देव पायुभिः’, ‘स त्वं नो अग्नेऽवमो भवोती’, ‘मनो ज्योतिर्जुषताम्’

‘पुनस्त्वादित्या रुद्रा वसवः समिन्धतां
पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तन्वं वर्धयस्व
सत्याः सन्तु यजमानस्य कामाः ॥’

स्वाहा—इति । अथ स्रुवेणाज्याहुतीर्जुहुयात्—अग्नये पवमानाय, अग्नये पावकाय, अग्नये शुचये, अग्नये पथिकृते, अग्नये तन्तुमते, अग्नये वैश्वानराय, अग्नये स्विष्टकृते स्वाहा—इति । स्विष्टकृत् समानं प्राक् पौर्णमासात् । यदि पौर्णमास्यां पार्वणस्त्वकृतो वैश्वानरीयं हुत्वा पार्वणेन यजेत । यद्यमावास्यायां वा पाथिकृतम् । उभयव्यतिक्रम उभयेन यजेत । यावन्तो होमास्त्वकृताः स्युस्तावत्कृत्वो मनस्वतीं जुहुयात् । सकृद्वा सर्वप्रायश्चित्तानि च । सर्वार्थानि सर्वप्रायश्चित्तानि । विच्छिन्ने यज्ञे मनस्वतीं च ॥ १४॥

अथातो लौकिक उपासनग्रहणधारणोपावरोहणसमारोपणविधिमनुव्याख्यास्यामः । प्रवसतस्त्रिषु समारोपणं भवति । आत्मन्यरण्योः समित्स्विति । स यदि समित्सु समारोपयेत् पालाशीमाश्वत्थीमौदुम्बरीं वा तासामेकतमस्यां समारोपयेत् । ‘अयं ते योनिर्ऋत्वियः’ इति । ‘स्वेन यजुषा स्वे योनौ समारोपये’ इति

वा । आत्मनि समारोपणं भवति । ‘या ते अग्ने यज्ञिया तनूः’ इति । अथैनमुपावरोहेत् । ‘प्रत्यवरोह जातवेदः’ इति । ‘यजमानो वा अग्नेर्योनिः स्वायामेवैनं नु तद्योन्यां समारोपयति’ इति हि ब्राह्मणम् । यत्र गच्छेद्यत्रानुप्रहरेत् तत्र प्राप्य गोमयेनोपलिप्य तस्मिन् लौकिकमग्निमाहृत्य व्याहृतिभिरुपसमाधाय तां समिधमभ्यादधाति यस्यां समारूढो भवति । ‘आ जुह्वानः’, ‘उद्बुध्यध्वम्’ इति च द्वाभ्याम् । अथैनमग्निं जुहोति । हस्तेन स्रुवेण वा । द्रवाणां स्रुवेण । काम्येन वाप्यग्निहोत्रहविषामेकेन जुहुयात् । प्रसिद्धं दर्शपूर्णमासाभ्यां यजनम् । प्रसिद्धमाग्रयणम् । प्रसिद्धाः काम्याश्चरवः । प्रसिद्धाः पञ्चयज्ञानामनुप्रयोगाः । स एवमेवाहरहरेतेन विधिना । अध्वनि प्रवर्तमानो लौकिको व्याख्यातः ॥ १५ ॥

अथातः पवित्रेष्टिं व्याख्यास्यामः । चतुर्दश्यामुपवसथं कृत्वा प्रातः पौर्णमास्याममावास्यायां वा ब्रह्मण्युपविष्टेऽध्वर्युः प्रोक्षणीमुत्पाद्य निरुप्याज्यं गार्हपत्ये पुनरधिश्रित्य स्रुक्स्रुवं च संमृज्य, उद्वास्योत्पूयावेक्ष्य गृहीत्वा, अन्वारब्ध आहवनीये द्वे आहुती चतुर्गृहीतेन जुहोति ।‘येन देवाः पवित्रेण’ इति द्वाभ्याम्। प्रणीतादि यथोक्तं समानम्। अग्नये पवमानायाष्टाकपालं पुरोडाशं[1] निर्वपेत् । सवित्रे सत्यप्रसवायोपांश्वाज्यम् । अग्नये पावकायाष्टाकपालं पुरोडाशं निर्वपेत् । सरस्वत्यै प्रियाया उपांश्वाज्यम् । अग्नये शुचये पुरोडाशमष्टाकपालं निर्वपेत् । वायवे नियुत्वत

[1] पुरोडाशः is pronounced as पुरोळाशः in the South Indian Ṛgvedic tradition. Some other words such as ईडे, चौलं, चौडं, etc. are also pronounced with a ळ (as ईळे, etc.).

उपांश्वाज्यम् । अग्नये व्रतपतयेऽष्टाकपालं पुरोडाशं निर्वपेत् । विष्णवे शिपिविष्टायोपांश्वाज्यम् । अग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपेत् । दधिक्राव्ण उपांश्वाज्यम् ।

'अपामिदं न्ययनं समुद्रस्य निवेशनम् ।
अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव ॥'

'नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं
शिवो भव ॥'

इति धाय्ये । 'अग्नी रक्षांसि सेधति', 'यत्ते पवित्रमर्चिषि' इत्याग्नेयस्याज्यभागस्य याज्यानुवाक्या । 'यो धारया पावकया', 'आ कलशेषु धावति पवित्रे परि षिच्यते' इति सौम्यस्य ॥ १६ ॥

अथापरं हविषां याज्यानुवाक्या अनुक्रमिष्यामः, परतन्त्रत्वात् । 'अग्न आयूंषि पवसे', 'अग्ने पवस्व स्वपाः', 'आ विश्वदेवं सत्पतिम्', 'न प्रमिये सवितुर्दैव्यस्य तत्', 'स नः पावक दीदिवः', 'अग्ने पावक रोचिषा', 'उत नः प्रिया प्रियासु', 'इमा जुह्वाना युष्मदा नमोभिः', 'अग्निः शुचिव्रततमः', 'उदग्ने शुचयस्तव', 'वायुरग्रेगा यज्ञप्रीः', 'वायो शुक्रो अयामि ते', 'त्वमग्ने व्रतपा असि', 'यद्वो वयं प्रमिनाम व्रतानि', 'किमित्ते विष्णो परि चक्ष्यं भूत्', 'प्र तत्ते अद्य शिपिविष्ट नाम', 'वैश्वानरो न ऊतये', 'पृष्टो दिवि पृष्टो अग्निः पृथिव्याम्', 'दधिक्राव्णो अकारिषम्', 'आ दधिक्राः शवसा पञ्च कृष्टीः' इति । 'पवमानः सुवर्जनः' इत्येतेनानुवाकेन प्रत्यृचमध्वर्युः स्रुवेण पूर्वमाज्याहुतीर्जुहुयात् । एवमेव पत्नीसंयाजेषु प्राग् गृहपतेः कूष्माण्डेनानुवाकेन ।

'जुष्टो दमूनाः', 'अग्ने शर्ध महते सौभगाय' इति संयाज्ये । अन्वाहार्यो दक्षिणा सुवर्णं वा । अन्ते ब्राह्मणतर्पणम् ।। १७ ।।

अथान्त्येष्टिरित्येतेषां संस्थिते यजमाना आदहनदेशे गत्वा कुर्वन्ति । सर्वेऽनुष्णीषिणः कर्तारोऽहतवाससः प्राचीनावीतिनो हविर्भिश्चरन्ति दक्षिणपूर्वस्यां दिशि विहारं कृत्वा । आहवनीये प्रधानमाध्वर्यवम् । तूष्णीं तन्त्रमन्यत्र संप्रैषात् । पत्नी संनह्यते । चरणाश्रवणे स्वधा कृत्वा 'सीद होतः' इत्येव ब्रूयात् । सोमाय पितृमते षट्कपालं पुरोडाशं निर्वपेत् । पित्यया हौत्रम् । विशेषान् वक्ष्यामः । एका सामिधेनी । अनभिहिंकृत्य । द्वावेव (?) प्राचीनावीतिनः । स्वधाक्रियावेलान्ता संतिष्ठते । पात्रयोगे विशेषान् वक्ष्यामः । हिरण्यशकलैः छिद्राण्यस्य प्रच्छाद्य दक्षिणे हस्ते प्रस्तरं मुखे पुरोडाशम् । अनुस्तरण्यसंभवे गार्हपत्ये क्षीरमधिश्रपयित्वासंतानं संगृह्य शिरो मुखं प्रच्छादयेद् वपावत् सर्वं संचित्य तिलैरवकीर्य ।। १८ ।।

अस्थिनाशे पलाशवृन्तानां त्रीणि षष्टिशतान्याहृत्य पुरुषस्य प्रतिनिधिं कुर्यात् ।

अशीत्यर्धं तु शिरसि ग्रीवायां दश योजयेत् ।
उरसि त्रिशतं दद्याद् विंशतिं जठरे तथा ।।
बाहुभ्यां तु शतं दद्यादङ्गुलीभिर्दशैव तु ।
द्वादशार्धं वृषणयोरष्टार्धं शिश्न एव तु ।।
ऊरुभ्यां तु शतं दद्यात् त्रिशतं जानुजङ्घयोः ।
पादाङ्गुलीषु दश वा एतत् प्रेतस्य लक्षणम् ।।
ऊर्णासूत्रेण संवेष्ट्य यवपिष्टेन लेपयेत् ।

संस्कृत्य विधिनाग्निभिरुदधारां ततो हरेत् ।
शावमाशौचमुक्तं तु यथा संनिहिते तथा ।। १९ ।।

नवश्राद्धं दशाहानि नवमिश्रं तु षड्तून् ।
अतः परं पुराणं वै त्रिविधं श्राद्धमुच्यते ।।
यस्मिन् नवे पुराणे वा विश्वेदेवा न लेभिरे ।
तदासुरं भवेच्छ्राद्धं वृषलं मन्त्रवर्जितम् ।।
अनूदकमधूपं तु गन्धमाल्यविवर्जितम् ।
[नवश्राद्धममन्त्रं च पिण्डोदकविवर्जितम्] ।
निनयेदश्मनि पूर्वं ततः श्राद्धं प्रवर्तयेत् ।।
पश्चाच्च निनयेत् पिण्डं तस्मिन्नेव यथाविधि ।
पुत्राभावे तु पत्नी स्यात् पत्न्यभावे सहोदरः ।।
असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् ।
प्रथमेऽहनि यो दद्यात् स दशाहं समापयेत् ।।
ततस्त्वेकादशेऽहनि श्राद्धं तस्य विधीयते ।
एकोद्दिष्टं तु तच्छ्राद्धमसंपन्नमिति स्थितिः ।। २० ।।

सपिण्डीकरणमकृत्वा त्रिपक्षं परिवेषयेत् ।
उच्छेषणं भूमिगतं विकिरं लेपमर्दनम् ।।
अनुप्रेतेषु विसृजेदप्रजानां गतायुषाम् ।
अनूद्दिश्य तु प्रेतस्य सर्वत्रैवं विधीयते ।।
एकोद्दिष्टेषु श्राद्धेषु न स्वधा नाभिरम्यताम् ।
नाग्नौकरणमित्याहुरेकं चात्र तिलोदकम् ।
एकं पवित्रमेकोऽर्घ्य एकः पिण्डो विधीयते ।।
अनपत्येषु प्रेतेषु न स्वधा नाभिरम्यताम् ।

स्वस्त्यस्तु विसृजेदत्र सकृत् प्रणववर्जितम् ।।
एकोद्दिष्टस्य पिण्डे तु अनुशब्दो न विद्यते ।
पितृशब्दं न कुर्वीत कर्म चात्र न लोपयेत् ।।

'पित्रे पितामहाय प्रपितामहाय' इति यथोक्तम् । न जीवपितामहप्रेतपिता दद्यात् । न जीवन्तमति दद्यात् । उभावेकस्मिन् पितृभेदे । न जीवपितुरस्तीति ।। २१ ।।

अथ सपिण्डीकरणम् । संवत्सरे पूर्णे त्रिपक्षे वा द्वादशाहे वा यदहर्वा वृद्धिरापद्येत । चत्वार्युदपात्राणि । एकं मृतस्य त्रीणीतरेषाम् । एकं पात्रं त्रिषु पात्रेषु नियोजयेत् 'समानी व आकूतिः' इति । एवमेव प्रथमं पिण्डं त्रिषु पिण्डेषु नियोजयेत् मधुमतीभिः 'सं गच्छध्वम्' इति द्वाभ्याम् । एवं चतुर्थोऽनुज्ञापितो भवति । एवमेवात ऊर्ध्वं त्रीन् पिण्डान् निपृणीयात् । न वात्र दैवं भोजयेत् । प्रागेव दैवेऽर्घ्यमन्नाद्यं च दत्वा गन्धमाल्यैः पात्रमर्चयित्वा तृतीयेनापिधाय हुतशेषं पितृभ्यः पाणिषु दद्यात् । अथाप्युदाहरन्ति—

यः सपिण्डीकृतं प्रेतं पृथक् पिण्डे नियोजयेत् ।
स मूढो नरकं याति पितृहा चोपजायते ।।
अन्नं पाणितले दत्तं पूर्वमश्नन्त्यबुद्धयः ।
पितरस्तेन तृप्यन्ति शेषं तु न लभन्ति ते ।।
यच्च पाणितले दत्तं यच्चान्नमुपकल्पितम् ।
एकीभावेन भोक्तव्यं पृथग्भावो न विद्यते ।।
'यो देवानामसि श्रेष्ठ उग्रस्तन्तिचरो वृषा ।
मृळा त्वमस्मभ्यं रुद्रैतदस्तु हुतं तव स्वाहा' इति ।।२२।।

सकृत् पूर्वमपः प्राश्य ततोऽश्नीयात् समाहितः । प्राणायान्नं प्रथमाहुतिर्मुखे । अपानायान्नं द्वितीया । तृतीया व्यानायान्नम् । उदानायान्नं चतुर्थी । समानायान्नं पञ्चमी । प्राणं तु त्रिपुटं ग्रासम् । अपानं मुद्रहस्तेन । व्यानं तु पूर्णहस्तेन । उदानं त्वनामिकया ।

समानं शृङ्गहस्तेन यो भुङ्क्ते वाग्यतः शुचिः ।
आचम्य पादाङ्गुष्ठेऽनु दक्षिणे स्रावयेदपः ।।
‘ महानयं पुरुषो जातवेदा
योऽङ्गुष्ठाग्रे प्रतिष्ठितः ।
तमद्भिः परिषिञ्चामि भूयो
ऽस्मान् नयस्व मामृतस्य योनिम् ।। ’

इति । वक्ष्यमाणेन मन्त्रेण हृदयं चैव संस्पृशेत् ।

‘ विश्वोऽसि वैश्वानर विश्वधाम
विश्वं त्वया हूयते जातवेदः ।
विशन्तु त्वामाहुतयः सर्वा एता
मयि विशामो यत्र विश्वामृतोऽसि ।। ’

इति । प्राणममृते जुहोमि ममाविश सं तं प्रसहाय प्राणाय स्वाहा ।

अक्षिणी नासिके कर्णौ मूर्धानं चैव संस्पृशेत् ।
यस्तु विद्वान् जुहोत्येवमात्मासौ वै समाहितः ।।
प्रदीप्तेऽग्नौ यथा हुतमेवं तस्य हुतं भवेत् ।
यस्त्वविद्वान् जुहोत्येवमात्मासौ वै समाहितः ।।
यथा हि भस्मनि हुतमेवं तस्य हुतं भवेत् ।
तद्यथेषीकायास्तूलं प्रोतमग्नौ प्रदूयते ।
एवं हि सर्वपाप्मानं प्रद्दयन्त्यात्मयाजिनः ।।

इति । तदेतदृचाभ्युक्तम्—' मोघमन्नं विन्दते अप्रचेताः ' इति ॥ २३ ॥

प्रादेशमात्रां समिधं मूलमग्रं च लक्षयेत् ।
विपरीतमुखा नित्यं हुता वज्रमुखी भवेत् ॥
क्षीणायुर्वित्तहीनस्तु सद्यो रोगी प्रजायते ।
इध्मं त्वत्र प्रवक्ष्यामि अरत्निमात्रप्रमाणतः ॥
समच्छेदा च सुशिखा दश पञ्च च संमिताः ।
अमूलान् दर्भानादाय इध्मबद्धकुशेन तु ॥
होमकाले तथा कृत्वा सव्ये पाणौ सुवेष्टितम् ।
मूले मध्ये तथा चाग्रे इध्मं त्रिरभिघारयेत् ।
अभिघार्य ततस्तूष्णीं देवतत्त्वानि चिन्तयेत् ॥ २४ ॥
एकस्तु प्लाव्यते त्वप्सु एकः पत्न्यै प्रदीयते ।
एकस्तु हूयतेऽथाग्नौ त्रयः पिण्डाः प्रकीर्तिताः ॥
य एष प्लाव्यते त्वप्सु तेन प्रीणयते वृकम् ।
एकः प्रीणयते देवान् पितॄंश्चैव महायशाः ॥
यमेकं मध्यमं पिण्डं पत्नी प्राश्नाति वाग्यता ।
भोक्तव्यः पुत्रकामायां सुप्रीताः स्युः पितामहाः ॥
यमेकमपरं पिण्डमग्नौ जुह्वति वै द्विजाः ।
सुप्रीताः प्रपितामहास्तेषां वर्धन्ति च प्रजाः ॥
सभ्यावसथ्यशालाग्नौ दाहयेत् तान् नियोजयेत् ।
चितादेशात् प्रागुदीच्यां दिशि पञ्चदश क्रमान् ॥
अतिक्रम्योत्सृजन्तीति विद्वांसो दाहकर्मणि ।
' गच्छध्वमग्रतः पूर्वमेष वः सुहृदां सुहृत् ।
दिवः परं परं व्योम नयध्वं स्थानमुत्तमम् ॥ '

इति । पत्नीपरिचरणं चावसथ्यधारणात् । तां चोपरतामाहार्येण निर्मन्थ्येन वा दग्ध्वा संस्कुर्वन्ति । यथोक्तं स्थानमावसथ्यस्य । त एतेऽप्रयाजा अननुयाजा अनिडा अनिगदा असामिधेनीकाश्च पाकयज्ञा भवन्ति । जान्वाच्य स्वाहाकारेण जुहुयात् । तिष्ठन् वषट्कारेण । आसीनः पितृभ्यो दद्यात् । तिष्ठन् देवेभ्य इति ।। २५ ।।

अथ वृषोत्सर्गः । कार्तिक्यां पौर्णमास्यां वैशाख्यां वा जीववत्सायाः पयस्विन्याः पुत्रं द्विहायनमेकहायनं वा नीलं बभ्रुं कपिलं पिङ्गलं वा ।

लोहितो यस्तु वर्णेन मुखे पुच्छे तु पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स वै नीलो वृषः स्मृतः ।।

इति । आपोहिष्ठीयाभिर्वामदैव्येन च वत्सतरीभिः सहाभिषिच्य गोष्ठे चतुष्पथे वाग्निमुपसमाधाय रौद्रं स्थालीपाकं श्रपयेत् । सौम्यं पायसमैन्द्रं यावकम् । मार्जनान्तं कृत्वा त्रिः प्रदक्षिणमग्निं पर्याणीय रुद्राङ्कं कृत्वा दक्षिणे त्रिशूलं वामे चक्रं प्राञ्चमुत्सृजेत् । व्रजन्तमनुमन्त्रयेत्––

'एतं युवानं पतिं वो ददामि
येन क्रीडन्तीश्चरथ प्रियेण ।
मा वः स्थात्र जनुषा सुभगा
रायस्पोषेण समिषा मदेम ।। '

इति ।

'शान्ता पृथिवी शिवमन्तरिक्षं
द्यौर्नो देव्यभयं कृणोतु ।

शिवा दिशः प्रदिश उद्दिशो न
आपो विद्युतः परिपान्तु सर्वतः ॥ '

इति । सर्वतो व्रजस्व इति । 'ऋषभं मा समानानाम्' इति च सूक्तेन । रुद्रसूक्तैर्दिशामुपस्थानम् । अथ लाङ्गूलं चोद्धरेत् उदपूर्णं यत् पिबति खादति तेन देवान् ऋषीन् पितॄंश्च प्रीणाति यश्चोत्सृजत इत्याह शौनकः । ब्राह्मणान् भोजयित्वा तिलानुदकुम्भं गां वासो हिरण्यं दक्षिणा । स्वस्त्ययनं वाचयीत ॥ २६ ॥

अथातो ग्रहाणामातिथ्यकल्पं व्याख्यास्यामः । मासि मास्यृतावृतावयने विषुवे चन्द्रग्रहे सूर्यग्रहे शुभाशुभे वा प्रयुञ्जानः सर्वान् कामानवाप्नोति । उक्तमेवाग्निविधानं कृत्वा ग्रहदेवतानां यः सर्वत्र कर्म कुरुते तस्य ग्रहास्तुष्यन्ति । व्याहृतिभिरावाहनमृग्भिश्चानुपूर्व्येण । अग्निरापो भूमिर्विष्णुरिन्द्र इन्द्राणी प्रजापतिः सर्पा ब्रह्मेत्यधिदेवताः । 'अग्निं दूतं वृणीमहे', 'अप्सु मे सोमो अब्रवीत्', 'स्योना पृथिवि भव', 'इदं विष्णुर्विचक्रमे', 'इन्द्रः श्रेष्ठानि द्रविणानि धेहि', 'इन्द्राणीमासु नारिषु', 'प्रजापते न त्वदेतान्यन्यः', 'आयं गौः पृश्निरक्रमीत्', 'ब्रह्म जज्ञानं प्रथमं पुरस्तात्' इत्यधिदेवतामन्त्राः । 'आ कृष्णेन रजसा वर्तमानः', 'आ प्यायस्व समेतु ते', 'अग्निर्मूर्धा दिवः ककुत्', 'उद्बुध्यध्वं समनसः सखायः', 'बृहस्पते अति यदर्यो अर्हात्', 'शुक्रः शुशुक्वाँ उषो न जारः', 'शमग्निरग्निभिः करत्', 'कया नश्चित्र आ भुवत्', 'केतुं कृण्वन्न केतवे' इति ग्रहाणां मन्त्राः । रुद्रो गौरी स्कन्दः पुरुषो ब्रह्मेन्द्रो यमः कालश्चित्रगुप्तश्चेति प्रत्यधिदेवताः । 'त्र्यम्बकं यजामहे', 'गौरीर्मिमाय

सलिलानि तक्षति ', 'यदक्रन्दः प्रथमं जायमानः', ' सहस्रशीर्षा पुरुषः ', ' ब्रह्मणस्पते त्वमस्य यन्ता ', ' इन्द्रं वो विश्वतस्परि ', ' यमाय सोमं सुनुत ', ' मो षु णः परा परा ', 'उषो वाजं हि वंस्व' इति प्रत्यधिदेवतामन्त्राः। स्नानार्घ्यपाद्यादि यथाविधि । द्वौ रक्तौ, श्वेतौ द्वौ, पीतौ द्वौ, कृष्णास्त्रयः । सर्वेषां नवानां गन्धमाल्य-धूपदीपाच्छादनं प्रतिस्वं दद्याद्यथावर्णम् । अर्कः पलाशः खदिरो-ऽपामार्गोऽश्वत्थ उदुम्बरः शमी दूर्वाः कुशा इति समिधः । सर्वेषामलाभे पालाश्यो वा । एकैकस्य अष्टसहस्रमष्टशतमष्टा-विंशतिरष्टौ वा । समिध आज्यं चरुं च हुत्वोपहारान् दद्यात् । गुडौदनमादित्याय । घृतपायसं सोमाय । हविष्यमन्नमङ्गार-काय । क्षीरौदनं बुधाय । दध्योदनं बृहस्पतये । घृतौदनं शुक्राय । तिलपिष्टमिश्रमन्नं शनैश्चराय । राहवे मांसौदनम् । केतवे चित्रौदनम् । इत्युपहाराः । सोमं राजानं सौविष्टकृतं हुत्वोपस्थाय यथाविधि । रक्ता गौः शङ्खो रक्तोऽनड्वान् कनकं पीतं वासः श्वेतोऽश्वः कृष्णा गौः कृष्णायसं छाग इति दक्षिणा । सर्वेषां काञ्चनं वा । येन वा तुष्येदाचार्यः । ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीत ॥

यथा शस्त्रप्रहाराणां कवचं भवति वारणम् ।
एवं दैवोपघातानां शान्तिर्भवति वारणम् ॥
यथा समुत्थितं यन्त्रं यन्त्रेण प्रतिहन्यते ।
एवं समुत्थितं घोरं शान्त्या च प्रतिहन्यते ॥
अहिंसकस्य दान्तस्य धर्मार्जितधनस्य च ।
नित्यं च नियमस्थस्य सदा सानुग्रहा ग्रहाः ॥

ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः ।
पूजिताः प्रतिपूज्यन्ते निर्दहन्त्यपमानिताः ॥

इति ॥ २७ ॥

अथातो ग्रहाणां प्रमाणम्——

द्वादशाङ्गुलोऽर्को भवेत् सोमश्च द्विगुणः स्मृतः ।
कुजः स्याच्चतुरङ्गुलस्तदर्धं तु बुधः स्मृतः ॥
षडङ्गुलो भवेज्जीवो भार्गवस्तु नवाङ्गुलः ।
सौरिः स्याच्चतुरङ्गुलो राहुः पञ्च च विंशतिः ।
केतुः पञ्च च विंशतिस्ततश्चार्धाङ्गुलः परः ॥
तिलतण्डुलमिश्रं वा अजाक्षीरं तु शोणितम् ।
कर्णनासागृहीतं स्यादेतच्चित्रोदनं स्मृतम् ॥
मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे ।
लोहितं दक्षिणे विद्याद् बुधं पूर्वोत्तरेण तु ॥
उत्तरेण गुरुं विद्यात् पूर्वेणैव तु भार्गवम् ।
पश्चिमेन शनिं विद्याद्राहुं दक्षिणपश्चिमे ।
पश्चिमोत्तरतः केतुं ग्रहाणां विधिरुत्तमः ॥

इति ॥ २८ ॥

अथातो वारुणविधिः । वापीकूपतडागयज्ञं व्याख्यास्यामः । पुण्ये तिथिकरणे शुभे नक्षत्रे प्राचीं दिशमास्थाय प्राक्प्रवण उदक्प्रवणे वोदकसमीपेऽग्निमुपसमाधाय वारुणं चरुं श्रपयित्वा तस्य पुरस्ताच्चतस्र आज्याहुतीर्जुहुयात् । 'समुद्रज्येष्ठाः' इति प्रत्यृचम् । ततो हविषाष्टाभिर्जुहुयात् 'तत् त्वा यामि ब्रह्मणा वन्दमानः' इति पञ्च, 'त्वं नो अग्ने वरुणस्य विद्वान्' इति द्वे,

‘ इमं मे वरुण श्रुधी ’ इति च । स्विष्टकृन्नवमम् । ‘ नव वै प्राणाः प्राणा वा आपस्तस्मादापो नवभिर्जुहोति ’ । मार्जनान्ते धेनुं तारयेत् । अवतीर्यमाणामनुमन्त्रयेत—

‘ इदं सलिलं पवित्रं कुरुष्व
शुद्धाः पूता अमृताः सन्तु नित्यम् ।
तास्तरन्ती सर्वतीर्थाभिषिक्तं
लोकालोकं तरते तीर्यते च ।। ’

इति । स्वयं पुच्छाग्रे लग्नः अन्वारब्ध उत्तीर्य ‘ आपो अस्मान् मातरः शुन्धयन्तु ’ इति । अथापराजितायां दिश्युत्थापयेत् ‘ सूयवसाद् भगवती हि भूयाः ’ इति । हिंकृतं चेत् ‘ हिंकृण्वती वसुपत्नी वसूनाम् ’ इति । सचैलकण्ठां काञ्चनशृङ्गीं वृषभप्रजां रौप्यमयखुरां कांस्योपदोहां विप्राय दद्यात् । इतरेभ्यो रौप्यं दक्षिणा । तत उत्सर्गं कुर्यात् । देवपितृमनुष्याः प्रीयन्तामिति । यश्चोत्सृजत इत्याह शौनकः । ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीत ।। २९ ।।

अरण्योर्नष्टयोर्वापक्षीणयोर्दग्धयोस्तथा ।
अग्निश्चेद् ध्रियते यत्र कथं तत्र भवेच्छुचिः ।
आहृत्याग्निं समारोप्य निर्मथ्य प्रयतः शुचिः ।।

‘ उत्तिष्ठाग्ने प्रविश स्वां योनिं यथायथमाविशद्देवयज्यायै जातवेदः । ’ अरण्योररणी संस्पृश्य मन्थयेत् । जीर्णया प्रोर्णुवस्व इति नित्ययाजिनाम् । शौची पावमानी तन्तुमती पाथिकृती चेष्टयः । कृत्वा तन्त्रं न लुप्यते ।

अज्ञानान्मथिते त्वग्नौ यदि पूर्वः प्रदृश्यते ।
मथितं च समारोप्य पूर्वे होमो विधीयते ।।

यदेषाभि यज्ञगाथा गीयते—

आधाने दक्षयज्ञे च साकमेधासु चेष्टिषु ।
सौत्रामण्यां पशौ चैव अग्नयः सकृदुद्धृताः ।।
खाते लूने च पिष्टे च सांनाय्ये मार्तिकेषु च ।
आलभ्य मन्त्रो वक्तव्यः संस्काराज्जायते हविः ।।
संस्काराज्जायते हविरिति ।।

नमः शौनकाय नमः शौनकाय ।। ३० ।।

ERRATA

Page	Line	Read
६	८	प्रातरशनान्यभिपूजयेत्
६	६	पूर्वाह्णो वै
१०	२१	रौद्रं
२३	२	एकबर्हिषः
४३	१४	‘ उदूहामि ’
५७	१६	बर्हिष्या-
८३	५	अस्मे प्र यन्धि मघवनृजीषिन्
६६	१३	एतेन
११२	१३	ब्रह्मौदनः तं
१३०	१७	प्रतिगृह्णामि
१३६	३	श्रावण्यां
१३८	४	कपालमित्यत्र
१४३	६	सजूर्ऋतुभिः
१६१	१५	यज्ञदारुद्रदे
१६६	१७	नवरथेऽयं
१७६	७	सुपूर्णं
१६६	३	धामन् ते
१६६	८	यत् ते राजन्
२०२	२१	दुःष्वप्न्यम्
२२१	१४	प्र धारा यन्तु (ऋ० खि० १. ३)
२३७	११	इमे जीवा वि मृतैः